लक्ष्मण– चित्रकूट को जाने वाले मार्ग में यमुना के तट पर स्थित यह, भारद्वाज ऋषि द्वारा बताया गया श्याम नामक वटवृक्ष है।

(राम स्पृहापूर्वक देखते हैं)

सीता– क्या आर्यपुत्र उस स्थान का स्मरण कर रहे हैं?

राम– अरि! उसे भला कैसे भुलाया जा सकता है?

जहाँ पर तुम मार्ग में चलने की थकान से आलस्य युक्त, कोमल और मनोहर, दृढ़ आलिंगन में कसे हुए, मर्दित कमलनाल के समान, अपने दुर्बल अंगों को मेरे वक्षःस्थल पर रखकर सो गयी थीं।।24।।

(राम स्पृहापूर्वक देखते हैं)

लक्ष्मण– यह विन्ध्याटवी के मुहाने पर राक्षस विराध के संवाद का दृश्य है।

भगवती भागीरथी का विशेषरूप से संकेत कवि द्वारा विशेष प्रयोजन वश किया गया है, क्योंकि सीता के परित्याग के बाद भगवती गंगा ही उसके जीवन की रक्षा करती हैं तथा उसके प्रवाह में ही सीता प्रसव द्वारा दो जुडवाँ पुत्रों कुश तथा लव को जन्म देती है। नायक राम द्वारा कल्याणों को प्रदान करने विषयक आशीर्वाद की बात भी उसी से जुड़ी हुई है। व्यंजना से यहाँ कवि द्वारा उसी सम्पूर्ण भावी घटना की ओर संकेत किया गया है। कवि की व्यंजनाप्रधान शैली दर्शनीय है।

सीता– अलं तावदेतेन! पश्यामि तावदार्यपुत्रस्वहस्तधृतताल वृतान्तपत्रमात्मनोऽत्याहितं दक्षिणारण्यपथिकत्वम्।[1]

रामः–

एतानि तानि गिरिनिर्झरिणीतटेषु,
वैखानसाश्रिततरूणि तपोवनानि।
येष्वातिथेयपरमा यमिनो भजन्ते,
नीवारमुष्टिपचना गृहिणो गृहाणि।।25।।

(**अन्वय–** गिरि–निर्झरिणी–तटेषु वैखानस–आश्रित–तरूणि एतानि तानि तपोवनानि (सन्ति), येषु आतिथेय–परमाः नीवार–मुष्टि–पचनाः यमिनः गृहिणः गृहाणि भजन्ते।।25।।)

लक्ष्मणः– अयमविरलानोकहनिवहनिरन्तरस्निग्धनीलपरिसरारण्य–परिणद्धगोदावरीमुखरकन्दरः संततमभिष्यन्दमानमेघमेदुरितनीलिमा जन–स्थानमध्यगो गिरिः प्रस्रवणो नाम।

रामः–

स्मरसि सुतनु! तस्मिन्पर्वते लक्ष्मणेन,
प्रतिविहितसपर्यासुथस्योस्तान्यहानि?
स्मरसि सरसनीरां तत्र गोदावरीं वा,
स्मरसि च तदुपान्तेष्वावयोर्वर्तनानि।।26।।

(**अन्वय–** सुतनु! तस्मिन् पर्वते लक्ष्मणेन प्रतिविहित–सपर्या–सुथस्योः तानि अहानि स्मरसि? वा तत्र सरस–नीराम् गोदावरीम् च तत् उपान्तेषु आवयोः वर्तनानि स्मरसि?।।26।।)

किं च–

किमपि किमपि मन्दं मन्दमासत्तियोगा–
दविरलितकपोलं जल्पतोरक्रमेण।
अशिथिलपरिरम्भव्यापृतैकैकदोष्णो–
रविदितगतयामा रात्रिरेव व्यरंसीत्।।27।।

---

[1]. अलं दाव एदिणा! पेक्खम्मि दाव अज्जउत्त सहत्तधरिदतालवुन्तादवत्तं अत्तणो अच्चाहिदं दक्खिणारण्णपहिअत्तणम्।

सीता– इसे दिखाने से रहने दो। मैं तो तब तक दक्षिणारण्य के यात्रा–प्रसंग को देख रही हूँ, जहाँ पर आर्यपुत्र ने अपनी कोई चिन्ता न करके, छत्र की भाँति अपने हाथ में ताड़ के पत्र को धारण किया था।

राम– पर्वतीय नदियों के किनारों पर स्थित, वानप्रस्थियों द्वारा सेवन किए जाते हुए वृक्षों वाले, ये वे तपोवन हैं, जिनमें अतिथि–सत्कार में निपुण, कुछ ही मुट्ठी निवार को पकाकर, संयमी गृहस्थ घरों में निवास करते हैं।।25।।

लक्ष्मण– यह घने वृक्षों की पंक्तियों से निरन्तर स्निग्ध एवं श्याम वर्ण वाले वन के भागों से युक्त, गोदावरी की तरंगों के टकराने के कारण मुखरित गुफाओं वाला और निरन्तर बरसने वाले मेघों के कारण और भी अधिक नीलिमा को धारण करने वाला, जनस्थान के मध्य भाग में स्थित 'प्रस्रवण' नाम का पर्वत है।

राम– हे सुन्दरि! क्या तुम उस 'प्रस्रवण' पर्वत में लक्ष्मण द्वारा की गयी, सेवा से प्रसन्न हम दोनों के उन सुखमय दिनों का, निर्मल जल से युक्त गोदावरी नदी का एवं उसके किनारे किए गए हमारे विहारों का स्मरण कर रही हो?।।26।।

और भी

जहाँ पर अत्यधिक अनुराग के सम्बन्ध से, कपोलों को पास–पास सटाकर, बिना क्रम के कुछ–कुछ बातें करते हुए, परस्पर एक दूसरे की भुजाओं के दृढ़ आलिंगन में बँधकर, बिना पता चले ही व्यतीत होने वाली, अनेक प्रहरों वाली रात्रि बीत जाया करती थी।।27।।

महाकवि का प्रकृति विषयक गहन प्रेम अभिव्यक्त हुआ है, क्योंकि उन्होंने चित्रदर्शन प्रसंग में भी अपने लिए इस अवसर को खोज लिया है। लक्ष्मण का सेवाभाव भी प्रदर्शित किया गया है। इसके अतिरिक्त कवि द्वारा पवित्र दाम्पत्य–प्रेम का सुन्दर एवं मनभावन चित्र भी प्रस्तुत किया गया है।

(**अन्वय**– आसत्ति–योगात् किम्–अपि, अविरलित–कपोलम् किम्–अपि, मन्दम्–मन्दम् अक्रमेण जल्पतोः अशिथिल–परिरम्भ–व्यापृत–एक–एकदोष्णोः अविदित–गत–यामा–रात्रिः एव व्यरंसीत्।।27।।)

लक्ष्मणः– एष पंचवट्यां शूर्पणखाविवादः।

सीता– हा आर्यपुत्र। एतावृत्ते दर्शनम्?[1]

रामः– अयि वियोगत्रस्ते? चित्रमेतत्।

सीता– यथा तथा भवतु, दुर्जनोऽसुखमुत्पादयति।[2]

रामः– हन्त, वर्तमान इव मे जनस्थानवृत्तान्तः प्रतिभाति।

लक्ष्मणः–

अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना,
तथा वृत्तं पापैर्व्यथयति यथा क्षालितमपि।
जनस्थाने शून्ये विकलकरणैरार्यचरितै–
रपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्।।28।।

(**अन्वय**– अथ पापैः रक्षोभिः कनक–हरिण–च्छद्म–विधिना इदम् तथा वृत्तम् यथा क्षालितम् अपि व्यथयति। शून्ये जनस्थाने विकल–करणैः आर्य–चरितैः अपि ग्रावा रोदिति, वज्रस्य अपि हृदयम् दलति।28)

सीता– (सास्रमात्मगतम्) अहो, दिनकरकुलानन्दन एवमपि मम कारणात् क्लान्त आसीत्![3]

लक्ष्मणः– (रामं निर्वर्ण्य साकूतम्) आर्य! किमेतत्?

अयं तावद्बाष्पस्त्रुटित इव मुक्तामणिसरो,
विसर्पन्धाराभिर्लुठति धरणीं जर्जरकणः।
निरुद्धोऽप्यावेगः स्फुरदधरनासापुटया,
परेषामुन्नेयो भवति चिरमाध्मातहृदयः।।29।।

(**अन्वय**– तावत् धाराभिः विसर्पन् जर्जर–कणः, अयम् बाष्पः त्रुटितः मुक्ता–मणि–सरः इव धरणीम् लुठति, चिरम् आध्मात–हृदयः आवेगः निरुद्धः अपि स्फुरत्–अधर–नासा–पुटया, परेषाम् उन्नेयः भवति।।29।।)

---

1 . हा अज्जउत! एत्तिअ दे दंसणम्?

2 . जहा तहा होदु। दुज्जणो असुहं उप्पादेइ।

3 . अह्मो, दिणअरकुलाणन्दणो एव्वंवि मह कालणादो किलन्तो आसि!

लक्ष्मण– यह पंचवटी में सूर्पनखा–विवाद का दृश्य है।

सीता– हाय! आर्यपुत्र, बस यहीं तक आपका दर्शन था।

राम– अरी, विरह से डरने वाली! यह तो चित्र है।

सीता– चाहे जो भी हो, दुर्जन तो अनिष्ट उत्पन्न करता ही है।

राम– हाय! जनस्थान का वृत्तान्त मुझे प्रत्यक्ष सा प्रतीत हो रहा है।

लक्ष्मण– **इसके बाद, उन पापी राक्षसों ने सोने के हरिण के छल से ऐसा दुष्कर्म किया, जो उसप्रकार से प्रतिकार किए जाने पर भी, (हमें आज भी) पीड़ित कर रहा है। उस सुनसान जनस्थान में विकल इन्द्रियों वाले, आर्य के चरितों से मूर्च्छा आदि व्यापारों द्वारा, एक बार तो पत्थर भी रो उठता है और वज्र का हृदय भी टुकड़े–टुकड़े हो जाता है।।28।।**

सीता– (अश्रुपूर्वक मन में) ओह! सूर्यवंश को आनन्द प्रदान करने वाले, आर्यपुत्र मेरे कारण इसप्रकार दुःखी हुए थे?

लक्ष्मण– (राम को देखकर, साभिप्राय) आर्य! यह क्या है?

टूटी हुई मोतियों वाली लड़ी के समान, अनेक धाराओं में बिखरी हुई बूँदों वाला, आपका यह अश्रुप्रवाह पृथ्वी पर फैल रहा है, लम्बे समय तक आपके हृदय को परिपूर्ण करने वाला, यह आवेग, रोके जाने पर भी, फड़कते हुए ओठों एवं नासिका के नथुनों से ही दूसरों के लिए अनुमान के योग्य हो रहा है।।29।।

श्लोक 28– महाकवि भवभूति का करुणरस अन्य अनेक श्लोकों के साथ–साथ प्रस्तुत श्लोक के कारण भी विशेषरूप से प्रसिद्ध हुआ, क्योंकि अनेक कवियों ने इसके भाव को ग्रहण करके ही उनके करुण की मुक्तकण्ठ से प्रशंसा की है। वस्तुतः पत्थर दिल या वज्र के समान कठोर व्यक्ति को भी रुलाने की सामर्थ्य भवभूति को छोड़कर, अन्य किसी कवि में न तो आज तक हो पायी है और न ही भविष्य में होने की कोई सम्भावना है। व्यक्ति के आन्तरिक भावों को अभिव्यक्ति प्रदान करने में भी महाकवि का कोई सानी नहीं है।

रामः— वत्स!

तत्कालं प्रियजनविप्रयोगजन्मा
तीव्रोऽपि प्रतिकृतिवांछया विसोढः।
दुःखाग्निर्मनसि पुनर्विपच्यमानो,
हृन्मर्मव्रण इव वेदनां तनोति।।30।।

(**अन्वय**— प्रिय–जन–विप्रयोग–जन्मा तीव्रः अपि प्रति–कृति–वांछया तत्कालम् विसोढः, दुःख–अग्निः पुनः मनसि विपच्यमानः (सन्) हृद्–मर्म–व्रणः इव वेदनाम् तनोति।।30।।)

सीता— हा धिक्! अहमप्यतिभूमिं गतेन रणरणकेनार्यपुत्रशून्य-मिवात्मानं पश्यामि।[1]

लक्ष्मणः— (स्वगतम्) भवतु, आक्षिपामि। (चित्रं विलोक्य प्रकाशम्) अथैतन्मन्वन्तरपुराणस्य तत्रभवतस्तातजटायुषश्चरित्रविक्रमोदाहरणम्।

सीता— हा तात ! निर्व्यूढस्तेऽपत्यस्नेहः।[2]

रामः— हा तात काश्यप शकुन्तराज! क्व न खलु पुनस्त्वादृशस्य महतस्तीर्थभूतस्य साधोः सम्भवः?

लक्ष्मणः— अयमसौ जनस्थानस्य पश्चिमतः कुंजवान्नाम (पर्वतो) दनुकबन्धाधिष्ठितो दण्डकारण्यभागः। तदिदममुष्य परिसरे मतंगाश्रम-पदम्। तत्र श्रमणा नाम सिद्धा शबरतापसी। तदेतत्पम्पाभिधानं पद्मसरः।

सीता— यत्र किलार्यपुत्रेण विच्छिन्नामर्षधीरत्वं प्रमुक्तकण्ठं प्ररुदितमासीत्।[3]

रामः— देवि! परं रमणीयमेतत्सरः।

एतस्मिन्मदकलमल्लिकाक्षपक्ष–
व्याधूतस्फुरदुरुदण्डपुण्डरीकाः।
बाष्पाम्भः परिपतनोद्गमान्तराले,
संदृष्टाः कुवलयिनो मया विभागाः।।31।।

(**अन्वय**— एतस्मिन् मद–कल–मल्लिकाक्ष–पक्ष–व्याधूत–स्फुरत्–उरु–दण्ड–पुण्डरीकाः कुवलयिनः विभागाः मया बाष्प–अम्भः परिपतन–उद्गम–अन्तराले संदृष्टाः ।।31।।)

1. हद्धी हद्धी। अहंवि अदिभूमिं गदेण रणरणएण उज्जउत्तसुण्णं विअ अत्ताणं पेक्खामि।
2. हा ताद् णिव्वूढो दे अवच्चसिणेहो।
3. जत्थ किल अज्जउत्तेण विच्छिण्णामरिसधीरत्तणं पमुक्ककण्ठं परुण्णं आस।

राम— वत्स!

प्रियजन के वियोग से उत्पन्न, दुःख की अग्नि को रावण से बदला लेने की इच्छा से, उस समय तो मैंने जैसे–तैसे सहन कर लिया, किन्तु आज वही दाह, हृदय के मर्मस्थल में पके हुए फोड़े के समान मेरी असह्य पीड़ा को बढ़ा रहा है।।30।।

सीता— हाय! धिक्कार है, धिक्कार है। मैं भी सीमा का अति-क्रमण करने वाली, अतिशय उत्कण्ठा के कारण, अपने को आर्यपुत्र से रहित के समान देख रही हूँ।

लक्ष्मण— (मन में) ठीक है, तब तो मैं इनका ध्यान दूसरी ओर आकृष्ट करता हूँ। (चित्र को देखकर, स्पष्टरूप से) इसके बाद, अब मन्वन्तर से भी प्राचीन आदरणीय जटायु के चरित्र और पराक्रम का उदाहरण देखिए।

सीता— हा तात! आपका सन्तान–स्नेह सफल हुआ।

राम— हा तात! **काश्यप,** पक्षिराज! आपके समान महान्, तीर्थ के समान पवित्र आत्मा वाले, सज्जन की उत्पत्ति भला कहाँ सम्भव है?

लक्ष्मण— जनस्थान की पश्चिम दिशा में यह 'कुँजवान्' नामक पर्वत है और वहीं पर **'दनुकबन्ध'** द्वारा अधिष्ठित दण्डकारण्य का भाग है एवं इसी के पास में यह **'मतंग'** ऋषि का आश्रम है। वहीं पर यह **'श्रमणा'** नाम वाली सिद्ध शबर–तापसी है तथा वह, यह **'पम्पा'** नाम का कमलों का सरोवर है।

सीता— जहाँ पर आर्यपुत्र स्वाभाविक धैर्य का परित्याग करके, रावण के प्रति क्रोध के कारण गला फाड़कर (मुक्तकण्ठ) रोए थे।

राम— हे देवि! यह सरोवर अत्यन्त सुन्दर है,

इसमें मद के कारण, अव्यक्त तथा मधुर कूजन करने वाले, मल्लिकाक्ष नामक हंसों द्वारा कँपाए जाते हुए, सुशोभित नाल वाले, श्वेत कमलों से युक्त, नीलकमलों से परिपूर्ण प्रदेशों को मैंने आँसुओं के गिरने तथा उमड़ने के अन्तराल में देखा था।।31।।

श्लोक 30— महाकवि की उपमाओं में मौलिकता का गुण विद्यमान रहा है, उपमानों के चयन में उनकी सूक्ष्म और पारखी दृष्टि विशेषरूप से प्रभावी रही है। हृदय की पीड़ा की मार्मिक अभिव्यक्ति मर्मस्थल में फोड़े के उपमान द्वारा अत्यन्त प्रभावी रही है।

लक्ष्मणः– अयमार्यो हनूमान्।

सीता– एष स चिरनिर्व्यूढजीवलोकप्रत्युद्धरणगुरूपकारी महानुभावो मारुतिः।[1]

रामः–

दिष्ट्या सोऽयं महाबाहुरंजनानन्दवर्धनः।
यस्य वीर्येण कृतिनो, वयं च भुवनानि च ।।32।।

(**अन्वय–** दिष्ट्या अयम् सः महाबाहुः अंजना–आनन्दवर्धनः, यस्य वीर्येण भुवनानि च, वयम् च कृतिनः।।32।।)

सीता– वत्स! एष स कुसुमितकदम्बताण्डवितबर्हिणः किन्नामधेयो गिरिः? तत्रानुभाव सौभाग्यमात्रपरिशेषसुन्दरश्रीर्मूर्च्छस्त्वया प्ररुदितेनाव–लम्बितस्तरुतले आर्यपुत्रः आलिखितः?[2]

लक्ष्मणः–

सोऽयं शैलः ककुभसुरभिर्माल्यवान्नाम यस्मि–
न्नीलः स्निग्धः श्रयति शिखरं नूतनस्तोयवाहः।
आर्येणास्मिन् ....

रामः– .... **विरम विरमातः परं न क्षमोऽस्मि,**
प्रत्यावृत्तः स पुनरिव मे जानकीविप्रयोगः।।33।।

(**अन्वय–** ककुभ–सुरभिः माल्यवान् नाम अयम् सः शैलः, यस्मिन् नीलः स्निग्धः, नूतनः तोय–वाहः, शिखरम् श्रयति, आर्येण अस्मिन्.... विरम, विरम, अतः परम् न क्षमः अस्मि, मे सः जानकी–विप्रयोगः पुनः प्रत्यावृत्तः इव।।33।।)

लक्ष्मणः– अतः परमार्यस्य तत्रभवतां राक्षसानां चापरिसंख्यान्युत्त–रोत्तराणि कर्माश्चर्याणि। परिश्रान्ता चेयमार्या। तद्विज्ञापयामि 'विश्राम्य–तामि' ति।

सीता– आर्यपुत्र! एतेन चित्रदर्शनेन प्रत्युत्पन्नदोहदाया मम विज्ञापनीयमस्ति।[1]

---

1. एसो सो चिरणिव्वूढजीवलोअपच्चुद्धरणगुरुओवआरी महानु भावो मारुदी।
2. वच्छ! एसो सो कुसुमिदकदम्बाताण्डविअबंहिणो किंणा महेओ गिरि? जत्थ अणुभावसोहग्गमेत्तपरिसेससुन्दरसिरी मुच्छन्दो तुए परुण्णेण ओलम्बिओ तरुअले अज्जउत्तो आलिहिदो ?

लक्ष्मण– ये आर्य हनुमान् हैं।

सीता– ये चिरकाल से किए गए, जीवलोक के प्रत्युपकार से गौरवान्वित महान् उपकारी तथा प्रभावशाली वे पवनपुत्र हनुमान् हैं।

राम– सौभाग्य से ये वे ही विशाल भुजाओं वाले, माता अंजना के आनन्द को बढ़ाने वाले, हनुमान् हैं, जिनके पराक्रम से सभी लोक तथा हम कृतार्थ हुए हैं।।32।।

सीता– वत्स! खिले हुए कदम्ब के वृक्षों पर ताण्डव नृत्य करने वाले, मोरों से युक्त, इस पर्वत का क्या नाम है? जहाँ पर वृक्ष के नीचे अत्यधिक रोते हुए, तुम्हारे द्वारा सम्भाले गए, प्रभाव के सौभाग्यमात्र से अवशिष्ट शोभा से सुन्दर और मूर्च्छित हुए आर्यपुत्र को चित्रित किया गया है।

लक्ष्मण– अर्जुन के पुष्पों से सुगन्धित, यह वही 'माल्यवान्' पर्वत है, जिसकी चोटी पर श्यामल, स्निग्ध और नूतन मेघ विश्राम कर रहा है। आर्य ने इस पर......

राम– बस करो, बस करो, इससे अधिक सुनने व देखने में मैं समर्थ नहीं हूँ। (मुझे तो ऐसा प्रतीत हो रहा है कि) **जानकी का यह विरह फिर से लौट आया हो।।33।।**

लक्ष्मण– इसके पश्चात् आदरणीय आर्य तथा राक्षसों के अगणित तथा उत्तरोत्तर आश्चर्यों से युक्त कार्यों को चित्रित किया गया है। अब आप थक गयी हैं, इसलिए मैं निवेदन करता हूँ कि अब आप विश्राम कीजिए।

सीता– आर्यपुत्र! इस चित्रदर्शन से उत्पन्न हुई दोहदरूप इच्छा के कारण मुझे कुछ निवेदन करना है।

महाकवि स्त्री–मनोविज्ञान से सुपरिचित रहे हैं, क्योंकि कोई भी स्त्री अपने पति के अपने प्रति प्रेम को देखकर अत्यधिक प्रसन्न होती है, यहाँ राम को प्रिया सीता के वियोग में रोते तथा मूर्च्छित होते चित्रित किया है, जिसमें सीता ने पर्वत का नाम पूछने के बहाने अपनी रुचि प्रदर्शित की है।

---

1. अज्जउत्त! एदिणा चित्तदंसणेण पच्चुप्पण्णदोहलाए मए विण्णावणिज्जं अत्थि।

रामः– नन्वाज्ञापय।

सीता– जाने पुनरपि प्रसन्नगम्भीरासु वनराजिषु विहृत्य पवित्र–निर्मलशिशिरसलिलां भगवतीं भागीरथीमवगाहिष्य इति।[1]

रामः– वत्स लक्ष्मण।

लक्ष्मणः– एषोऽस्मि।

रामः– वत्स! 'अचिरादेव संपादनीयो दोहद' इति संप्रत्येव गुरुभिः संदिष्टम् तदस्खलितसंपातं रथमुपस्थापय।

सीता– आर्यपुत्र! युष्माभिरप्यागन्तव्यम्।[2]

रामः– अयि! कठिनहृदये! एतदपि वक्तव्यम् ?

सीता– तेन हि प्रियं मे।[3]

लक्ष्मणः– यदाज्ञापयत्यार्यः। (इति निष्क्रान्तः)

रामः– प्रिये! वातायनोपकण्ठे संविष्टा भव।

सीता– एवं भवतु। अपहृतास्मि परिश्रमनिद्रया।[4]

रामः– तेन हि निरन्तरमवलम्बस्व मामत्र शयनाय।

जीवयन्निव ससाध्वसश्रम–
स्वेदबिन्दुरधिकण्ठमर्प्यताम्।
बाहुरैन्दवमयूखचुम्बित–
स्यन्दिचन्द्रमणिहारविभ्रमः।।34।।

(**अन्वय**– ससाध्वस–श्रम–स्वेद–बिन्दुः, ऐन्दव–मयूख–चुम्बित–स्यन्दि–चन्द्र–मणि–हार–विभ्रमः जीवयन् इव बाहुः अधि–कण्ठम् अर्प्यताम्।।34।।)

(तथा कारयन् सानन्दम्)

प्रिये! किमेतत्?

विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा,
प्रमोहो? निद्रा वा? किमु विषविसर्पः? किमु मदः?

---

1. जाणे पुणोवि पसण्णगम्भीरासु वणराईसु विहरिअ पवित्तणिम्मलसिसिरसलिलं भअवदिं भाईरहिं ओगाहिस्संति।

2. अज्जउत्त? तुह्मेहिं वि आअन्दव्वम्।

3. तेण हि पिअं मे।

4. एव्वं होदु। ओहरिदह्मि परिस्समणिद्दाए।

राम– निश्चय ही, देवी आज्ञा देवें।

सीता– मैं एक बार फिर से प्रसन्न और गहन वन पंक्तियों में विहार करके, पवित्र, निर्मल और शीतल जल वाली गंगा में स्नान करना चाहती हूँ।

राम– वत्स! लक्ष्मण।

लक्ष्मण– यह मैं उपस्थित हूँ।

राम– वत्स! 'गर्भिणी की इच्छा को अविलम्ब पूरा किया जाना चाहिए,' यह अभी–अभी गुरुजनों ने सन्देश भेजा है। इसलिए बिना हिचकोले वाले रथ को उपस्थित करो।

सीता– आर्यपुत्र! आपको भी आना चाहिए।

राम– हे कठोर हृदये! क्या यह भी कहने की बात है?

सीता– तब तो मेरे लिए अत्यन्त प्रिय है।

लक्ष्मण– आर्य जो आज्ञा देते हैं।

(ऐसा कहकर निकल जाता है)

राम– प्रिये! वातायन के पास में बैठ जाओ।

सीता–ऐसा ही करती हूँ। थकान के कारण मैं निद्रा से आकृष्ट हो रही हूँ।

राम– तब तो यहाँ शयन करने के लिए प्रगाढ़रूप से मेरा सहारा ले लो।

घबराहट तथा थकान के कारण, पसीने की बूँदों से युक्त, चन्द्रमा की किरणों के स्पर्श से प्रवाहित होने वाली, चन्द्रकान्त मणियों के हार की शोभा को धारण करने वाले, मुझे जीवन सा प्रदान करने वाले, अपनी इस भुजा को मेरे गले में डाल लो।।34।।

(वैसा करते हुए आनन्दपूर्वक)

प्रिये! यह क्या है?

तुम्हारे प्रत्येक स्पर्श में मेरी सभी इन्द्रियाँ मोहित सी हो रही हैं और कोई विकार मेरी चेतना को कभी भ्रान्त तो कभी प्रकाशित कर रहा है। इसलिए वस्तुतः मैं यह निश्चय नहीं कर पा रहा हूँ कि यह

तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो,
विकारश्चैतन्यं भ्रमयति च सम्मीलयति च।।35।।

(**अन्वय**– तव स्पर्शे स्पर्शे परिमूढ़–इन्द्रिय–गणः विकारः मम चैतन्यम् भ्रमयति, सम्मीलयति च, हि विनिश्चेतुम् न शक्यः सुखम् इति वा, दुःखम् इति वा, प्रमोहः, निद्रा वा, विष–विसर्पः किमु? च मदः किमु? (इति)।।35।।)

सीता– धीरप्रसादा यूयम्, इत इदानीं किमपरम्?[1]

रामः–

म्लानस्य जीवकुसुमस्य विकासनानि,
सन्तर्पणानि सकलेन्द्रियमोहनानि।
एतानि ते सुवचनानि सरोरुहाक्षि!
कर्णामृतानि मनसश्च रसायनानि।।36।।

(**अन्वय**– सरोरुहाक्षि! ते एतानि सुवचनानि म्लानस्य जीव–कुसुमस्य विकासनानि, सन्तर्पणानि सकल–इन्द्रिय–मोहनानि कर्ण–अमृतानि मनसः च रसायनानि।।36।।)

सीता– प्रियंवद! एहि। संविशावः।[2]

(इति शयनाय समन्ततोऽपि निरूपयति)

रामः– अयि! किमन्वेष्टव्यम्?

आविवाहसमयाद् गृहे वने, शैशवे तदनु यौवने पुनः।
स्वापहेतुरनुपाश्रितोऽन्यया, रामबाहुरुपधानमेष ते ।।37।।

(**अन्वय**–आविवाह–समयात् शैशवे गृहे, तद्–अनु पुनः यौवने वने, स्वाप–हेतुः अन्यया अनुपाश्रितः, एषः राम–बाहुः ते उपधानम्।।37।।)

सीता– (निद्रां नाटयन्ती) अस्त्येतत् आर्यपुत्र! अस्त्येतत्।[3]

(इति स्वपिति)

रामः– कथं प्रियवचनैव मे वक्षसि प्रसुप्ता? (निवर्ण्य सस्नेहम्)

इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयो–
रसावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः।
अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः,
किमस्या न प्रेयो? यदि परमसह्यस्तु विरहः।।38।।

---

1. धीरप्पसादा तुह्मेत्ति, इदो दाणि किमवरं!
2. पिअंवद। एहि। संविसह्म।
3. अत्थि एदम्। अज्जउत्त! अत्थि एदम्।

सुख है या दुःख है? मोह है? या विष का प्रभाव है? या फिर कोई मद है?।।35।।

सीता– आप मेरे ऊपर स्थिर अनुग्रह करने वाले हैं, इसलिए आपके इस कथन में क्या आश्चर्य है?

राम– हे कमल के समान नेत्रों वाली! तुम्हारे ये मधुर वचन, मुरझाए हुए जीवनरूपी पुष्प को विकसित तथा पूर्णरूप से तृप्त करने वाले, सभी इन्द्रियों को सम्मोहित करने वाले, कानों के लिए अमृत के समान एवं मन के लिए रसायन के तुल्य हैं।।36।।

सीता– हे मधुरभाषिन्! आइए विश्राम करते हैं।

(ऐसा कहकर शयन करने के लिए चारों ओर देखती है)

राम– अरे! क्या खोज रही हो?

विवाह के समय से लेकर कुमारावस्था में घर में, उसके बाद फिर यौवनकाल में, तदनन्तर वन में शयन का प्रधान उपकरण और अन्य किसी स्त्री द्वारा सेवन न की गयी, राम की यह भुजा ही तुम्हारा तकिया है।।37।।

सीता– (निद्रा का अभिनय करती हुई) ऐसा ही है, आर्यपुत्र! ऐसा ही है।

राम– क्या प्रियभाषिणी मेरे वक्षःस्थल पर ही सो गयी?

(देखकर प्रेमपूर्वक)

यह मेरे घर में लक्ष्मी है, नेत्रों के लिए अमृत की शलाका है, इसका स्पर्श शरीर में घने चन्दनरस का लेप है एवं यह भुजा कण्ठ में शीतल तथा स्निग्ध मोतियों के हार के समान है। अधिक क्या कहा जाए, इसकी कौन सी वस्तु प्रिय नहीं है? (अर्थात् सभी प्रिय हैं,) **किन्तु इसका विरह तो सर्वथा असह्य ही है।।38।।**

महाकवि दाम्पत्य–प्रेम के भी सुन्दर चितेरे हैं। यहाँ पर उनकी इसी काव्य प्रतिभा का प्रदर्शन हुआ है। धर्मपत्नी को घर की लक्ष्मी, नेत्रों के लिए अमृत के समान आनन्द प्रदान करने वाली तथा उसके शरीर के स्पर्श में घने चन्दन रस की मनमोहक एवं वास्तविक कल्पना केवल महाकवि भवभूति ही कर सकते हैं।

(**अन्वय–** इयम् गेहे लक्ष्मीः, इयम् नयनयोः अमृत–वर्तिः, अस्याः असौ स्पर्शः, वपुषि बहुलः चन्दन–रसः, अयम् बाहुः कण्ठे शिशिर–मसृणः मौक्तिक–सरः, अस्याः किम् न प्रेयः? यदि परम् असह्यः तु विरहः।।38।।)

(प्रविश्य)

प्रतीहारी– देव उपस्थितः।[1]

रामः– अयि, कः?

प्रतीहारी– आसन्नपरिचारको देवस्य दुर्मुखः![2]

रामः– (स्वगतम्) शुद्धान्तचारी दुर्मुखः, स मया पौरजानपदेष्वपसर्पः प्रहितः। (प्रकाशम्) आगच्छतु।

(प्रतीहारी निष्क्रान्ता)

दुर्मुखः– (स्वगतम्) हा कथमिदानीं देवीमन्तरेणेदृशमचिन्तनीय जनापवादं देवस्य कथयिष्यामि? अथवा नियोगः खलु मम मन्दभाग–धेयस्यैष।[3]

सीता– (उत्स्वप्नायते) आर्यपुत्र! कुत्रासि?[4]

रामः– सेयमेव रणरणकदायिनी चित्रदर्शनाद्विरहभावना देव्याः स्वप्नोद्योगं करोति। (सस्नेहमंगमस्याः परामृशन्)

अद्वैतं सुखदुःखयोरनुगतं सर्वास्वस्थासु य–
द्विश्रामो हृदयस्य यत्र, जरसा यस्मिन्नहार्यो रसः।
कालेनावरणात्ययात्परिणते यत्प्रेमसारे स्थितं
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्राप्यते[5]।।39।।

(**अन्वय–**यत् सुख–दुःखयोः अद्वैतम्, सर्वासु अवस्थासु अनुगतम्, यत्र हृदयस्य विश्रामः,यस्मिन् रसः जरसा अहार्यः, यत् कालेन आवरण–अत्ययात् परिणते प्रेमसारे स्थितम्, तस्य सुमानुषस्य तत् एकम् भद्रम्, कथम् अपि हि प्राथ्यते।।39।।)

(प्रविश्य)

---

[1]. देवि! उवट्ठिहो।

[2]. आसण्णपरिआरओ देवस्य दुम्महो।

[3]. हा कह दाणिं देवोमन्तरेण ईरिसं अचिन्तणिज्ज जणाववादं देव्वस्स कहइस्सं? अह्वा णिओओ क्खु मह मन्दभअहेअस्स एसो।

[4]. अज्जउत्त! कहिंसि?

[5].पाठभेद– प्रार्थ्यते।

(प्रवेश करके)

प्रतिहारी– महाराज! उपस्थित हो गया।

राम– अरे! कौन? (उपस्थित हो गया)

प्रतिहारी– महाराज का समीपवर्ती सेवक दुर्मुख (उपस्थित हो गया है)

राम– (मन में) दुर्मुख तो अन्तःपुरचारी है। उसे मैंने नगर में तथा पुरों में निवास करने वाले, लोगों में गुप्तचर के रूप में भेजा था। (स्पष्टरूप से) आने दो।

(प्रतिहारी निकल जाती है)

(प्रवेश करके)

दुर्मुख– (मन में) हाय! अब मैं देवी सीता के विषय में, इस प्रकार के अचिन्तनीय लोकापवाद को महाराज से कैसे कहूँगा? अथवा मुझ अभागे का तो यही कर्तव्य है।

सीता– (सीता स्वप्न देखकर बड़बड़ाते हुए) आर्यपुत्र! आप कहाँ हैं?

राम– चित्रदर्शन के कारण उत्पन्न होने वाली, यह वही विरह विषयक भावना देवी को स्वप्न में भी बड़बड़ाहट करवा रही है।

(प्रेमपूर्वक इसके अंगों को छूते हुए)

जो सुख एवं दुःख सभी दशाओं में एक जैसा रहता है, सभी अवस्थाओं में अनुगत है, जिसमें हृदय अद्भुत विश्राम प्राप्त करता है, वृद्धावस्था में भी जिसमें कमी नहीं आती है, तथा जो समय के व्यतीत हो जाने पर संकोचादि के आवरणों के हट जाने से प्रगाढ़ तथा उत्कृष्ट प्रेम में विद्यमान रहता है, इसप्रकार के कल्याणकारी दाम्पत्य–प्रेम की प्राप्ति सौभाग्य से किसी पुण्यवान् को ही होती है।।39।।

(प्रवेश करके)

श्लोक 39– यहाँ भी कवि ने पवित्र दाम्पत्य–प्रेम का चित्र प्रस्तुत किया है, जिसमें भारतीय संस्कृति की गहन छवि को भी देखा जा सकता है। साथ ही, कवि के दाम्पत्य जीवन के विषय में अपने निजी विचारों एवं मान्यताओं को भी तलस्पर्शी अभिव्यक्ति प्राप्त हुई है। वस्तुतः यही दाम्पत्य कल्याणों को देने वाला है।

दुर्मुखः– (उपसृत्य) जयतु देवः।[1]

रामः– ब्रूहि यदुपलब्धम्।

दुर्मुखः– उपस्तुवन्ति देवं पौरजानपदाः, यथा विस्मारिता वयं महाराजदशरथस्य रामदेवेनेति।[2]

रामः– अर्थवाद एवैषः। दोषं तु मे कथंचित्कथय, येन प्रति–विधीयते।

दुर्मुखः– (सास्रम्) शृणोतु महाराजः। (कर्णे) एवमिव। इति।[3]

रामः– अहह, अतितीव्रोऽयं वाग्वज्रः। (अति मूर्च्छति)

दुर्मुखः– आश्वसितु देवः।[4]

रामः– (आश्वस्य)

हा हा धिक्! परगृहवासदूषणं यद्,
वैदेह्याः प्रशमितमद्भुतैरुपायैः।
एतत्तत्पुनरपि दैवदुर्विपाका–
दालर्कं विषमिव सर्वतः प्रसक्तम्।।40।।

(**अन्वय**– हा हा धिक्! वैदेह्याः यत् पर–गृह–वास–दूषणम् अद्भुतैः उपायैः प्रशमितम्, दैव–दुर्विपाकात् तत् एतत् पुनः अपि आलर्कम् विषम् इव सर्वतः प्रसक्तम्।।40।।)

दुर्मुखः– तत्किमद्य मन्दभाग्यः करोमि? (विमृश्य सकरुणम्)
अथवा किमेतत्?

सतां केनापि कार्येण, लोकस्याराधनं व्रतम्[5]।
तत्प्रतीतं[6] हि तातेन, मां च प्राणांश्च मुंचता।।41।।

(**अन्वय**– केन अपि कार्येण लोकस्य आराधनम् सताम् व्रतम्, हि माम् च प्राणान् च मुंचता, तातेन तत् प्रतीतम्।।41।।)

---

1. जेदु देव्वो ।
2. उवट्टुवन्ति देवं पौरजाणपदा, जहा बिसुमरिदा अह्मे महाराअदसर हस्स राम–देव्वेणेत्ति।
3. सुणादु महाराओ। एव्वं विअ।
4. आस्ससदु देव्वो।
5. पाठभेद–व्रतम्।
6. पाठभेद– यत्पूरितम्।

दुर्मुख– (पास जाकर) महाराज की जय हो।

राम– जो भी समाचार प्राप्त किया हो, उसे कहो।

दुर्मुख– नागरिक और पुरवासी जन महाराज की प्रशंसा करते हैं कि राजा राम ने हमारे मन से महाराज दशरथ को भुलवा दिया है।

राम– यह तो प्रशंसा ही है। मेरा कोई दोष हो तो उसे कहो, जिससे उसका प्रतिकार किया जा सके।

दुर्मुख– (अश्रुपूर्वक) महाराज सुनिए (कान में) ऐसा, ऐसा।

राम– ओह! अत्यधिक तीव्र वाणीरूपी यह वज्र तो असह्य है।

दुर्मुख– महाराज! धैर्य धारण कीजिए।

राम– (प्रकृतिस्थ होकर)

हाय, हाय, धिक्कार है, सीता का दूसरे के घर में निवास करने का जो दोष, अग्निशुद्धि जैसे आश्चर्यजनक उपायों द्वारा शान्त कर दिया गया था, दुर्भाग्यवश वही यह दोष फिर से पागल कुत्ते के विष के समान चारों ओर फैल गया है।।40।।

दुर्मुख– तो मैं अभागा अब क्या करूँ?
(विचार करके करुणपूर्वक)

अथवा इससे क्या लाभ?

किसी भी प्रकार से लोकाराधन करना श्रेष्ठ लोगों का कर्तव्य है। मुझे तथा अपने प्राणों को छोड़ते हुए पिताश्री ने उस कर्म को सिद्ध भी कर दिया था।।41।।

उपर्युक्त अंश में राम का राजा के रूप में सुन्दर चरित्र उद्घाटित हुआ है, क्योंकि श्रेष्ठ राजा का कर्तव्य है कि वह अपनी प्रजा के विचारों तथा भावनाओं से अवगत रहे। उसके लिए गुप्तचर को नियुक्त करना पड़ता है।

सीता के विषय में लोकापवाद के फैलने की उपमा के लिए कुत्ते के विष का उपमान भावों की अभिव्यक्ति में अत्यन्त सहायक रहा है। महाकवि के उपमानों की विशेषता है कि वे भावसाम्य के आधार पर भावाभिव्यक्ति में सहायक रहते हैं।

सम्प्रत्येव च भगवता वसिष्ठेन संदिष्टम्।

अपि च–

यत्सावित्रैर्दीपितं भूमिपालै–
र्लोकश्रेष्ठैः साधु चित्रं चरित्रम्।
मत्सम्बन्धात्कश्मला किंवदन्ती
स्याच्चेदस्मिन्हन्त! धिङ्मामधन्यम्।।42।।

(**अन्वय–** लोक–श्रेष्ठैः सावित्रैः भूमि–पालैः यत् चित्रम् चरित्रम् साधु दीपितम्, अस्मिन् मत् सम्बन्धात् कश्मला किंवदन्ती स्यात्, चेत् हन्त! अधन्यम् माम् धिङ्।।42।।)

हा देवि देवयजनसंभवे! हा स्वजन्मानुग्रहपवित्रितवसुन्धरे! हा मुनिजनकनन्दिनि! हा पावकवसिष्ठारुन्धतीप्रशस्तशीलशालिनि! हा राम–मयजीविते! हा महारण्यवासप्रियसखि! हा तातप्रिये! हा स्तोकवादिनि! कथमेवंविधायास्तवायमीदृशः परिणामः?

त्वया जगन्ति पुण्यानि त्वय्यपुण्या जनोक्तयः।
नाथवन्तस्त्वया लोकास्त्वमनाथा विपत्स्यसे।।43।।

(**अन्वय–** त्वया जगन्ति पुण्यानि, त्वयि जन–उक्तयः अपुण्याः, त्वया लोकाः नाथवन्तः, त्वम् अनाथा विपत्स्यसे।।43।।)

(दुर्मुखं प्रति) दुर्मुख! ब्रूहि लक्ष्मणम्। एष नूतनो राजा रामः समाज्ञापयति। (कर्णे) एवमेवम्। इति।

दुर्मुखः– हा, कथमग्निपरिशुद्धायाः, गर्भस्थितपवित्रसंतानायाः देव्या दुर्जनवचनादिदं व्यवसितं देवेन?[1]

रामः– शान्तं पापम् शान्तं पापम्। दुर्जना नाम पौरजानपदाः?

इक्ष्वाकुवंशोऽभिमतः प्रजानां,
जातं च दैवाद्वचनीयबीजम्।
यच्चाद्भुतं कर्म विशुद्धिकाले
प्रत्येतु कस्तद्यदि दूरवृत्तम्।।44।।

---

[1] . हा, कह अग्गिपरिसुद्धाए, गब्भट्ठिदपवित्तसंताणाए, देवीए दुज्जनवअणादौ एदं ववसिदं देवेण?

और अभी भगवान् वसिष्ठ ने सन्देश भी दिया है।

और भी,

संसार में श्रेष्ठ सूर्यवंशी राजाओं ने जिस आश्चर्यजनक चरित्र को अनेक प्रकार से प्रकाशित किया, यदि उस चरित्र में मेरे कारण निन्दनीय अपवाद लग जाता है, तो मुझ भाग्यहीन को धिक्कार है।।42।।

हाय, यज्ञभूमि से उत्पन्न होने वाली! हाय, अपने जन्म रूपी अनुग्रह से संसार को पवित्र करने वाली! हाय, मुनितुल्य जनक को आनन्द प्रदान करने वाली! हाय, अग्नि, वसिष्ठ एवं अरुन्धती द्वारा प्रशंसा किए गए चरित्र वाली! हाय, राममय जीवन से सम्पन्न! हाय, बड़े–बड़े विशाल जंगलों में निवास की प्रिय सखि! हाय, पिताजी को प्रिय लगने वाली! हाय, मितभाषिणि! हे देवि! इसप्रकार के गुणों से सम्पन्न होने पर भी तुम्हारा ऐसा परिणाम भला कैसे हुआ?

तुमसे तो यह सम्पूर्ण संसार पवित्र है एवं तुम्हारे विषय में लोगों की इसप्रकार की अपवित्र उक्तियाँ हैं। तुमसे तो यह संसार सनाथ है और तुम अनाथ होकर मर रही हो।।43।।

(दुर्मुख के प्रति) दुर्मुख! तुम लक्ष्मण से कहो कि यह नया राजा राम यह आज्ञा दे रहा है (कान में) ऐसा, ऐसा।

दुर्मुख– हाय, क्या अग्नि की परीक्षा से पूर्णरूप से शुद्ध की गयी, गर्भ में पवित्र सन्तान को धारण करने वाली, देवी सीता के लिए दुर्जनों द्वारा कहे गए वचनों से ही महाराज ने ऐसा निश्चय कर लिया?

राम– पाप शान्त हो, पाप शान्त हो। क्या नगरों एवं जनपदों में रहने वाले लोग दुर्जन हैं?

इक्ष्वाकु वंश प्रजाओं में हमेशा ही प्रिय रहा है, किन्तु दुर्भाग्य वश उसमें निन्दा का एक कारण उत्पन्न हो गया है और अग्नि–विशुद्धि के समय जो अद्भुत कार्य हुआ था, दूर होने के कारण उसका भला कौन विश्वास कर सकता है?।।44।।

(**अन्वय–** इक्ष्वाकु–वंशः प्रजानाम् अभिमतः दैवात् वचनीय– बीजम् च जातम्, विशुद्धि–काले यत् च अद्भुतम् कर्म, तत् यदि दूर–वृत्तम् कः प्रत्येतु? ।।44।।)

तद्गच्छ।

दुर्मुखः– हा देवि! (इति निष्क्रान्तः)

रामः– हा कष्टम्! अतिबीभत्सकर्मा नृशंसोऽस्मि संवृत्तः।

शैशवात्प्रभृति पोषितां प्रियां, सौहृदादपृथगाश्रयामिमाम्।
छद्मना परिददामि मृत्यवे, शौनिको गृहशकुन्तिकामिव ।45

(**अन्वय–** शैशवात् प्रभृति पोषिताम् सौहृदात् अपृथक्–आश्रयाम् इमाम् प्रियाम् शौनिकः गृह–शकुन्तिकाम् इव छद्मना मृत्यवे परि–ददामि ।।45।।)

तत्किमस्पृश्यः पातकी देवीं दूषयामि?

(इति सीतायाः शिरः सुसमुन्नमय्य बाहुमाकृष्य)

अपूर्वकर्मचाण्डालमयि मुग्धे! विमुंच माम्।
श्रितासि चन्दनभ्रान्त्या, दुर्विपाकं विषद्रुमम्।।46।।

(**अन्वय–** अयि मुग्धे! अपूर्व–कर्म–चाण्डालम् माम् विमुंच, चन्दन–भ्रान्त्या, दुर्विपाकम् विष–द्रुमम् श्रिता असि।।46।।)

(उत्थाय) हन्त हन्त, संप्रति विपर्यस्तो जीवलोकः। अद्यावसितं जीवितप्रयोजनं रामस्य। शून्यमधुना जीर्णारण्यं जगत्। असारः संसारः। काष्ठप्रायं शरीरम्। अशरणोऽस्मि। किं करोमि ? का गतिः?

अथवा–

दुःखसंवेदनायैव, रामे चैतन्यमागतम्।
मर्मोपघातिभिः प्राणैर्वज्रकीलायितं हृदि।।47।।

(**अन्वय–** दुःख–संवेदनाय एव रामे चैतन्यम् आगतम्, मर्म– उप–घातिभिः प्राणैः हृदि वज्र–कीलायितम्।।47।।)

हा अम्ब अरुन्धति! भगवन्तौ वसिष्ठविश्वामित्रौ! भगवन् पावक! हा देवि भूतधात्रि! हा तातजनक! हा मातः!हा प्रियसखे महाराज सुग्रीव! सौम्य हनूमन्! महोपकारिन् लंकाधिपते विभीषण! हा सखि त्रिजटे! परिमुषिताः स्थ परिभूताः स्थ रामहतकेन!

अथवा को नाम तेषामहमिदानीमाह्वाने?

इसलिए तुम जाओ।

दुर्मुख– हाय, देवि! (ऐसा कहकर निकल जाता है)

राम– हाय! कष्ट है। मैं अत्यधिक घृणित कर्म करने वाला, नृशंस हो गया हूँ,

बचपन से पाली गयी, प्रेम के कारण बिछुड़कर न रहने वाली, इस प्रिया सीता को, कसाई (शौनिक) **द्वारा घर में पाली गयी चिड़िया के समान, मैं छलपूर्वक मृत्यु के लिए दे रहा हूँ।।45।।**

तो फिर अस्पृश्य पापी मैं देवी को छूकर दूषित कर रहा हूँ?

(ऐसा कहकर सीता के सिर को धीरे से ऊपर उठाकर और बाहु को खींचकर)

अरी, भोलीभाली सीते! निन्दित (अपूर्व) **कर्म करने के कारण मुझ चाण्डाल को छोड़ो, क्योंकि चन्दन के धोखे में तुम भयंकर परिणाम वाले, विष–वृक्ष का आश्रय ग्रहण कर रही हो।।46।।**

(उठकर) हाय, हाय, अब तो संसार बदल गया है। आज राम के जीवन का प्रयोजन समाप्त हो गया। मेरे लिए इस समय सम्पूर्ण जीवलोक जंगल के समान शून्य हो गया है। संसार निःसार प्रतीत हो रहा है। शरीर लकड़ी के समान चेतनाशून्य हो रहा है। मैं तो अशरण हो गया हूँ। क्या करूँ? क्या उपाय है?

अथवा

दुःखों का अनुभव करने के लिए ही राम का जन्म हुआ है। मर्मस्थल पर प्रहार करने वाले प्राण इससमय हृदय में गड़ी हुई वज्र की कील के समान प्रतीत हो रहे हैं।।47।।

हाय, माता अरुन्धति! पूजनीय वसिष्ठ और विश्वामित्र! भगवान् अग्निदेव! हाय, देवि वसुन्धरे! हाय, पिता जनक! हाय माते! हाय, परम मित्र महाराज सुग्रीव! सौम्य हनुमान्! महान् उपकार करने वाले, लंकाधिपति विभीषण! हाय, सखि त्रिजटे! आप सभी लोग पापी राम द्वारा वंचित और तिरस्कृत हो गए हो।

अथवा उन महानुभावों का आह्वान करने का भी मुझे क्या अधिकार है?

ते हि मन्ये महात्मनः, कृतघ्नेन दुरात्मना।
मया गृहीतनामानः, स्पृश्यन्त इव पाप्मना।।48।।

(**अन्वय**– हि मन्ये, कृतघ्नेन दुरात्मना मया गृहीत–नामानः ते महात्मनः पाप्मना स्पृश्यन्ते इव।।48।।)

योऽहम्–

विस्रम्भादुरसि निपत्य जातनिद्रा–
मुन्मुच्य प्रियगृहिणीं गृहस्य लक्ष्मीम्।
आतंकस्फुरितकठोरगर्भगुर्वी,
क्रव्याद्भ्यो बलिमिव दारुणः क्षिपामि।।49।।

(**अन्वय**– विस्रम्भात् उरसि निपत्य जात–निद्राम् आतंक–स्फुरित–कठोर–गर्भ–गुर्वीम्, गृहस्य लक्ष्मीम्, प्रिय–गृहिणीम्, दारुणः उन्मुच्य क्रव्याद्भ्यः बलिम् इव क्षिपामि।।49।।)

(सीतायाः पादौ शिरसि कृत्वा) अयं पश्चिमस्ते रामशिरसि पादपंकजं स्पर्शः (इति रोदिति)

(नेपथ्ये)

अब्रह्मण्यम्, अब्रह्मण्यम्!

रामः– ज्ञायतां भोः! किमेतत्?

(पुनर्नेपथ्ये)

ऋषीणामुग्रतपसां, यमुनातीरवासिनाम्।
लवणत्रासितः स्तोमस्त्रातारं त्वामुपस्थितः।।50।।

(**अन्वय**–यमुना–तीर–वासिनाम् उग्र–तपसाम्, ऋषीणाम् स्तोमः लवण–त्रासितः (सन्) त्रातारम् त्वाम् उपस्थितः।।50।।)

रामः– कथमद्यापि राक्षसत्रासः? तद्यावदस्य दुरात्मनो माधुरस्य कुम्भीनसीकुमारस्योन्मूलनाय शत्रुघ्नं प्रेषयामि। (परिक्रम्य पुनर्निवृत्य) हा देवि! कथमेवविधा गमिष्यसि? भगवति वसुन्धरे! सुश्लाघ्यां दुहितरम–वेक्षस्व जानकीम्–

जनकानां रघूणां च यत्कृत्स्नं गोत्रमंगलम्।
यां देवयजने पुण्ये, पुण्यशीलामजीजनः।।51।।

मुझे तो ऐसा प्रतीत हो रहा है कि मानो वे महानुभाव मुझ कृतघ्न और पापी द्वारा नाम ग्रहण किए जाने से पापों से युक्त हो रहे हैं।।48।।

जो मैं,

अत्यन्त विश्वासपूर्वक वक्षःस्थल पर लेटकर सोयी हुई, चित्र–दर्शन से उत्पन्न उद्वेग के कारण कम्पित एवं कठोर गर्भ के बोझ से युक्त, घर की लक्ष्मी, प्रिय गृहिणी इस सीता को अत्यधिक कठोर होते हुआ मैं, परित्याग करके, मांसाहारी हिंसक जन्तुओं में भक्ष्य पदार्थ (बलि) **के समान, फैंक रहा हूँ।।49।।**

(सीता के चरणों को सिर पर रखकर)

राम के सिर में तुम्हारे चरण–कमलों का यह अन्तिम स्पर्श है।

(इसप्रकार कहकर रोने लगते हैं)

(नेपथ्य में)

बुरा हुआ, बुरा हुआ।

राम– अरे! पता करो, यह क्या है?

(फिर से नेपथ्य में)

यमुना के तट पर निवास करने वाले, उग्र तप करने वाले, ऋषियों का समूह 'लवण' नामक राक्षस से भयभीत होकर, रक्षा करने वाले, आपके पास आया है।।50।।

राम– क्या अब भी राक्षसों का भय है? तो जबतक कुम्भीनसी के पुत्र दुष्ट मधुरेश्वर लवण को विनष्ट करने के लिए मैं शत्रुघ्न को भेजता हूँ। (घूमकर तथा फिर से लौटकर) हे भगवति वसुन्धरे! अपनी प्रशंसनीय पुत्री जानकी का ध्यान रखिएगा।

जनक वंश एवं रघुवंश, इन दोनों ही वंशों के सभीप्रकार के मंगलों की जो प्रतीक है, पुण्यशालिनी जिसको आपने यज्ञ के पवित्र स्थान में उत्पन्न किया था।।51।।

नाटक के नायक राम का उज्ज्वल चरित्र एवं सीता के प्रति पवित्र एवं गहन प्रेम तथा आन्तरिक वेदना की सुन्दर अभिव्यक्ति हुई है।

(अन्वय– जनकानाम् रघूणाम् च यत् कृत्स्नम् गोत्र–मंगलम्, पुण्य–शीलाम् याम् पुण्ये देव–यजने अजीजनः ।।51।।)

(इति रुदन्निष्क्रान्तः)

सीता– हा सौम्य आर्यपुत्र! कुत्रासि? (इति सहसोत्थाय) हा धिक्? हा धिक्? दुःस्वप्नरणरणकविप्रलब्धा आर्यपुत्रशून्यमिवात्मानं पश्यामि।

(विलोक्य)

हा धिक्! हा धिक्! एकाकिनीं प्रसूतां मामुज्झित्वा कुत्र गतो नाथः? भवतु। अस्मै कोपिष्यामि, यदि तं प्रेक्षमाणां आत्मनः प्रभविष्यामि। कोऽत्र परिजनः?[1]

(प्रविश्य)

दुर्मुखः–देवि! कुमारलक्ष्मणो विज्ञापयति– 'सज्जो रथः। तदारोहतु देवी' इति।[2]

सीतां– इयमारूढास्मि। (उत्थाय परिक्रम्य) स्फुरति मे गर्भभारः। शनैर्गच्छामः।[3]

दुर्मुखः– इत इतो देवी।[4]

सीता– नमो रघुकुलदेवताभ्यः।[5]

(इति निष्क्रान्ताः सर्वे)

।। इति महाकविभवभूतिविरचिते 'उत्तररामचरिते' 'चित्रदर्शनो' नाम प्रथमोऽङ्कः ।।

---

1. हा सोह्म अज्जउत्त! कहिंसि? हद्धी हद्धी। दुस्सिविणरणरणअविप्पलद्धा अज्जउत्तसुण्णं विअ अत्ताणं पेक्खामि। हद्धी हद्धी। एआइणिं पसुत्तं म उज्झिअ कहिं गदो णाहो? होदु। से कुप्पिसं, जइ तं पेक्खन्ती अत्तणो पहविस्सं। को एत्थ परिअणो?
2. देवि? कुमारलक्खणो विण्णवेदि– 'सज्जो रहो। तं आरुहदु देवी'त्ति।
3. इअं आरुढह्मि। फुरई मे गब्भभारो। सणिअं गच्छह्म।
4. इदो इदो देवी!
5. णमो रहुउलदेवदाणं

(इसप्रकार कहकर रोते हुए निकल जाते हैं)

सीता– हाय, सौम्य आर्यपुत्र! आप कहाँ हैं? (ऐसा कहकर सहसा उठकर) हाय, हाय, इस विरहमूलक दुःस्वप्न की घबराहट के कारण खिन्न सी हुई मैं अपने आपको, आर्यपुत्र से विरहित देख रही हूँ।

(देखकर)

हाय, धिक्कार है, हाय, धिक्कार है। मुझ अकेली सोती हुई को छोड़कर प्राणनाथ कहाँ चले गए हैं? ठीक है, यदि उन्हें देखकर मैं स्वयं पर नियन्त्रण रख सकी तो उन पर क्रोध (मान) करूँगी। अरे! यहाँ कौन सेवक है?

(प्रवेश करके)

दुर्मुख– देवि! कुमार लक्ष्मण निवेदन करते हैं कि–'रथ तैयार है, इसलिए आप आरोहण कीजिए।'

सीता– यह मैं चढ़ रही हूँ। (उठकर और घूमकर) मेरे गर्भ का भार हिल रहा है, इसलिए धीरे–धीरे चलो।

दुर्मुख– महारानी! इधर से, इधर से।

सीता– रघुकुल के देवताओं को मेरा प्रणाम है।

(ऐसा कहकर सभी निकल जाते हैं)

।। इसप्रकार महाकवि भवभूति विरचित उत्तररामचरित में 'चित्रदर्शन' नामक प्रथम अंक का डॉ. राकेश शास्त्री, बाँसवाड़ा **द्वारा किया हुआ हिन्दी अनुवाद पूर्ण हुआ।।**

।। श्रीः ।।

द्वितीयोऽङ्कः

(नेपथ्ये)

स्वागतं तपोधनायाः!

(ततः प्रविशत्यध्वगवेषा तापसी)

तापसी– अये! वनदेवता फलकुसुमगर्भेण पल्लवार्घ्येण दूरान्मामु–पतिष्ठते!

(प्रविश्य)

वनदेवता– (अर्घ्यं विकीर्य)

यथेच्छाभोग्यं वो वनमिदमयं मे सुदिवसः,
सतां सद्भिः संगः कथमपि हि पुण्येन भवति।
तरुच्छाया तोयं यदपि तपसां योग्यमशनं
फलं वा मूलं वा तदपि न पराधीनमिह वः।।1।।

(**अन्वय–** इदम् वनम् वः यथा–इच्छा–भोग्यम्, अयम् मे सुदिवसः, हि सताम् सद्भिः संगः कथम् अपि पुण्येन भवति। तरुच्छाया, तोयम् यत् अपि तपसाम् योग्यम्, अशनम्, फलम् वा, मूलम् वा, तत् अपि इह वः पराधीनम् न (अस्ति)।।1।।)

तापसी– किमत्रोच्यते?

प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः,
प्रकृत्या कल्याणी मतिरनवगीतः परिचयः।
पुरो वा पश्चाद्वा तदिदमविपर्यासितरसं,
रहस्यं साधूनामनुपधिविशुद्धं विजयते।।2।।

(**अन्वय–** साधूनाम् वृत्तिः प्रिय–प्रायाः, वाचि विनय–मधुरः नियमः, मतिः प्रकृत्या कल्याणी, परिचयः अनवगीतः, तत् इदम् पुरः वा, पश्चात् वा, अविपर्यासित–रसम्, अनुपधि–विशुद्धम् रहस्यम् विजयते।।2।।)

(उपविशतः)

द्वितीय अङ्क

(नेपथ्य में)

तपस्विनी का स्वागत है।

(उसके बाद, पथिक वेष में तापसी प्रवेश करती है)

तापसी– अरे! वनदेवी फल और पुष्पों के साथ पल्लवों से बनाए गए, अर्घ्य द्वारा दूर से ही, मेरी पूजा कर रही है।

(प्रवेश करके)

वनदेवता–(अर्घ्य बिखेरकर)

यह वन आपके लिए इच्छा के अनुसार भोगने योग्य है, आज का दिन मेरे लिए अत्यन्त शुभ है, वस्तुतः सज्जन लोगों का साथ पुण्यों से ही होता है। वृक्षों की छाया, जल और जो भी तपस्या के लिए उपयुक्त भोजन, फल–मूल आदि हैं, वे सभी आपके लिए यहाँ पराधीन नहीं हैं।।1।।

तापसी– इस विषय में क्या कहना है?

सज्जनों का व्यवहार, अत्यन्त प्रीति को उत्पन्न करने वाला होता है, उनकी वाणी में मृदुता और संयम विद्यमान रहता है, उनकी बुद्धि स्वभाव से मंगल एवं कल्याणों को देने वाली होती है तथा परिचय अभिनन्दन के योग्य होता है। इसप्रकार वे यह प्रत्यक्ष या परोक्ष जो कुछ भी कहते हैं, वह सब प्रेम का उल्लंघन न करने वाला, निश्छल और पवित्र होता है, इसलिए उनका चरित्र सर्वोत्कृष्ट है।।2।।

(दोनों बैठती हैं)

कां पुनरत्रभवतीमवगच्छामि?

वनदेवता– कां पुनरत्रभवतीमवगच्छामि?

तापसी– आत्रेय्यस्मि।

वनदेवता– आर्ये आत्रेयि! कुतः पुनरिहागम्यते? किं प्रयोजनो दण्डकारण्योपवनप्रचारः?

आत्रेयी–

अस्मिन्नगस्त्यप्रमुखाः प्रदेशे, भूयांस उद्गीथविदो वसन्ति।

तेभ्योऽधिगन्तुं निगमान्तविद्यां, वाल्मीकिपार्श्वादिह पर्यटामि।3

(अन्वय– अस्मिन् प्रदेशे अगस्त्य–प्रमुखाः भूयांसः उद्गीथ–विदः वसन्ति, तेभ्यः निगमान्त–विद्याम् अधिगन्तुम्, वाल्मीकि–पार्श्वात् इह पर्यटामि।3।।)

वनदेवता– यदा तवादन्येऽपि मुनयस्तमेव हि पुराणब्रह्मवादिनं प्राचेतसमृषिं ब्रह्मपारायणायोपासते, तत्कोऽयमार्याया प्रवासः?

आत्रेयी– तस्मिन् हि महानध्ययनप्रत्यूह इत्येष दीर्घप्रवासो–ऽङ्गीकृतः।

वनदेवता– कीदृशः?

आत्रेयी– तत्रभगवतः केनापि देवताविशेषेण सर्वप्रकाराद्भुतं स्तन्यत्यागमात्रके वयसि वर्तमानं दारकद्वयमुपनीतम्। तत्खलु न केवलं तस्य, अपितु तिरश्चामप्यन्तःकरणानि तत्त्वान्युपस्नेहयति।

वनदेवता– अपि तयोर्नामसंज्ञानमस्ति?

आत्रेयी– तयैव किल देवतया तयोः कुशलवाविति नामनी च प्रभावश्चाख्यातः।

वनदेवता– कीदृशः प्रभावः?

आत्रेयी– तयोः किल सरहस्यानि जृम्भकास्त्राणि जन्मसिद्धानीति।

वनदेवता– अहो नु भोश्चित्रमेतत्।

आत्रेयी– तौ च भगवता वाल्मीकिना धात्रीकर्मतः परिगृह्य पोषितौ रक्षितौ च। निवृत्तचौलकर्मणोस्तयोस्त्रयीवर्जमितरास्तिस्रो विद्याः सावधानेन परिनिष्ठापिताः तदनन्तरं भगवतैकादशे वर्षे क्षात्रेण कल्पेनोपनीय त्रयीविद्यामध्यापितौ। न त्वेताभ्यामतिदीप्तप्रज्ञाभ्यामस्मदादेः सहाध्ययन–योगोऽस्ति। यतः–

वनदेवता– समादरणीया आपको मैं कौन समझूँ?

तापसी– मैं आत्रेयी हूँ।

वनदेवता– आर्ये! आत्रेयी, अभी आप कहाँ से आ रही हैं? और दण्डकारण्य में घूमने का आपका क्या प्रयोजन है?

आत्रेयी– इस प्रदेश में अगस्त्य आदि अनेक ब्रह्मवेत्ता ऋषि रहते हैं। उनसे वेदविद्या को प्राप्त करने के लिए, मैं वाल्मीकि के आश्रम से (आकर) **इधर घूम रही हूँ।।3।।**

वनदेवता– जबकि दूसरे मुनिगण भी वेदों के अध्ययन के लिए उन्हीं ब्रह्मज्ञानी वाल्मीकि की सेवा करते हैं, तो फिर आर्या का यह प्रवास क्यों है?

आत्रेयी– क्योंकि वहाँ पर अध्ययन में महान् विघ्न उपस्थित हो गया है, इसीलिए मैंने इस लम्बे प्रवास को स्वीकार किया है।

वनदेवता– कैसा विघ्न?

आत्रेयी– उन भगवान् वाल्मीकि को किसी देवता ने सभी प्रकार से अद्भुत और दुधमुहे बच्चों के युगल को लाकर दिया है और वे दोनों बच्चे न केवल उनके, अपितु पशु–पक्षियों के अन्तःकरणों में भी स्नेह उत्पन्न कर देते हैं।

वनदेवता– क्या आप उन दोनों के नाम जानती हैं?

आत्रेयी– निश्चय ही, उन्हीं देवता ने उन दोनों के 'कुश' तथा 'लव' यह नाम तथा प्रभाव कहा है।

वनदेवता– कैसा प्रभाव?

आत्रेयी– यह कि उन दोनों को वस्तुतः रहस्यों के साथ **जृम्भ–कास्त्र** जन्म से ही सिद्ध हैं।

वनदेवता– अहो! तब तो बड़े आश्चर्य की बात है।

आत्रेयी– भगवान् वाल्मीकि ने धात्री–कर्म से लेकर, उनका सभी प्रकार से पालन–पोषण किया है और मुण्डन–संस्कार होने के बाद, वेद को छोड़कर शेष सभी तीनों विद्याओं का सावधानी के साथ उन्हें अध्ययन कराया। तत्पश्चात् समादरणीय उन्होंने ग्यारहवें वर्ष में क्षत्रियों की विधि से यज्ञोपवीत–संस्कार करके, वेदों को भी पढ़ाया है। अत्यधिक प्रतिभावान् इन दोनों के साथ, हम जैसों का अध्ययन करना सम्भव नहीं है, क्योंकि–

वितरति गुरुः प्राज्ञे विद्यां तथैव यथा जड़े,
न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा।
भवति हि पुनर्भूयान् भेदः फलं प्रति तद्यथा,
प्रभवति शुचिर्बिम्बग्राहे मणिर्न मृदादयः।।4।।

(**अन्वय–** गुरुः यथा प्राज्ञे तथा एव जड़े विद्याम् वितरति, तयोः ज्ञाने शक्तिम् न तु करोति न वा अपहन्ति खलु, फलम् प्रति पुनः भूयान् भेदः भवति, तत् यथा शुचिः मणिः बिम्ब–ग्राहे प्रभवति, न हि मृदा आदयः।।4।।)

वनदेवता– अयमध्ययनप्रत्यूहः?

आत्रेयी– अन्यश्च।

वनदेवता– अथापरः कः?

आत्रेयी– अथ स ब्रह्मर्षिरेकदा माध्यन्दिनसवनाय नदीं तमसा–मनुप्रपन्नः। तत्र युग्मचारिणोः क्रौंचयोरेकं व्याधेन वध्यमानं ददर्श। आकस्मिकप्रत्यवभासां वाचमनुष्टुभेन छन्दसा परिणतामभ्युदैरयत्।

मा निषाद! प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौंचमिथुनादेकमवधीः काममोहितम्।।5।।

(**अन्वय–** निषाद! त्वम् शाश्वतीः समाः प्रतिष्ठाम् मा अगमः, यत् क्रौंच–मिथुनात् काम–मोहितम् एकम् अवधीः।।5।।)

वनदेवता– चित्रम्। आम्नायादन्यत्र नूतनश्छन्दसामवतारः।

आत्रेयी– तेन हि पुनः समयेन तं भगवन्तमाविर्भूतशब्दब्रह्मप्रकाश–मृषिमुपसंगम्य भगवान् भूतभावनः पद्मयोनिरवोचत– 'ऋषे! प्रबुद्धोऽसि वागात्मनि ब्रह्मणि। तद् ब्रूहि रामचरितम् अव्याहतज्योतिरार्षं ते चक्षुः प्रतिभातु। आद्यः कविरसि' इत्युक्त्वान्तर्वर्हितः। अथ स भगवान् प्राचेतसः प्रथमं मनुष्येषु शब्दब्रह्मणस्तादृशं विवर्तमितिहासं रामायणं प्रणिनाय।

वनदेवता– हन्त तर्हि पण्डितः संसारः।

आत्रेयी– तस्मादेव हि ब्रवीमि 'तत्र महानध्ययनप्रत्यूह' इति।

गुरु जिसप्रकार बुद्धिमान् विद्यार्थी को विद्या प्रदान करता है, उसीप्रकार मन्दबुद्धि छात्र को भी देता है। वह दोनों के ज्ञान में न तो अपनी शक्ति को बढ़ाता है और न ही कम करता है। ऐसा होने पर फल के प्रति अत्यधिक अन्तर आ जाता है। ठीक उसीप्रकार जैसे निर्मल मणि ही प्रतिबिम्ब को ग्रहण करने में समर्थ होती है, मिट्टी आदि नहीं।।4।।

वनदेवता– तो अध्ययन में यह विघ्न है।

आत्रेयी– और भी है।

वनदेवता– वह दूसरा कौन सा है?

आत्रेयी– इसके बाद, एक दिन वे ब्रह्मर्षि वाल्मीकि मध्याह्न स्नान के लिए तमसा नदी पर गए और वहाँ पर उन्होंने साथ–साथ विचरण करने वाले, दो क्रौंच पक्षियों में से एक को व्याध द्वारा मारे जाते हुए देखा, तब उन्होंने सहसा आविर्भूत **अनुष्टुप्** छन्द में बद्ध वाणी का उच्चारण किया–

हे निषाद! तू शाश्वत वर्ष पर्यन्त स्थिति (शान्ति) **को प्राप्त मत कर, क्योंकि तूने इस क्रौंच–युगल में से, काम से मोहित एक को मार डाला है।।5।।**

वनदेवता– आश्चर्य है, यह तो वेद के अतिरिक्त लोक में भी छन्द का आविर्भाव हो गया है।

आत्रेयी– इसलिए जिन्हें शब्दप्रकाश का आविर्भाव हो गया था, इसप्रकार के महर्षि वाल्मीकि के पास जाकर, सम्पूर्ण संसार की उत्पत्ति करने वाले, भगवान् ब्रह्मा जी ने कहा– 'हे ऋषि! तुम शब्दरूप ब्रह्म में प्रबुद्ध हो गए हो, इसलिए राम के चरित का वर्णन करो। अप्रतिहत प्रकाश वाला आर्षज्ञान तुममें प्रकाशित हो गया है, तुम **आदिकवि** हो।'

ऐसा कहकर वे अन्तर्धान हो गए। तत्पश्चात् भगवान् वाल्मीकि ने मनुष्यों में सर्वप्रथम शब्द–ब्रह्म के समान, 'विवर्त' रूप रामायण नामक इतिहास का प्रणयन किया।

वनदेवता– प्रसन्नता का विषय है, तब तो सारा संसार पण्डित हो जाएगा।

आत्रेयी– इसीलिए तो मैं कह रही हूँ कि वहाँ पर अध्ययन में बड़ा विघ्न है।

वनदेवता– युज्यते।

आत्रेयी– विश्रान्तास्मि भद्रे! संप्रत्यगस्त्याश्रमस्य पन्थानं ब्रूहि।

वनदेवता– इतः पंचवटीमनुप्रविश्य गम्यतामनेन गोदावरीतीरेण।

आत्रेयी– (सास्रम्) अत्येतत्तपोवनम्? अप्येषा पंचवटी? अपि सरिदियं गोदावरी? अप्ययं गिरिः प्रस्रवणः? जनस्थानवनदेवता त्वं वासन्ती?

वनदेवता– तथैव तत्सर्वम्!

आत्रेयी– हा वत्से जानकि!

स एष ते वल्लभबन्धुवर्गः, प्रासंगिकीनां विषयः कथानाम्।
त्वां नामशेषामपि दृश्यमानः, प्रत्यक्षदृष्टामिव नः करोति।।6।।

(**अन्वय**– प्रासंगिकीनाम् कथानाम् विषयः दृश्यमानः, सः एषः ते वल्लभ–बन्धु–वर्गः, नाम–शेषाम् त्वाम् नः अपि प्रत्यक्ष–दृष्टाम् इव करोति।।6।।)

वासन्ती– (सभयम्, स्वगतम्) कथं नामशेषेत्याह? (प्रकाशम्) किमत्याहितं सीतादेव्याः?

आत्रेयी– न केवलमत्याहितम, सापवादमपि। (कर्णे) एवमिति।

वासन्ती– अहह! दारुणो दैवनिर्घातः (इति मूर्च्छति)

आत्रेयी– भद्रे! समाश्वसिहि समाश्वसिहि।

वासन्ती– हा प्रियसखि! ईदृशस्ते निर्माणभागः? हा रामभद्र! अथवा अलं त्वया। आर्ये आत्रेयि! अथ तस्मादरण्यात्परित्यज्य निवृत्ते लक्ष्मणे सीताया किं वृत्तमिति काचिदस्ति प्रवृत्तिः?

आत्रेयी– नहि नहि।

वासन्ती– कष्टम्। आर्यारुन्धतीवसिष्ठाधिष्ठितेषु न कुलेषु, जीवन्तीषु च वृद्धासु राज्ञीसु कथमिदं जातम्।

आत्रेयी– ऋष्यशृंगसत्रे गुरुजनस्तदाऽऽसीत्। सम्प्रति परिसमाप्तं द्वादशवार्षिकं सूत्रम्। ऋष्यशृंगेण च संपूज्य विसर्जिता गुरवः। ततो भगवत्यरुन्धती 'नाहं वधूविरहितामयोध्यां गच्छामि' इत्याह । तदेव

वनदेवता– तब तो ठीक ही है।

आत्रेयी– मैं विश्राम कर चुकी हूँ। आर्ये! अगस्त्य ऋषि के आश्रम का मार्ग बताओ।

वनदेवता– यहाँ से पंचवटी में प्रवेश करके, गोदावरी के किनारे–किनारे चली जाइए।

आत्रेयी– (अश्रुपूर्वक) क्या यह वही तपोवन है? क्या यह वही पंचवटी है? क्या यह वही गोदावरी नदी है? क्या यह वही **प्रस्रवण** पर्वत है? क्या तुम जनस्थान के वन की देवी वासन्ती हो?

वनदेवता– यह सब कुछ वही है।

आत्रेयी– हा पुत्रि! जानकी।

प्रसंग से आयी हुई कथाओं के विषय दिखायी देते हुए, वे ये सभी तुम्हारे बन्धु लोग, नाममात्र से शेष तुम्हें, हमारे लिए प्रत्यक्ष के समान कर रहे हैं।।6।।

वासन्ती– (भयपूर्वक मन में) आपने 'नामशेष' ऐसा क्यों कहा? (प्रकट में) सीता देवी का क्या अनर्थ हो गया?

आत्रेयी– केवल अनर्थ ही नहीं, अपितु लोकापवाद भी है। (कान में) ऐसा, ऐसा।

वासन्ती– हाय, यह तो दुर्दैव का भयंकर आघात है।

(ऐसा कहकर मूर्च्छित हो जाती है)

आत्रेयी– कल्याणि! धैर्य धारण करो, धैर्य धारण करो।

वासन्ती– हाय, प्रियसखि! तुम्हारी सृष्टि का ऐसा परिणाम हुआ? हा राम! अथवा तुम्हें कहने से क्या लाभ? आत्रेत्रि! इसके बाद, उस अरण्य में सीता को छोड़कर लक्ष्मण के लौट जाने पर, सीता का क्या हुआ, क्या इस विषय में कुछ ज्ञात है?

आत्रेयी– नहीं, कुछ भी पता नहीं है।

वासन्ती– कष्ट है। आर्या अरुन्धती एवं वसिष्ठ से अधिष्ठित हमारे रघुकुल में वृद्ध महारानियों के जीवित रहते हुए भी, भला यह कैसे हो गया?

आत्रेयी– उस समय सभी गुरुजन ऋष्यशृंग के यज्ञ में थे और बारह वर्षों में समाप्त होने वाला यह यज्ञ अब पूर्णरूप से समाप्त हो गया है तथा ऋष्यशृंग ने पूजा करके, सभी गुरुजनों को विदा कर

राममातृभिरनुमोदितम्। तदनुरोधाद्भगवतो वसिष्ठस्यापि श्रद्धा 'वाल्मीकि–वनं गत्वा वत्स्याम' इति।

वासन्ती– अथ स रामभद्रः किमाचरः?

आत्रेयी– तेन राज्ञा राजक्रतुरश्वमेधः प्रक्रान्तः।

वासन्ती– अहह धिक्! परिणीतमपि?

आत्रेयी– शान्तम्, नहि नहि।

वासन्ती– का तर्हि यज्ञे सहधर्मचारिणी?

आत्रेयी– हिरण्यमयी सीताप्रकृतिर्गृहिणीकृता।

वासन्ती– हन्तः भोः।

वज्रादपि कठोराणि, मृदूनि कुसुमादपि।
लोकोत्तराणां चेतांसि, को नु विज्ञातुमर्हति।।7।।

(अन्वय– लोकोत्तराणाम् चेतांसि, कः नु विज्ञातुम् अर्हति? वज्रात् अपि कठोराणि, कुसुमात् अपि मृदूनि (भवन्ति)।।7।।)

आत्रेयी– विसृष्टश्च वामदेवानुमन्त्रितो मेध्याश्वः। प्रक्लृप्ताश्च तस्य यथाशास्त्रं रक्षितारः। तेषामधिष्ठाता लक्ष्मणात्मजश्चन्द्रकेतुर्दत्त दिव्यास्त्र–सम्प्रदायश्चुतरंगसाधनान्वितोऽनुप्रहितः।

वासन्ती– (सहर्षकौतुकास्रम्) कुमारलक्ष्मणस्यापि पुत्र इति मातः! जीवामि।

आत्रेयी– अत्रान्तरे ब्राह्मणेन मृतं पुत्रमुक्षिप्य राजद्वारे सोरस्ताडम ब्रह्मण्यमुद्घोषितम्। ततो 'न राजापचारमन्तरेण प्रजानामकालमृत्युः संचरतीत्यात्मदोषं निरूपयति करुणामये रामभद्रे सहसैवाशरीरिणी वागुदचरत्–

शम्बूको नाम वृषलः, पृथिव्यां तप्यते तपः।
शीर्षच्छेद्यः स ते राम! तं हत्वा जीवय द्विजम्।।8।।

(अन्वय– शम्बूकः नाम वृषलः, पृथिव्याम् तपः तप्यते, राम! सः ते शीर्ष–च्छेद्यः, तम् हत्वा द्विजम् जीवय।।8।।)

दिया है। तब भगवती अरुन्धती ने, 'मैं वधू सीता से रहित अयोध्या में नहीं जाऊँगी,' ऐसा कहा एवं कौशल्या आदि राम की माताओं ने भी इसका समर्थन किया। उनके आग्रह से भगवान् वसिष्ठ को भी यह इच्छा हुई कि– 'वाल्मीकि के आश्रम में जाकर निवास किया जाए।'

वासन्ती– आजकल वे राम क्या कर रहे हैं?

आत्रेयी– उस राजा ने अब **अश्वमेध यज्ञ** आरम्भ किया है।

वासन्ती– अहो, धिक्कार है, विवाह भी कर लिया?

आत्रेयी– (पाप) शान्त हो! नहीं, नहीं।

वासन्ती– तो फिर यज्ञ में सहधर्मिणी कौन है?

आत्रेयी– स्वर्णनिर्मित सीता की मूर्ति को ही सहधर्मिणी बनाया है।

वासन्ती– आश्चर्य है,

लोकोत्तर महापुरुषों के चरित को भला कौन समझ सकता है? जो वज्र से भी कठोर एवं पुष्प से भी कोमल होते हैं।।7।।

आत्रेयी– उन्होंने **वामदेव ऋषि** द्वारा अभिमन्त्रित यज्ञ का घोड़ा छोड़ा है तथा शास्त्रोक्त विधि से उसके रक्षकों को भी नियुक्त किया है। साथ ही, उन रक्षकों के अध्यक्ष के रूप में लक्ष्मण पुत्र 'चन्द्रकेतु' को दिव्यास्त्र प्रदान करके, चतुरंगिणी सेना के साथ पीछे–पीछे भेजा है।

वासन्ती– (हर्ष, कौतूहल एवं अश्रुपूर्वक) कुमार लक्ष्मण का भी पुत्र है, यह जानकर तो हे माँ! मैं जीवित ही हो गयी हूँ।

आत्रेयी– इसी बीच किसी ब्राह्मण ने अपने मृतपुत्र को राज–दरबार में रखकर, छाती को पीटते हुए, 'ब्राह्मणों को महान् भय है' इस प्रकार उद्घोषणा की। तब 'राजा के अनाचार के अभाव में प्रजाओं में अकाल मृत्यु नहीं होती है,' इसप्रकार करुणामय श्रीराम द्वारा अपने दोषों की विवेचना करने पर, सहसा ही अशरीरिणी वाणी ने कहा कि–

शम्बूक नाम का शूद्र पृथिवी पर तपस्या कर रहा है। हे राम! वह आपके द्वारा शिरःछेद के योग्य है। इसलिए उसे मारकर तुम ब्राह्मण बालक को जीवित करो।।8।।

इत्युपश्रुत्य कृपाणपाणिः पुष्पकमधिरुह्य सर्वा दिशो विदिशश्च शूद्रतापसान्वेषणाय जगत्पतिः संचारं समारब्धवान्।

वासन्ती– शम्बूको नामाधोमुखी धूमपः शूद्रोऽस्मिन्नेव जनस्थाने तपश्चरति। अपि नाम रामभद्रः पुनरिदं वनमलङ्कुर्यात्?

आत्रेयी– भद्रे! गम्यतेऽधुना।

वासन्ती– आर्ये आत्रेयी! एवमस्तु। कठोरश्च दिवसः! तथाहि–

कण्डूलद्विपगण्डपिण्डकषणोत्कम्पेन सम्पातिभि–
र्घर्मस्रंसितबन्धनैश्च कुसुमैरर्चन्ति गोदावरीम्।
छायापस्किरमाणविष्किरमुखव्याकृष्टकीटत्वचः–
कूजत्क्लान्तकपोतकुक्कुटकुलाः कूले कुलायद्रुमाः।।9।।

(**अन्वय–** कूले छाया–अपस्किरमाण–विष्किर–मुख–व्याकृष्ट–कीट–त्वचः, कूजत्–क्लान्त–कपोत–कुक्कुट–कुलाः कुलाय द्रुमाः, कण्डूल–द्विप–गण्ड–पिण्ड–कषण–उत्कम्पेन सम्पातिभिः, घर्म–स्रंसित–बन्धनैः च कुसुमैः गोदावरीम् अर्चन्ति।।9।।)

(इति परिक्रम्य निष्क्रान्ते)

इति शुद्धविष्कम्भकः

(ततः प्रविशति सदयोद्यतखड्गो रामभद्रः)

रामः–

रे हस्त! दक्षिण! मृतस्य शिशोर्द्विजस्य,
जीवातवे विसृज शूद्रमुनौ कृपाणम्।
रामस्य बाहुरसि, निर्भरगर्भखिन्न–
सीताविवासनपटोः करुणा कुतस्ते?।।10।।

(**अन्वय–** रे दक्षिण! हस्त! द्विजस्य, मृतस्य शिशोः जीवातवे, शूद्र–मुनौ कृपाणम् विसृज, निर्भर–गर्भ–खिन्नः सीता–विवासन–पटोः रामस्य बाहुः असि, ते करुणा कुतः ?।।10।।)

(कथंचित्प्रहृत्य) कृतं रामसदृशं कर्म। अपि जीवेत्स ब्राह्मणपुत्रः!

(प्रविश्य)

दिव्यपुरुषः– जयतु देवः,

ऐसा सुनकर, हाथ में तलवार धारण करके, पुष्पक विमान पर आरूढ़ होकर, जगत्पति राम ने शूद्र तपस्वी को ढूँढ़ने के लिए, सभी दिशाओं तथा उपदिशाओं में घूमना आरम्भ कर दिया है।

वासन्ती– अधोमुख होकर, धूम पीने वाला, शम्बूक नामक शूद्र तो इसी जनस्थान में तप कर रहा है, तो क्या श्रीराम फिर से इस वन को सुशोभित करेंगे?

आत्रेयी– हे कल्याणि! अब मैं चलती हूँ।

वासन्ती– आर्ये आत्रेयि! ऐसा ही हो। दिन भी प्रखर धूप वाला हो गया है, क्योंकि–

गोदावरी के तट पर छाया में चोंच से भूमि को कुरेदने वाले, पक्षियों के मुख से, जिनके कीड़ों को खींच लिया गया है, ऐसी छाल से युक्त, कूजन करते हुए एवं थके हुए कबूतर और वन के मुर्गों के समूह से युक्त, पक्षियों के घोंसलों वाले वृक्ष, हाथियों के खुजलाने के लिए, गण्डस्थल के रगड़ने से हिलने के कारण टूटकर गिरते हुए, धूप के कारण मुरझाने से ढ़ीले हुए बन्धनों वाले, पुष्पों से गोदावरी की पूजा कर रहे हैं।।9।।

(ऐसा कहकर, घूमकर निकल जाती हैं)

।।इसप्रकार शुद्ध विष्कम्भक पूर्ण हुआ।।

(उसके बाद करुणापूर्वक हाथ में तलवार लेकर राम प्रवेश करते हैं)

राम– हे दक्षिण हस्त! **ब्राह्मण के मरे हुए बालक को जिलाने के लिए, शूद्र मुनि पर तलवार को छोड़ो, क्योंकि तुम तो परिपूर्ण गर्भ से खिन्न, सीता का परित्याग करने में निपुण, राम की भुजा हो, इसलिए तुममें भला करुणा कहाँ सम्भव है?।।10।।**

(किसीप्रकार प्रहार करके) मैंने राम के समान कार्य कर दिया है। क्या वह ब्राह्मणपुत्र जीवित हो गया होगा?

(प्रवेश करके)

दिव्यपुरुष– महाराज की जय हो,

दत्ताभये त्वयि यमादपि दण्डधारे,
संजीवितः शिशुरसौ मम चेयमृद्धिः।
शम्बूक एष शिरसा चरणौ नतस्ते,
सत्संगजानि निधनान्यपि तारयन्ति।।11।।

(**अन्वय**—यमात् अपि दत्त—अभये त्वयि दण्डधारे, असौ शिशुः संजीवितः, मम च इयम् ऋद्धिः, एषः शम्बूकः ते चरणौ शिरसा नतः, सत्संगजानि निधनानि अपि तारयन्ति।।11।।)

रामः— द्वयमपि प्रियं नः, तदनुभूयतामुग्रस्य तपसः परिपाकः।

यत्रानन्दाश्च मोदाश्च, यत्र पुण्याश्च सम्पदः।
वैराजा नाम ते लोकास्तैजसाः सन्तु ते शिवाः।।12।।

(**अन्वय**— यत्र आनन्दाः च, मोदाः च, यत्र पुण्याः च सम्पदः, वैराजाः नाम तैजसाः ते लोकाः, ते शिवाः सन्तु ।।12।।)

शम्बूकः— स्वामिन्! युष्मत्प्रसादादेवैषा महिमा। किमत्र , तपसा? अथवा महदुपकृतं तपसा।

अन्वेष्टव्यो यदसि भुवने लोकनाथः शरण्यो,
मामन्विष्यन्निह वृषलकं योजनानां शतानि।
क्रान्त्वा प्राप्तः स इह तपसां संप्रसादोऽन्यथा तु,
क्वायोध्यायाः पुनरुपगमो दण्डकायां वने वः।।13।।

(**अन्वय**— भुवने अन्वेष्टव्यः लोक—नाथः शरण्यः, (त्वम्) यत् माम् वृषलकम् अन्विष्यन् योजनानाम् शतानि क्रान्त्वा इह प्राप्तः असि, इह सः तपसाम् संप्रसादः अन्यथा तु वः अयोध्यायाः दण्डकायाम् वने क्व पुनः उपगमः।।13।।)

रामः— किं नाम दण्डकेयम्? (सर्वताऽवलोक्य) हा, कथम्—

स्निग्धश्यामाः क्वचिदपरतो भीषणाभोगरूक्षाः,
स्थाने—स्थाने मुखरककुभो झाङ्कृतैर्निर्झराणाम्।
एते तीर्थाश्रमगिरिसरिद्गर्तकान्तारमिश्राः,
संदृश्यन्ते परिचितभुवो दण्डकारण्यभागाः।।14।।

यमराज से भी अभयदान प्राप्त करके, आपके दण्ड धारण करने पर वह ब्राह्मण बालक जीवित हो गया है तथा मेरी यह समृद्धि हुई है। यह शम्बूक आपके श्रीचरणों में सिर झुकाकर प्रणाम करता है। सत्संग से उत्पन्न होने वाले, मरण भी (प्राणियों का) **उद्धार करने वाले होते हैं।।11।।**

राम— हमें तो ये दोनों ही प्रिय हैं। इसलिए तुम तो उग्र तपस्या के फल को भोगो।

जहाँ पर आनन्द और मोद दोनों ही विद्यमान हैं और जहाँ पवित्र विभूतियाँ विराजमान हैं। इसप्रकार के 'वैराज' नामक लोक तुम्हारे लिए मंगलमय होवें।।12।।

शम्बूक— हे स्वामिन्! आपकी कृपा से ही मेरी यह महिमा है, इसमें तपस्या ने क्या किया? अथवा तप का ही तो महान् उपकार है,

संसार में खोजने योग्य लोक के स्वामी तथा शरण प्रदान करने वाले आप, जो मुझ कुत्सित शूद्र का अन्वेषण करते हुए, सैंकड़ों योजनों को पार करके, यहाँ पधारे हैं। यह सब तप का ही तो अनुग्रह है, नहीं तो अयोध्या से दण्डक वन में फिर से आगमन भला कैसे हो पाता?।।13।।

राम— क्या यह दण्डकारण्य है? (सब ओर देखकर) हाय, कैसे?

कहीं (हरीभरी घास से) **स्निग्ध और श्याम, कहीं भयंकर** (उबड़ खाबड़) **दृश्यों से रूखे, स्थान—स्थान पर झरनों के कल—कल निनाद से मुखरित दिशाओं वाले, तीर्थ, आश्रम, पर्वत, नदी, गड्ढ़ों एवं घने वनों से मिश्रित तथा परिचित भूभाग वाले, ये दण्डकारण्य के भाग दिखायी पड़ रहे हैं।।14।।**

वैराज नामक उच्च लोकों की महिमा का कथन किया गया है।

पर्वतीय प्रदेशों के स्वाभाविक एवं सूक्ष्म वर्णन से महाकवि का वन विषयक गहन ज्ञान अभिव्यक्त हुआ है। इससे ऐसा भी प्रतीत होता है कि उन्होंने स्वयं गहन वनों में स्थित तीर्थ, आश्रम, पर्वत, नदियों का भ्रमण किया था।

(**अन्वय**— क्वचित् स्निग्ध–श्यामाः अपरतः भीषण–आभोग–रूक्षाः, स्थाने–स्थाने निर्झराणाम् झाङ्कृतैः मुखर–ककुभः, तीर्थ–आश्रम–गिरि–सरिद्–गर्त–कान्तार–मिश्राः, परिचित–भुवः एते दण्डक–अरण्य–भागाः संदृश्यन्ते ।।14।।)

शम्बूकः— दण्डकैवेषा। अत्र किल पूर्वं निवसता देवेन—

चतुर्दश सहस्राणि चतुर्दश च राक्षसाः।
त्रयश्च दूषणखरत्रिमूर्धानो नो रणे हताः।।15।।

(**अन्वय**— चतुर्दश–सहस्राणि, चतुर्दश च राक्षसाः, त्रयः च दूषण–खर–त्रिमूर्धानः रणे नो हताः।।15।।)

येन सिद्धक्षेत्रेऽस्मिन्मादृशामपि जानपदानामकुतोभ्यः संचारः संवृत्तः।

रामः— न केवलं दण्डकैव, जनस्थानमपि।

शम्बूकः— बाढम्, एतानि खलु सर्वभूतरोमहर्षणान्युन्मत्तचण्डश्वापदाकुलाक्रान्तविकटगिरिगह्वराणि, जनस्थानपर्यन्तदीर्घारण्यानि दक्षिणां दिशमभिवर्तन्ते। तथाहि—

निष्कूजस्तिमिताः क्वचित्क्वचिदपि प्रोच्चण्डसत्त्वस्वनाः,
स्वेच्छासुप्तगभीरभोगभुजगश्वासप्रदीप्ताग्नयः।
सीमानः प्रदरोदरेषु विरलस्वल्पाम्भसो यास्वयं,
तृष्यद्भिः प्रतिसूर्यकैरजगरस्वेदद्रवः पीयते।।16।।

(**अन्वय**— क्वचित् निष्कूज–स्तिमिताः, क्वचित् अपि प्रोच्चण्ड–सत्त्व–स्वनाः, स्वेच्छा–सुप्त–गभीर–भोग–भुजग–श्वास–प्रदीप्त–अग्नयः, प्रदर–उदरेषु विरल–स्वल्प–अम्भसः सीमानः, यासु तृष्यद्भिः प्रतिसूर्यकैः अयम् अजगर–स्वेद–द्रवः पीयते।।16।।)

रामः—

पश्यामि च जनस्थानं, भूतपूर्वखरालयम्।
प्रत्यक्षानिव वृत्तान्तान्, पूर्वाननुभवामि च ।।17।।

(**अन्वय**— भूतपूर्व–खर–आलयम् च जनस्थानम् पश्यामि, पूर्वान् वृत्तान्तान्, च प्रत्यक्षान् इव अनुभवामि ।।17।।)

(सर्वतोऽवलोक्य) प्रियारामा हि वैदेह्यासीत्। एतानि नाम कान्ताराणि। किमतः परं भयानकं स्यात्? (सास्रम्)

त्वया सह निवत्स्यामि, वनेषु मधुगन्धिषु।
इतीवरमतेहासौ, स्नेहस्तस्याः स तादृशः।।18।।

शम्बूक— यह दण्डकारण्य ही है। निश्चय ही, यहाँ पर पूर्व में निवास करते हुए, महाराज ने—

चौदह हजार, चौदह राक्षस तथा दूषण, खर और त्रिमूर्धा इन तीनों को युद्ध में मारा था।।15।।

राम— यह केवल दण्डकारण्य ही नहीं, अपितु जनस्थान भी हैं।

शम्बूक— जी हाँ। ये सभी प्राणियों के रोंगटे खड़े कर देने वाले, मदोन्मत्त एवं प्रचण्ड हिंसक जन्तुओं के समूह से भरा हुआ, पर्वत की गुफाओं से युक्त, जनस्थान तक फैले हुए, विस्तृत वन, दक्षिण दिशा तक फैले हुए हैं, क्योंकि—

कहीं पर निस्तब्धता छायी हुई है तथा कहीं पर हिंसक प्राणियों का घोर गर्जन सुनाई पड़ रहा है। कहीं पर स्वेच्छा से सोए हुए, विशाल शरीर वाले, साँपों की फुंकारों से प्रज्वलित अग्नि से युक्त, गड्ढों के मध्य पड़े हुए थोड़े से पानी वाले सीमान्त भाग हैं, जहाँ पर प्यासे गिरगिट, अजगर के पसीने को पी रहे हैं।।16।।

राम—

खर के भूतपूर्व निवास स्थान, जनस्थान को मैं देख रहा हूँ तथा पहले के वृत्तान्तों को प्रत्यक्ष के समान अनुभव भी कर रहा हूँ।।17।।

(चारों ओर देखकर) वैदेही को उपवन प्रिय थे। ये ही वे महावन हैं। इससे अधिक भयानक भला क्या हो सकता है? (अश्रुपूर्वक)

'मैं आपके साथ पुष्परसों की गन्धों से युक्त, वनों में निवास करूँगी' इसीकारण उसका मन यहाँ पर लगता था। अहो, उसका उसप्रकार का वह अनुराग (वस्तुतः प्रशंसनीय है)?।।18।।

महाकवि भवभूति के प्रकृति–चित्रण की विशेषता रही है कि वे प्रकृति के कोमल पक्ष के साथ–साथ, इसके कठोर पक्ष का भी उसी तन्मयता से वर्णन करते हैं, जो उन्हें दूसरे कवियों से सर्वथा भिन्न एवं उत्कृष्ट बनाती है। भयानक प्रकृति के उपर्युक्त प्रकृति चित्रण इस कथ्य की पुष्टि कर रहे हैं, जहाँ हिंसक जन्तुओं के भयंकर गर्जन, विशाल सर्प, अजगर तथा गिरगिट आदि का वर्णन किया गया है। इसी अंक में आगे प्रयुक्त उदाहरण भी दर्शनीय हैं।

(अन्वय– त्वया सह मधु–गन्धिषु वनेषु निवत्स्यामि, इति इव अरमत, इह असौ, तस्याः तादृशः सः स्नेहः (आसीत्)।।18।।)

न किंचिदपि कुर्वाणः, सौख्यैर्दुःखान्यपोहति।
तत्तस्य किमपि द्रव्यं, यो हि यस्य प्रियो जनः।।19।।

(अन्वय– यः हि यस्य प्रियः जनः, तत् तस्य किम् अपि द्रव्यम्, किंचित् अपि कुर्वाणः न (सः) सौख्यैः दुःखानि अपोहति ।।19।।)

शम्बूकः– तदलमेभिर्दुरासदैः। अथैतानि मदकलमयूरकण्ठकोमलच्छविभिरवकीर्णानि पर्यन्तैरविरलनिविष्टनीलबहुलच्छायातरुषण्डमण्डितान्यसंभ्रान्तविविधमृगयूथानि पश्यतु महाभागः प्रशान्तगम्भीराणि श्वापदकुलशरण्यानि महारण्यानि।

इह समदशकुन्ताक्रान्तवानीरमुक्त–
प्रसवसुरभिशीतस्वच्छतोया वहन्ति।
फलभरपरिणामश्यामजम्बूनिकुंज–
स्खलनमुखरभूरिस्रोतसो निर्झरिण्यः।।20।।

(अन्वय– इह समद–शकुन्त–आक्रान्त–वानीर–मुक्त–प्रसव–सुरभि–शीत–स्वच्छ–तोयाः, फल–भर–परिणाम–श्याम–जम्बू–निकुंज–स्खलन–मुखर–भूरि–स्रोतसः निर्झरिण्यः वहन्ति ।।20।।)

अपि च–

दधति कुहरभाजामत्र भल्लूकयूना–
मनुरसितगुरूणिः स्त्यानमम्बूकृतानि।
शिशिरकटुकषायः स्त्यायते शल्लकीना–
मिभदलितविकीर्णग्रन्थिनिष्यन्दगन्धः।।21।।

(अन्वय– अत्र कुहर–भाजाम् भल्लूक–यूनाम् अनुरसित–गुरूणिः अम्बू–कृतानि स्त्यानम् दधति, शल्लकीनाम् शिशिर–कटु–कषायः इभ–दलित–विकीर्ण–ग्रन्थि–निष्यन्द–गन्धः स्त्यायते ।।21।।)

रामः– (सबाष्पस्तम्भम्) भद्र! शिवास्ते पन्थानो देवयानाः। प्रलीयस्व पुण्येभ्यो लोकेभ्यः।

शम्बूकः– यावत्पुराणब्रह्मर्षिम् अगस्त्यमभिवाद्य शाश्वतं पदमनुप्रविशामि।

(इति निष्क्रान्तः)

जो जिसका प्रिय जन होता है, वह उसके लिए कुछ अद्भुत ही द्रव्य पदार्थ है, जो कुछ न करता हुआ भी, सुखों द्वारा उसके दुःखों को दूर कर देता है।।19।।

शम्बूक– तो इन दुर्गम वनों को रहने दीजिए। इसके बाद महान् प्रभावशाली आप, मद से मधुर शब्द करने वाले, मयूरों के कण्ठों के समान, स्निग्ध कान्ति से युक्त, समीपस्थ प्रदेशों से व्याप्त, सघनता से खड़े हुए, नीली शोभा से सम्पन्न, छायादार वृक्षों के समूहों से सुशोभित, निर्भीक होकर विचरण करने वाले, अनेक प्रकार के मृगों के झुण्डों से युक्त, शान्त, गम्भीर एवं हिंसक पशुओं के शरणस्थान इन महान् वनों को देखिए।

यहाँ पर मदयुक्त पक्षियों द्वारा सेवा किए जाते हुए, वेतस से घिरे हुए, पुष्पों से सुगन्धित, शीतल तथा निर्मल जल से युक्त, फलों के समूह के पकने से श्यामल जामुन के फलों के वृक्षों के कुँजों से गिरने से, शब्दायमान अनेक प्रवाहों वाली नदियाँ बह रही हैं।।20।।

और भी,

इस महावन में पर्वतों की गुफाओं में निवास करने वाले, युवा भालुओं का थूकने का शब्द, प्रतिध्वनित होकर और भी अधिक बढ़ गया है और यहाँ पर हाथियों द्वारा मर्दन की गयी, इधर–उधर फैलायी हुई 'सल्लकी' लताओं की गाँठों के रस का शीतल, तीक्ष्ण एवं कसैला गन्ध फैल रहा है।। 21।।

राम– (अश्रुपूर्वक गद्‌गद स्वर में) सौम्य! देवयान नामक मार्ग तुम्हारे लिए मंगलकारी होवें। पुण्य लोकों में जाने के लिए तुम तैयार हो जाओ।

शम्बूक– जब तक मैं पुरातन ब्रह्मर्षि अगस्त्य को प्रणाम करके, सनातन ब्रह्मलोक में प्रवेश करता हूँ।

(ऐसा कहकर निकल जाता है)

रामः–

एतत्पुनर्वनमहो कथमद्य दृष्टं
यस्मिन्नभूम चिरमेव पुरा वसन्तः।
आरण्यकाश्च गृहिणश्च रताः स्वधर्मे,
सांसारिकेषु च सुखेषु वयं रसज्ञाः।।22।।

(**अन्वय–** अहो अद्य एतत् वनम् पुनः कथम् दृष्टम्? यस्मिन् पुरा चिरम् एव वसन्तः, आरण्यकाः च गृहिणः वयम् स्व–धर्मे रताः, सांसारिकेषु च सुखेषु रसज्ञाः च अभूम।।22।।)

एते त एव गिरयो विरुवन्मयूरा
स्तान्येव मत्तहरिणानि वनस्थलानि।
अ.ंजुवंजुललतानि च तान्यमूनि,
नीरन्ध्रनीपनिचुलानि सरित्तटानि।।23।।

(**अन्वय–** विरुवत्–मयूराः एते ते एव गिरयः, मत्त–हरिणानि तानि एव वन–स्थलानि, आ–मंजु–वंजुल–लतानि च नीरन्ध्र–नीप–निचुलानि, तानि अमूनि सरित्–तटानि।।23।।)

मेघमालेव यश्चायमारादिव विभाव्यते।
गिरिः प्रस्रवणः सोऽयमत्र गोदावरी नदी।।24।।

(**अन्वय–** मेघ–माला इव यः च अयम् आरात् इव विभाव्यते, सः अयम् प्रस्रवणः गिरिः, अत्र गोदावरी नदी।।24।।)

अस्यैवासीन्महति शिखरे गृध्रराजस्य वास–
स्तस्याधस्ताद्वयमपि रतास्तेषु पर्णोटजेषु।
गोदावर्याः पयसि विततानोकहश्यामलश्री–
रन्तः कूजन्मुखरशकुनो यत्र रम्यो वनान्तः।।25।।

(**अन्वय–** अस्य एव महति शिखरे गृध्रराजस्य वासः आसीत्, तस्य अधस्तात् वयम् अपि तेषु पर्ण–उटजेषु रताः, यत्र गोदावर्याः पयसि वितत–अनोकह–श्यामल–श्रीः मुखर–शकुनः अन्तःकूजन् रम्यः वनान्तः (अस्ति)।।25।।

अत्रैव सा पंचवटी, यत्र निवासेन विविधविस्रम्भातिप्रसंगाक्षिणः प्रदेशाः प्रियायाः प्रियसखी च वासन्ती नाम वनदेवता। किमिदमापतितमद्य रामस्य?

सम्प्रति हि–

राम–

अहो, आज इस वन को हमने भला क्यों देखा? जहाँ पर पूर्व में लम्बे समय तक निवास करते हुए, हम लोग वानप्रस्थ एवं गृहस्थ के अपने धर्म में लगे हुए, सांसारिक सुखों का अनुभव करने वाले हुए थे।।22।।

मोरों के केकारव से युक्त, ये वे ही पर्वत हैं और मत्त हरिणों वाले, ये वे ही वनों के स्थल हैं तथा अत्यन्त सुन्दर प्रतीत होने वाले, वेंत की लताओं, सघन कदम्ब और 'हिज्जल' (निचुल) **नाम के वृक्षों से युक्त, सरिताओं के ये वे ही तट प्रदेश हैं,** (जहाँ हम आनन्दपूर्वक दिनों को बिताते थे)।।**23**।।

(उमड़ती हुई) **मेघमाला के समान, जो अत्यधिक पास में ही खड़ा हुआ दिखायी दे रहा है, वह यह 'प्रस्रवण' नाम का पर्वत है तथा यह गोदावरी नदी है।।24।।**

इसी प्रस्रवण पर्वत के ऊँचे शिखर पर गृध्रराज जटायु का निवास स्थान था। उसी के नीचे हम लोग पर्णकुटी बनाकर, आनन्द–पूर्वक निवास करते थे, जहाँ पर गोदावरी के जलों में वृक्षों की छाया पड़ने से नीली कान्ति वाला, अन्दर कूजन करने वाले पक्षियों से युक्त, अत्यधिक रमणीय वन–प्रान्त है।।25।।

यहीं पर वह पंचवटी है, जहाँ पर निवास करते समय, अनेक प्रदेश हमारे विश्वस्त विलासों के साक्षी हैं तथा यहीं पर प्रियतमा सीता की 'वासन्ती' नाम की वनदेवी प्रिय सखी थी। आज अत्यधिक दुःखी राम पर यह कैसी विपत्ति आ पड़ी,

क्योंकि इस समय,

महाकवि प्रकृति वर्णन में इतना अधिक खो गए हैं कि उन्होंने प्रस्तुत कृति के नाटक होने को ही विस्मृत कर दिया है, किन्तु नायक राम की पूर्व में अनुभूत स्मृतियों को उजागर करना भी अनिवार्य था, यहाँ उन्होंने इसी का चयन किया है। सीता के वियोग से दुःखी राम का जनस्थान में आने पर, सीता के साथ आनन्द–पूर्वक व्यतीत किए गए, पलों की स्मृति करके पीड़ित होना स्वाभाविक है। महाकवि के उत्कृष्ट मनोवैज्ञानिक होने की पुष्टि हो रही है।

चिराद्वेगारम्भी प्रसृत इव तीव्रो विषरसः,
कुतश्चित्संवेगात्प्रचल इव शल्यस्य शकलः।
व्रणो रूढग्रन्थिः स्फुटित इव हृन्मर्मणि पुनः,
पराभूतः शोको विकलयति मां नूतन इव।।26।।

(**अन्वय–** चिरात् वेगारम्भी प्रसृतः तीव्रः विष–रसः इव, कुतश्चित् संवेगात् प्रचलः शल्यस्य शकलः इव, रूढ–ग्रन्थिः स्फुटितः हृद्–मर्मणि व्रणः इव, पराभूतः शोकः नूतनः इव पुनः माम् विकलयति ।।26।।)

तथाविधानपि तावत्पूर्वसुहृदो भूमिभागान् पश्यामि। (निरूप्य) अहो! अनवस्थितो भूतसन्निवेशः। तथाहि–

पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां
विपर्यास यातो घनविरलभावः क्षितिरुहाम्।
बहो दृष्टं कालादपरमिव मन्ये वनमिदं,
निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति।।27।।

(**अन्वय–** यत्र पुरा सरिताम् स्रोतः, तत्र अधुना पुलिनम्, क्षिति–रुहाम् घन–विरल–भावः विपर्यासः यातः, बहोः कालात् दृष्टम्, इदम् वनम् अपरम् इव मन्ये, शैलानाम् निवेशः 'तत् इदम् इति' बुद्धिम् द्रढयति।।27।)

हन्त, हन्त। परिहरन्तमपि मां पंचवटी स्नेहाद् बलादाकर्षतीव।

(सकरुणम्)

यस्यां ते दिवसास्तया सह मया नीता यथा स्वे गृहे,
यत्सम्बन्धिकथाभिरेव सततं दीर्घाभिरास्थीयत।
एकः सम्प्रति नाशितप्रियतमस्तामेव रामः कथं,
पापः पंचवटी विलोकयतु वा गच्छत्वसम्भाव्य वा।।28।।

(**अन्वय–** यस्याम् तया सह मया ते दिवसाः स्वे गृहे यथा नीताः, सततम् दीर्घाभिः यत् सम्बन्धि–कथाभिः एव आस्थीयत, सम्प्रति नाशित–प्रियतमः एकः ताम् एव पापः रामः, पंचवटी कथम् विलोकयतु? वा असम्भाव्य वा गच्छतु ।।28।।)

(प्रविश्य)

शम्बूकः– जयतु देवः। भगवानगस्त्यो मत्तः श्रुतसन्निधानस्त्वामाह–परिकल्पितावरणमंगला प्रतीक्षते वत्सला लोपामुद्रा, सर्वे महर्षयः। तदेहि।

चिरकाल के बाद, वेदना के आवेग को उत्पन्न करने वाली, सर्वत्र फैले हुए तीव्र विष के रस के समान, कहीं से अत्यधिक वेगपूर्वक चले हुए बाण के अग्रभाग के समान, उत्पन्न हो गयी है गाँठ जिसमें, ऐसे तथा हृदय के मर्मस्थलों में फूटे हुए फोड़े के समान, पुरातन शोक, नया सा होकर, मुझे फिर से व्याकुल कर रहा है।।26।।

(शोक के) उसप्रकार से उत्पन्न होते हुए भी, मैं तो इन भागों को अपने पुराने मित्र के समान देख रहा हूँ। (देखकर) अहो, पदार्थों की स्थिति अत्यधिक अस्थिर हो गयी है, क्योंकि–

जहाँ पहले नदियों का प्रवाह था, इस समय वहाँ पर तट विद्यमान है। वृक्षों की सघनता और विरलता का भाव भी बदल गया है। बहुत समय के अन्तराल के बाद देखा गया, यह वन मुझे दूसरे वन के समान प्रतीत हो रहा है, किन्तु पर्वतों की स्थिति 'यह वही वन है,' इस बुद्धि को दृढ़ कर रही है।।27।।

हाय, हाय, इस स्थान को छोड़ते हुए भी पंचवटी,स्नेह के कारण मुझे मानो बलपूर्वक खींच रही है।

(करुणापूर्वक)

जिस पंचवटी में मैंने उस सीता के साथ, उन सुखमय दिनों को, अपने घर के समान व्यतीत किया था, जिस पंचवटी से सम्बन्धित बड़ी–बड़ी कथाओं को निरन्तर करते हुए ही हम, अयोध्या में स्थित रहते थे। इस समय प्रिया को विनष्ट करने वाला, अकेला पापी राम, उसी पंचवटी को भला कैसे देख सकता है? अथवा उसका अनादर करके यहाँ से कैसे चला जाए?।।28।।

(प्रवेश करके)

शम्बूक– महाराज की जय हो। मुझसे आपके आने का समाचार सुनकर, भगवान् अगस्त्य ने आपसे कहा है कि– 'पूजा की सामग्री को सजाकर, वात्सल्यमयी लोपामुद्रा और सभी महर्षिगण आपकी प्रतीक्षा कर रहे हैं। इसलिए आइए, हम लोगों को कृतार्थ कीजिए। इसके बाद ही अत्यधिक वेग वाले, पुष्पक विमान से अपने देश अयोध्या में पहुँचकर, अश्वमेध यज्ञ में सम्मिलित हो जाइएगा।

सम्भावयास्मान्। अथ प्रजविना पुष्पकेण स्वदेशमुपगत्याश्वमेधसज्जो भव इति।

रामः– यथाज्ञापयति भगवान्।

शम्बूकः– इत इतो देवः।

रामः– (पुष्पकं प्रवर्तयन्) 'भगवति पंचवटि! गुरुजनादेशापरोधात्क्षणं क्षम्यतामतिक्रमो रामस्य।

शम्बूकः– देव! पश्य–

गुंजत्कुंजकुटीरकौशिकघटाघूत्कारवत्कीचक–
स्तम्बाडम्बरमूकमौकुलिकुलः क्रौंचाभिधोऽयं गिरिः।
एतस्मिन्प्रचलाकिनां प्रचलतामुद्वेजिताः कूजितै–
रुद्वेल्लन्ति पुराणरोहिणतरुस्कन्धेषु कुम्भीनसाः।।29।।

(**अन्वय–**गुंजत्–कुंज–कुटीर–कौशिक–घटा–घूत्कारवत्–कीचक–स्तम्ब–आडम्बर–मूक–मौकुलि–कुलः, क्रौंच–अभिधः, अयम् गिरिः, एतस्मिन् प्रचलताम् प्रचलाकिनाम् कूजितैः उद्वेजिताः कुम्भीनसाः पुराण–रोहिण–तरु–स्कन्धेषु उद्वेल्लन्ति।।29।।)

अपि च,

एते ते कुहरेषु गद्गदनददगोदावरीवारयो,
मेघालम्बितमौलिनीलशिखराः क्षोणीभृतो दाक्षिणाः।
अन्योन्यप्रतिघातसंकुलचलत्कल्लोलकोलाहलै–
रुत्तालास्तु इमे गभीरपयसः पुण्याः सरित्संगमाः।।30।।

(**अन्वय–** कुहरेषु गद्गद–नदद–गोदावरी–वारयः, मेघ–आलम्बित–मौलि–नील–शिखराः, एते ते दाक्षिणाः क्षोणी–भृतः, अन्योन्य–प्रतिघात–संकुल–चलत्–कल्लोल–कोलाहलैः उत्तालाः, इमे तु गभीर–पयसः पुण्याः सरित्–संगमाः (सन्ति)।।30।।)

(इति निष्क्रान्ताः सर्वे)

।।इति महाकविभवभूतिविरचित उत्तररामचरिते 'पंचवटीप्रवेशो' नाम द्वितीयोऽङ्कः।।

राम– जैसी भगवान् की आज्ञा।

शम्बूक– महाराज! इधर से, इधर से।

राम– (पुष्पक विमान को प्रवर्तित करते हुए) भगवति पंचवटि! गुरुजनों की आज्ञा के अनुरोध से राम के इस क्षणिक अतिक्रम को क्षमा कीजिएगा।

शम्बूक– महाराज! देखिए,

गूँजते हुए कुँज–कुटीरों में उल्लुओं के समूहों की घू–घू ध्वनि से युक्त, कीचकों के पौरों के शब्दों से मूक हुए कौओं के कुल वाला, यह क्रौंच पर्वत है। यहाँ घूमते हुए मोरों के शब्दों से भयभीत हुए सर्प, पुराने चन्दन के वृक्षों की शाखाओं से लिपट रहे हैं।।29।।

और भी,

पर्वतों की गुफाओं में कल–कल की ध्वनि करती हुई, गोदावरी के जल से युक्त तथा मेघों द्वारा ऊपरी भाग का आश्रय लेने के कारण, नीली चोटियों वाले, ये वे ही दक्षिणा पथ के पर्वत हैं तथा आपस में टकराने से चंचल लहरों के कोलाहल से त्वरित गति से अथाह जल वाले, ये पवित्र नदियों के संगम हैं।।30।।

(ऐसा कहकर सभी निकल जाते हैं)

।। इसप्रकार महाकवि भवभूति विरचित उत्तररामचरित में 'पंचवटी प्रवेश' नामक द्वितीय अंक का डॉ. राकेश शास्त्री, बाँसवाड़ा **द्वारा किया हुआ हिन्दी अनुवाद पूर्ण हुआ।।**

।। श्रीः ।।

तृतीयोऽङ्कः

(ततः प्रविशति नदीद्वयम्)

एका– सखि मुरले! किमसि सम्भ्रान्तेव?

मुरला– सखि तमसे! प्रेषितास्मि भगवतोऽगस्त्यस्य पत्न्या लोपा–मुद्रया सरिद्वरां गोदावरीमभिधातुम् 'जानास्येव यथा वधूपरित्यागा–त्प्रभृति–

अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः।
पुटपाकप्रतीकाशो रामस्य करुणो रसः।।1।।

(अन्वयः– गभीरत्वात् अनिर्भिन्नः अन्तर्गूढ–घन–व्यथः, रामस्य करुणः रसः पुटपाक–प्रतीकाशः (विद्यते)।।1।।)

तेन च तथाविधेष्टजनकष्टविनिपातजन्मना प्रकृष्टगद्गदेन दीर्घशोकसन्तानेन सम्प्रति परिक्षीणो रामभद्रः। तमवलोक्य कम्पितमिव कुसुमसमबन्धनं मे हृदयम्। अधुना च रामभद्रेण प्रतिनिवर्तमानेन नियतमेव पंचवटीवने वधूसहनिवासविस्रम्भसाक्षिणः प्रदेशा द्रष्टव्याः। तत्र च निसर्गधीरस्याप्येवंविधायामवस्थायामतिगम्भीराभोगशोकक्षोभसंवेगा–त्पदेपदे महाप्रमादानि शोकस्थानानि शंकनीयानि। तद्भगवति गोदवरि! त्वया तत्रभवत्या सावधानया भवितव्यम्।

वीचीवातैः सीकरक्षोदशीतैरा–
कर्षद्भिः पद्मकिंजल्कगन्धान्।
मोहे मोहे रामभद्रस्य जीवं
स्वैरं स्वैरं प्रेरितैस्तर्पयेति।।2।।

(अन्वयः– सीकर–क्षोद–शीतैः पद्म–किंजल्क–गन्धान् आकर्षद्भिः स्वैरम् स्वैरम् प्रेरितैः वीची–वातैः रामभद्रस्य मोहे–मोहे जीवम् तर्पय, इति।।2।।)

तृतीय अङ्क

(उसके बाद दो नदियाँ प्रवेश करती हैं)

एक (तमसा)– सखि मुरले! तुम घबराई हुई क्यों हो?

मुरला– सखि तमसे! मुझे भगवान् **अगस्त्य की पत्नी लोपामुद्रा** ने नदियों में श्रेष्ठ गोदावरी से कहने के लिए भेजा है कि–'तुम जानती ही हो, वधू सीता के परित्याग से लेकर,

गम्भीरता के कारण, दिखायी न देने वाला, राम का करुणरस, अन्दर ही अन्दर स्थित तीव्रवेदना से युक्त 'पुटपाक' के समान हो गया है।।1।।

इस कारण प्रियतमा सीता पर टूटने वाली, इस घोर विपत्ति से उत्पन्न, अत्यधिक व्याकुल बनाने वाले, दीर्घकालिक शोक से राम बहुत दुर्बल हो गए हैं। उन्हें देखकर पुष्प के कोमल बन्धन वाला, मेरा हृदय काँप सा उठा है। इस समय श्रीराम लौटते हुए, **पंचवटी** में सीता के साथ अपने स्वच्छन्द विहारों के साक्षी, प्रदेशों को अवश्य देखेंगे, ऐसी स्थिति में, प्रबल शोक के आवेग के कारण पग–पग पर असावधानता–जन्य प्रमादों से मूर्च्छा आदि अनेक अनर्थों की सम्भावना है। इसलिए भगवति! गोदावरि, आपको सावधान रहना चाहिए।

इसलिए तुम बार–बार मूर्च्छित राम को जल की छोटी–छोटी बूँदों से शीतल, कमल के पराग कणों का गन्ध लेकर, मन्द–मन्द प्रवाहित होने वाली, वायु द्वारा उन्हें होश में लाना।।2।।

तमसा– उचितमेव दाक्षिण्यं स्नेहस्य। संजीवनोपायस्तु मूलत एव रामभद्रस्य सन्निहितः।

मुरला– कथमिव।

तमसा– तत्सर्वं श्रूयताम्। पुरा किल वाल्मीकितपोवनोपकण्ठात् परित्यज्य निवृत्ते लक्ष्मणे सीतादेवी प्राप्तप्रसववेदनमतिदुःखसंवेगा–दात्मानं गंगाप्रवाहे निक्षिप्तवती। तदैव तत्र द्वारकद्वयं च प्रसूता। भगवतीभ्यां पृथ्वीभागीरथीभ्यामप्युभाभ्यामभ्युपपन्ना रसातलं च नीता। स्तन्यत्यागात्परेण दारकद्वयं च तस्य प्राचेतसस्य महर्षेर्गंगादेव्या समर्पितं स्वयम्।

मुरला– (सविस्मयम्)

ईदृशानां विपाकोऽपि, जायते परमाद्भुतः।
यत्रोपकरणीभावमायात्येवंविधो जनः।।3।।

(अन्वयः– ईदृशानाम् विपाकः अपि परम–अद्भुतः जायते यत्र एवंविधः जनः उपकरणीभावम् आयाति ।।3।।)

तमसा– इदानीं तु शम्बूकवृत्तान्तेनानेन सम्भावितजनस्थानं रामभद्रं सरयूमुखादुपश्रुत्य भगवती भागीरथी, यदेव लोपामुद्रया स्नेहादभिशंकितं तदेवाभिशंक्य सीतासमेता, केनचिदिव गृहाचारव्यपदेशेन गोदावरी–मुपागता।

मुरला– सुष्ठु चिन्तितं भगवत्या भागीरथ्या। 'राजधानीस्थित–स्यास्य खलु तैश्च तैश्च जगतामभ्युदयिकैः कार्यैर्व्यापृतस्य रामभद्रस्य नियताश्चित्तविक्षेपाः। अव्यग्ररयं पुनरस्य शोकमात्रद्वितीयस्य पंचवटीप्रवेशो महाननर्थः' इति। तदर्थं सीतया रामभद्रोऽयमाश्वासनीयः स्यात्।

तमसा– उक्तमत्र भगवत्या भागीरथ्या– 'वत्से देवयजनसम्भवे सीते! अद्य खल्वायुष्मतोः कुशलवयोर्द्वादशस्य जन्मवत्सरस्य सङ्ख्या–मंगलग्रन्थिरभिवर्त्तते। तदात्मनः पुराणश्वशुरमेतावतो मानवस्य राजर्षि–वंशस्य प्रसवितारं सवितारमपहतपाप्मानं देवं स्वहस्तावचितैः पुष्पैरुप–तिष्ठस्व। न त्वामवनि पृष्ठवर्तिनीमस्मत् प्रभावाद्वनदेवता अपि द्रक्ष्यन्ति

तमसा– स्नेह की उदारता उचित ही है। श्रीराम को होश में लाने का उपाय (सीता) तो पास में ही है।

मुरला– वह कैसे?

तमसा– वह सब भी सुनिए। कुछ समय पहले वाल्मीकि आश्रम के निकट, सीता को छोड़कर, लक्ष्मण के लौट जाने पर, अत्यधिक दुःख के वेग से होने वाली, प्रसव की पीड़ा से युक्त उसने, अपने आपको गंगा के प्रवाह में डाल दिया। उसी समय उन्होंने वहाँ पर दो बालकों को जन्म दिया। उनपर अनुग्रह करके, भगवती पृथ्वी और भागीरथी ने उन्हें पाताल लोक पहुँचा दिया, माता का दूध छूटने के पश्चात् गंगा देवी ने उन दोनों बालकों को स्वयं महर्षि वाल्मीकि को समर्पित कर दिया।

मुरला– (आश्चर्यपूर्वक)

इसप्रकार के महानुभावों का परिणाम भी अत्यधिक आश्चर्य से युक्त होता है, जिनमें इसप्रकार के (गंगादि अलौकिक) **लोग सहयोगी भाव को प्राप्त होते हैं।।3।।**

तमसा– किन्तु अब शम्बूक के वृत्तान्त से, **जनस्थान** को अनुगृहीत करने के लिए, राम के आने की सम्भावना को सरयू के मुख से सुनकर, भगवती भागीरथी व लोपामुद्रा ने जिस स्नेह की आशंका की थी, उसी की शंका करके, सीता के साथ, मानो घर के किसी काम के बहाने गोदावरी के पास आई हैं।

मुरला– भगवती भागीरथी ने यह तो अच्छा विचार किया। राजधानी में स्थित और संसार के उन–उन कल्याणकारी कार्यों में व्यस्त रहने के कारण, श्रीराम के चित्त की चंचलता नियन्त्रित थी, किन्तु इस अवसर पर व्यग्र न होने एवं शोकमात्र के साथ में रहने के कारण, राम का पंचवटी में प्रवेश महान् अनर्थकारी है, तो सीता द्वारा श्रीराम को किसप्रकार आश्वस्त किया जाएगा?

तमसा– इस विषय में भगवती भागीरथी ने कहा है कि– यज्ञ भूमि से उत्पन्न हुई, पुत्री सीते! निश्चय ही, आज आयुष्मान् कुश और लव की मांगलिक बारहवीं वर्षगाँठ है, इसलिए अपने पुरातन श्वसुर, विशाल वैवस्वत मनु के राजर्षि वंश की उत्पत्ति करने वाले, पापों का विनाश करने वाले, भगवान् सूर्य की अपने हाथों से चुने हुए पुष्पों

किमुत मर्त्याः' इति। अहमप्याज्ञापिता तमसे! त्वयि प्रकृष्टप्रेमैव वधू-र्जानकी। अतस्त्वमेवास्याः प्रत्यनन्तरीभव' इति। साऽहमधुना यथाऽऽदिष्टमनुतिष्ठामि।

मुरला– अहमप्येतं वृत्तान्तं भगवत्यै लोपामुद्रायै निवेदयामि। रामभद्रोऽप्यागत एवेति तर्कयामि।

तमसा– तदियं गोदावरीह्रदान्निर्गत्य–

परिपाण्डुदुर्बलकपोलसुन्दरं,
दधती विलोलकबरीकमाननम्।
करुणस्य मूर्तिरथवा शरीरिणी–
विरहव्यथेव वनमेति जानकी ।।4।।

(अन्वयः– परि–पाण्डु–दुर्बल–कपोल–सुन्दरम्, विलोल–कबरीकम् आननम् दधती, जानकी करुणस्य मूर्तिः अथवा शरीरिणी विरहव्यथा इव वनम् एति।।4।।)

मुरला– इयं हि सा?

किसलयमिव मुग्धं बन्धनाद्विप्रलूनं,
हृदयकमलशोषी दारुणो दीर्घशोकः।
ग्लपयति परिपाण्डु क्षाममस्याः शरीरं,
शरदिज इव घर्मः केतकीगर्भपत्रम्।।5।।

(अन्वयः– हृदय–कमल–शोषी, दारुणः दीर्घ–शोकः, बन्धनात् विप्रलूनम्, मुग्धम् किसलयम् इव परिपाण्डु–क्षामम् अस्याः शरीरम् शरदिजः इव घर्मः केतकी–गर्भ–पत्रम् ग्लपयति।।5।।)

(इति परिक्रम्य निष्क्रान्ते)

इति शुद्ध विष्कम्भकः

(नेपथ्ये)

जात! जात!

(ततः प्रविशति पुष्पावचयव्यग्रा सकरुणौत्सुक्यमाकर्णयन्ती सीता)

सीता– **अहो जानामि 'प्रियसखी वासन्ती व्याहरतीति'।**[1]

---

[1]. अम्हेह, जाणामि– 'पिअसही वासन्दी व्याहरदि' त्ति।

से पूजा करो। मेरे प्रभाव से पृथ्वी पर रहती हुई तुम्हें वन के देवता भी नहीं देख सकते हैं, फिर मनुष्यों की तो बात ही क्या है? और उन्होंने मुझे भी आज्ञा दी है कि हे तमसे! वधू सीता तुमसे अत्यधिक प्रेम करती है। इसलिए तुम ही इसके साथ रहना। अतः वह मैं अब उनकी आज्ञा के अनुसार करती हूँ।

मुरला– मैं भी इस समाचार को भगवती लोपामुद्रा से निवेदन करती हूँ। ऐसा सोचती हूँ कि–श्रीराम भी आ ही गए हैं।

तमसा– तो यह गोदावरी के अगाध जल से निकलकर–

विरह से पीले और दुर्बल कपोलों से सुन्दर एवं बिखरे हुए केशों से युक्त, मुख को धारण करती हुई, जानकी करुण की मूर्ति अथवा शरीर को धारण करने वाली विरह–व्यथा के समान, वन में आ रही हैं।।4।।

मुरला– यह वह सीता है?

हृदयरूपी कमल को सुखाने वाला, कठोर दीर्घकालिक शोक, डंठल से टूटे हुए, कोमल किसलय के समान, दुर्बल एवं पीले इसके शरीर को, उसीप्रकार सुखा रहा है, जैसे– शरद्ऋतु की कड़ी धूप केतकी के पुष्प के भीतरी भाग के कोमल पत्ते को सुखा देती है।।5।।

(ऐसा कहकर घूमकर चली जाती हैं)

।। इसप्रकार **शुद्ध विष्कम्भक** पूर्ण हुआ।।

(नेपथ्य में)

हे पुत्र! हे पुत्र!

(उसके बाद पुष्पों को चुनने में व्यस्त, करुणा एवं उत्सुकता के साथ सुनती हुई, सीता प्रवेश करती है)

सीता– अरे! समझती हूँ कि यह मेरी प्रिय सखी वासन्ती बोल रही है।

(पुनर्नेपथ्ये)

सीतादेव्या स्वकरकलितैः सल्लकीपल्लवाग्रै–
रग्रे लोलः करिकलभको यः पुरा वर्धितोऽभूत्।

सीता– किं तस्य?[1]

(पुनर्नेपथ्ये)

वध्वा सार्धं पयसि विहरन् सोऽयमन्येन दर्पा–
दुद्दामेन द्विरदपतिना सन्निपत्याभियुक्तः।।6।।

(अन्वयः– पुरा अग्रे लोलः यः करि–कलभकः सीता–देव्या स्व–कर– कलितैः, सल्लकी–पल्लव–अग्रैः वर्धितः अभूत्। सः अयम् वध्वा सार्धम् पयसि विहरन्, अन्येन उद्दामेन द्विरद–पतिना दर्पात् सन्निपत्य अभियुक्तः।।6।।)

सीता– (ससंभ्रमं कतिचित्पदानि गत्वा) **आर्यपुत्र! परित्रायस्व परित्रायस्व मम पुत्रकम्।** (विचिन्त्य) **हा धिक्, हा धिक्। तान्येव चिरपरिचितान्यक्षराणि पंचवटदर्शनेन मां मन्दभागिनीमनुबध्नन्ति हा आर्यपुत्र!**[2] (इति मूर्च्छति)।

(प्रविश्य)

तमसा– **समाश्वसिहि समाश्वसिहि।**

(नेपथ्ये)

विमानराज! अत्रैव स्थीयताम्।

सीता– (ससाध्वसोल्लासम्) **अहो, जलभरभरितमेघमन्थ–रस्तनितगम्भीरमांसलः कुतो नु भारतीनिर्घोषो भ्रियमाणकर्णविवरां मामपि मन्दभागिनीं झटित्युत्सुकयति?**[3]

तमसा– (सस्मितास्रम्) **अयि वत्से!**

अपरिस्फुटनिक्वाणे, कुतस्त्येऽपि त्वमीदृशी।
स्तनयित्नोर्मयूरीव, चकितोत्कण्ठितं स्थिता।।7।।

---

1. किं तस्स?
2. अज्जउत्त! परित्ताहि परित्ताहि मह पुत्तअम्। हद्धी हद्धी! ताइं एव्व चिरपरि–इदाइं अक्खराइं पंचवटीदंसणेण मं मण्दभाइणिं अनुबन्धन्ति। हा अज्जउत्त!
3. अम्हहे, जलभरभरिअमेहमन्थरत्थणि अगम्भीरमंसलो कुदो णु भारईणिग्घासो भरन्तकण्णंविवरं मं वि मन्दभाइणिं भत्ति उस्सुआवेइ?

(फिर से नेपथ्य में)

पूर्व में सीता देवी ने चंचल, जिस हाथी के बच्चे को अपने हाथों के अग्रभाग से 'सल्लकी' लता के कोमल पत्ते दे–देकर पाला था।

सीता– उसका क्या हुआ?

(फिर से नेपथ्य में)

अपनी पत्नी के साथ जल में विहार करता हुआ वह, दूसरे किसी उच्छृंखल हाथी द्वारा दर्प से आक्रान्त किया जा रहा है।।6।।

सीता– (घबराई हुई कुछ पग चलकर) आर्यपुत्र! मेरे पुत्र को बचाइए। बचाइए। (सोचकर) हा धिक्, हा धिक्, पंचवटी को देखने से वे ही चिरपरिचित अक्षर, मुझ मन्दभागिनी का अनुसरण कर रहे हैं। हा आर्यपुत्र (यह कहकर मूर्च्छित हो जाती है)

(प्रवेश करके)

तमसा– धैर्य धारण करो, धैर्य धारण करो।

(नेपथ्य में)

हे विमानराज! यहीं पर रुक जाओ।

सीता– (घबराकर, प्रसन्नतापूर्वक) अहो! जल के भार से परिपूर्ण मेघ के मन्द–मन्द गर्जन के समान, गम्भीर तथा प्रभावशाली वाणी की ध्वनि, कहाँ से आकर मेरे कर्णकुहरों को भरती हुई, मुझ मन्दभागिनी को भी शीघ्र ही उत्सुक कर रही है?

तमसा– (मुस्कराहट के साथ अश्रुपूर्वक) अरी, पुत्रि!

मेघ की गड़गड़ाहट से चकित और उत्कण्ठित मोरनी के समान तुम भी कहीं से आ रहे, इस अस्पष्ट शब्द को सुनकर, चकित एवं उत्कण्ठित हो रही हो।।7।।

(अन्वयः– स्तनयित्नोः मयूरी इव, त्वम् कुतस्त्ये अ–परिस्फुट–निक्वाणे अपि, ईदृशी चकित–उत्कण्ठितम् स्थिता।।7।।)

सीता– भगवति! किं भणस्यपरिस्फुटेति! स्वरसंयोगेन प्रत्यभि–जानामि, नन्वार्यपुत्रेणैवेतद्व्याहृतम्।[1]

तमसा– श्रूयते– 'तपस्यतः कल शूद्रस्य दण्डधारणार्थमैक्ष्वाको राजा दण्डकारण्यमागतः' इति।

सीता– दिष्ट्या अपरिहीनराजधर्मः खलु स राजा।[2]

(नेपथ्ये)

यत्र द्रुमा अपि मृगा अपि बान्धवो मे,
यानि प्रियासहचरश्चिरमध्यवात्सम्।
एतानि तानि बहुकन्दरनिर्झराणि,
गोदावरीपरिसरस्य गिरेस्तटानि।।8।।

(अन्वयः– यत्र द्रुमाः अपि, मृगाः अपि मे बान्धवः, प्रिया–सहचरः यानि चिरम् अध्यवात्सम्, एतानि बहु–कन्दर–निर्झराणि गोदावरी–परिसरस्य गिरेः तानि तटानि (सन्ति)।।8।।)

सीता– दिष्ट्या कथं प्रभातचन्द्रमण्डलापाण्डुपरिक्षाम दुर्बलेना–कारेण निजसौम्यगम्भीरानुभावमात्रप्रत्यभिज्ञेय आर्यपुत्र एव भवति? भगवति तमसे! धारय माम्।[3] (इति तमसामाश्लिष्य मूर्च्छति)

तमसा– वत्से! समाश्वसिहि, समाश्वसिहि।

(नेपथ्ये)

अनेन पंचवटीदर्शनेन–

अन्तर्लीनस्य दुःखाग्नेरद्योद्दामं ज्वलिष्यतः।
उत्पीड इव धूमस्य, मोहः प्रागावृणोति माम्।।9।।

(अन्वयः– अन्तर्लीनस्य अद्य उद्दामम् ज्वलिष्यतः दुःख–अग्नेः, धूमस्य उत्पीडः इव मोहः माम् प्राक् आवृणोति।।9।।)

---

1. भअवदि! किं भणसि अपरिप्फुडेत्ति? सरसंजोएण पच्चहिजाणामि, णं अज्ज–उत्तेण एव्व एदं वाहरिदम्।

2. दिट्ठिआ अपरिहीणधम्मो सो राआ।

3. दिट्ठिआ कहं पहादचन्दमण्डलापण्डपरिक्खामदुव्वलेन आआरेण णिअसोम्हगम्भीरा–णभावमेत्तच्चहिजेज्जो अज्जउत्तो एव्व होदि? भअवदि तमसे! धारेहि माम्।

सीता– भगवति! आप क्या कह रही हैं, अस्पष्ट शब्द है? स्वर के संयोग से मैं पहचान रही हूँ कि– निश्चय ही, यह आर्यपुत्र द्वारा कहा गया है।

तमसा– सुना जाता है कि तपस्या करते हुए, शूद्र को दण्ड देने के लिए वे इक्ष्वाकु वंश के राजा दण्डकारण्य में आए हैं।

सीता– सौभाग्य से, वह राजा वस्तुतः धर्म से विहीन नहीं है।

(नेपथ्य में)

जहाँ पर वृक्ष और पशु भी मेरे बन्धु थे, जिनमें मैंने अपनी प्रियतमा के साथ, बहुत दिनों तक निवास किया था, ये वे ही अनेक गुफाओं तथा झरणों से युक्त, गोदावरी के निकटवर्ती पर्वत के तट प्रदेश हैं।।8।।

सीता– सौभाग्य से, प्रातःकाल के चन्द्रमण्डल के समान, कुछ शुभ्र, क्षीण और दुर्बल आकृति वाले, आर्यपुत्र अपने गम्भीर और शान्त प्रभावमात्र से ही पहचानने के योग्य हो गए हैं। भगवति तमसे! मुझे सम्भालिए।

(यह कहकर तमसा से लिपटकर मूर्च्छित हो जाती है)

तमसा– पुत्रि! धैर्य धारण करो, धैर्य धारण करो।

(नेपथ्य में)

इस पंचवटी को देखने से,

अन्दर ही अन्दर छिपी हुई, आज भड़ककर जलने वाली, दुःख की अग्नि के धूम–पिण्ड के समान, मोह मुझे पहले ही आवृत्त कर रहा है।।9।।

हा प्रिये जानकि!

तमसा– (स्वगतम्) **इदं तावदाशंकितं गुरुजनेन।**

सीता– (समाश्वस्य) **हा, कथमेतत्?**[1]

(पुनर्नेपथ्ये)

हा देवि दण्डकारण्यवासप्रियसखि विदेहराजपुत्रि! (इति मूर्च्छति)

सीता– हा धिक्, हा धिक्। मां मन्दभागिनीं व्याहृत्यामीलित–नेत्रनीलोत्पलो मूर्च्छित एव। हा, कथं धरणीपृष्ठे निरुद्धनिः श्वासनिःसहं विपर्यस्तः। भगवति तमसे! परित्रायस्व, परित्रायस्व। जीवयार्यपुत्रम्।[2]

(इति पादयोः पतति)

तमसा–

त्वमेव ननु कल्याणि! संजीवय जगत्पतिम्।
प्रियस्पर्शो हि पाणिस्ते, तत्रैष निरतो जनः।।10।।

(अन्वयः– कल्याणि! त्वम् एव ननु जगत्–पतिम् संजीवय, हि ते पाणिः प्रिय–स्पर्शः, तत्र एष जनः निरतः।।10।।)

सीता– यद्भवतु तद्भवतु। यथा भगवत्याज्ञापयति।[3]

(इति ससंभ्रमं निष्क्रान्ता)

(ततः प्रविशति भूम्यां निपतितः सास्रया सीतया स्पृश्यमानः साह्लादोच्छ्वासो रामः)

सीता– (किंचित्सहर्षम्) **जाने पुनः प्रत्यागतमिव जीवितं त्रैलोक्यस्य।**[4]

रामः– हन्त भोः किमेतत्?

आश्च्योतनं नु हरिचन्दनपल्लवानां?
निष्पीडितेन्दुकरकन्दलजो नु सेकः?
आतप्तजीवितमनः परितर्पणोऽयं,
संजीवनौषधिरसो हृदि नु प्रसिक्तः।।11।।

---

1. हा, कहं एदम्?
2. हद्धी हद्धी! मं मन्दभाइणिं वाहरिअ आमीलिदणेत्तणीं लुप्पलो मुच्छिदो एव्व! हा, कहं धरणिपट्ठि णिरुद्धणिस्सासणीसहं विपल्हत्थो? भअवदि तमसे! परित्ताएहि परित्ताएहि। जीवावेहि अज्जउत्तम्।
3. जं होदु त होदु। जइ भअवई आणवेई।
4. आणे उण पच्चाअदं विअ जीविअं तेल्लोअस्स।

हाय, प्रिये जानकि!

तमसा– (मन में) गुरुजनों ने इसी की तो आशंका की थी।

सीता– (आश्वस्त होकर) हाय, यह कैसे?

(फिर से नेपथ्य में)

हा देवि! दण्डकारण्य के निवास की प्रिय सखि! विदेहराज की पुत्रि! (यह कहकर मूर्च्छित हो जाते हैं)

सीता– हाय, धिक्कार है, धिक्कार है, मुझ मन्दभागिनी का नाम लेकर, नीलकमल के समान, नेत्रों को बन्द करके, आर्यपुत्र मूर्च्छित हो गए हैं। हाय! अवरुद्ध हुए श्वास वाले, दुर्बलता के कारण पृथ्वी पर कैसे गिर पड़े हैं? भगवति तमसे! रक्षा करो, रक्षा करो, आर्यपुत्र को जिला दो।

(यह कहकर चरणों में गिर जाती है)

तमसा– हे कल्याणि! तुम ही अपने हाथ के स्पर्श से संसार के स्वामी श्रीराम को जीवित करो, क्योंकि तुम्हारे हाथ का स्पर्श अत्यन्त प्रिय है, ये उसी के अभ्यस्त हैं।।10।।

सीता– जो होना हो, वह हो जाए। जैसी आपकी आज्ञा है, वैसा ही करती हूँ।

(ऐसा कहकर घबराहट के साथ निकल जाती है)

(उसके बाद, भूमि पर पड़े हुए, रोती हुई सीता द्वारा स्पर्श किए जाते हुए एवं प्रसन्नतापूर्वक श्वास लेते हुए राम प्रवेश करते हैं)

सीता– (कुछ प्रसन्नतापूर्वक) मेरा ऐसा मानना है, मानो तीनों लोकों के प्राण लौट आए हैं।

राम– अरे! आश्चर्य है, यह क्या है?

क्या मेरे हृदय पर हरिचन्दन के नूतन पल्लवों का रस लगाया गया है? अथवा चन्द्रमा के किरणरूपी अंकुरों को निचोड़कर, उनके रस से सेक किया गया है? या फिर क्या मेरे सन्तप्त मन एवं प्राण को तृप्त करने वाला, संजीवनी ओषधि का रस ही प्रकृष्टरूप से सींच दिया गया है?।।11।।

(अन्वयः—हृदि हरिचन्दन—पल्लवानाम् आश्च्योतनम् नु?निष्पीडित—इन्दु—कर—कन्दल—जः सेकः नु ? आतप्त—जीवित—मनः परितर्पणः अयम् संजीवन—औषधि—रसः प्रसिक्तः नु? ।।11।।)

अपि च—

स्पर्शः पुरा परिचितो नियतं स एव,
संजीवनश्च मनसः परितोषणश्च।
सन्तापजां सपदि यः परिहृत्य मूर्च्छा—
मानन्दनेन जडतां पुनरातनोति।।12।।

(अन्वयः— पुरा परिचितः संजीवनः, मनसः च परितोषणः च नियतम्, सः एव स्पर्शः, यः सन्तापजाम् मूर्च्छाम् परिहृत्य, सपदि आनन्दनेन पुनः जडताम् आतनोति।।12।।)

सीता— (ससाध्वसकरुणमुपसृत्य) **एतावदेवेदानीं मम बहुतरम्।**[1]

रामः— (उपविश्य) **न खलु वत्सलया देव्याभ्युपपन्नोऽस्मि?**

सीता— हा धिक्, हा धिक्। किमित्यार्यपुत्रो मां मार्गिष्यति?[2]

रामः— भवतु, पश्यामि।

सीता— भगवति तमसे! अपसरावस्तावत्। मां प्रेक्ष्यानभ्यनुज्ञातेन सन्निधानेन राजाऽधिकं कोपिष्यति।[3]

तमसा— अयि वत्से! भगीरथीप्रसादाद्वनदेवतानामप्यदृश्यासि संवृत्ता।

सीता— अस्ति खल्वेतत्?[4]

रामः— हा प्रिये जानकि!

सीता— (समन्युगदगदम्) **आर्यपुत्र! असदृशं खल्वेतदस्य वृत्तान्तस्य।** (सास्रम्) **भगवति! किमिति वज्रमयी जन्मान्तरेष्वपि पुररप्यसम्भावितदुर्लभदर्शनस्य मामेव मन्दभागिनीमुद्दिश्यमैवं वत्सलस्यैवं**

---

1 . एत्तिअं एव्व दाणिं मह बहुदरम्।

2 . हद्धी हद्धी! किंति अज्जउत्तो मे मग्गिस्सदि?

3 . भअवदि तमसे! ओसरह्म दाव। मं पेक्खिअ अणब्भणुण्णादेण संणिहाणेण राआ अहिअं कुपिस्सदि।

4 . अत्थि क्खु एदम्?

और भी,

पूर्व में परिचित जिलाने वाला, मन को सन्तुष्ट करने वाला, निश्चय ही यह वही स्पर्श है, जो सन्ताप से उत्पन्न मूर्च्छा को दूर करके, उसी समय प्राप्त होने वाले, आनन्द के माध्यम द्वारा, फिर से जड़ता को फैला रहा है।।12।।

सीता— (घबराहट एवं करुणा के साथ पास जाकर) इस समय मेरे लिए इतना ही पर्याप्त है।

राम— (बैठकर) कहीं स्नेहमयी देवी द्वारा तो मैं अनुगृहीत नहीं हुआ हूँ?

सीता— हाय, धिक्कार है, धिक्कार है। क्या आर्यपुत्र अब मुझे खोजेंगे?

राम— ठीक है, देखता हूँ।

सीता— भगवति तमसे! तब तक हम दोनों यहाँ से हट जाते हैं। अन्यथा आज्ञा के अभाव में मुझे यहाँ उपस्थित देखकर, महाराज अधिक क्रोध करेंगे।

तमसा— अयि, पुत्रि! तुम तो गंगा की कृपा से वन देवताओं के लिए भी अदृश्य हो गयी हो।

सीता— क्या ऐसा ही है?

राम— हा प्रिये! जानकि!

सीता— (प्रणयकोप से गदगद् स्वर में) आर्यपुत्र! आपका यह कथन त्यागरूप वृत्तान्त के अनुरूप नहीं है। (अश्रुपूर्वक) हे भगवति! दूसरे जन्म में भी जिनके दर्शनों की मुझे सम्भावना नहीं थी, जिनका दर्शन मेरे लिए सर्वथा दुर्लभ था, मुझ मन्दभागिनी को स्मरण करके,

---

अभिव्यक्त हुआ है।

महाकवि का पुनर्जन्म में गहन विश्वास राम की मनःस्थिति का मनो—

साथ ही, प्रस्तुत तृतीय अंक सीता और महाकवि भवभूति को

वैज्ञानिक विश्लेषण भी प्रस्तुत करता है। अतः इस आधार पर

उत्कृष्ट मनोवैज्ञानिक भी कहा जा सकता है।

वादिन आर्यपुत्रस्योपरि निरनुक्रोशा भविष्यामि? अहमेवैतस्य हृदयं जानामि, ममाप्येषः।[1]

रामः– (सर्वतोऽवलोक्य सनिर्वेदम्।) हा, न किंचिदत्र।

सीता– भगवति! निष्कारणपरित्यागिनोऽप्येतस्य दर्शनेनैवंविधेन कीदृशी मे हृदयावस्था! इति न जानामि, न जानामि।[2]

तमसा– जानामि वत्से! जानामि।

तटस्थं नैराश्यादपि च कलुषं विप्रियवशा–
द्वियोगे दीर्घेऽस्मिन्झटिति घटनात्स्तम्भितमिव।
प्रसन्नं सौजन्याद्दयितकरुणैर्गाढ़करुणं
द्रवीभूतं प्रेम्णा तव हृदयमस्मिन् क्षण इव।।13।।

(अन्वयः– तव हृदयम् अस्मिन् क्षणे नैराश्यात् तटस्थम्, अपि च विप्रिय–वशात् कलुषम् इव, दीर्घे अस्मिन् वियोगे झटिति घटनात् स्तम्भितम् इव, सौजन्यात् प्रसन्नम् (इव) दयित–करुणैः गाढ़–करुणम् प्रेम्णा द्रवीभूतम् इव (विद्यते)।।13।।)

रामः– देवि!

प्रसाद इव मूर्तस्ते, स्पर्शः स्नेहार्द्रशीतलः।
अद्याप्यानन्दयति मां, त्वं पुनः क्वासि नन्दिनि?।14।।

(अन्वयः– स्नेह–आर्द्र–शीतलः ते स्पर्शः, मूर्तः प्रसादः इव, माम् अद्य अपि आनन्दयति, नन्दिनि! त्वम् पुनः क्व असि?।14।।)

सीता– एते खल्वगाधमानसंदर्शितस्नेहसम्भारा आनन्दनिष्यन्दिनः सुधामया आर्यपुत्रस्योल्लापाः। जाने, प्रत्ययेन निष्कारणपरित्यागशल्यि–तोऽपि बहुमतो मम जन्मलाभः।[3]

---

1. अज्जउत्त! असरिसं क्खु एदं इमस्स वुत्तन्दस्स। भअवदि। किंति वज्जमई जम्मन्तरेसु वि पुणो वि असंभाविअदुल्लहदंसणस्स मं एव्व मन्दभाइणिं उद्दिसिअ एव्वं वच्छलस्स एव्वं वादिणो अज्जउत्तस्स उवरि णिरणुक्कोसा भविस्सम्? अहं एव्व एदस्स हिअअं जाणामि, महवि एसो।

2. भअवदि! णिक्कारणपरिच्चाइणा वि एदस्स दंसणेण एव्वंविधेण कीलिसी मे हिअआवत्था? त्तिण आणामि, ण आणामि।

3. एदे क्खु अगाधमाणसदंसिदसिणेहंसंभारा आणन्दणिस्सन्दिणो सुहामआ अज्जउत्तस्स उल्लावा। जाणे पच्चएण णिक्कालणपरिच्चिआसल्लिदोवि बहुमदो मह जम्मलाहो।

स्नेह से इसप्रकार कहने वाले, आर्यपुत्र पर मैं कठोर कैसे हो सकूँगी? क्योंकि मैं ही इनके हृदय को जानती हूँ और ये मेरे हृदय को जानते हैं।

राम– (राम चारों ओर देखकर, कष्टपूर्वक) हाय, यहाँ तो कुछ भी नहीं है।

सीता– हे भगवति! बिना किसी कारण के ही मेरा त्याग करने वाले, इन्हें इस दशा में देखकर, न जाने मेरा हृदय कैसा हो रहा है? वह मैं नहीं जानती हूँ, न ही जान पा रही हूँ।

तमसा– जानती हूँ, पुत्रि! जानती हूँ।

तुम्हारा हृदय इस क्षण में निराशा के कारण उदासीन सा और बिना किसी कारण के परित्याग से कलुषित सा, इस दीर्घ वियोग में अकस्मात् ही मिलन होने से स्तब्ध सा, राम के सौजन्य से प्रसन्न के समान, प्रिय के करुणामय विलापों के कारण शोकाकुल एवं प्रेम से मानो द्रवित सा हो रहा है।।13।।

राम– हे देवि! (सीते)

प्रेम से आर्द्र एवं शीतल तुम्हारा स्पर्श मूर्तिमान् अनुग्रह के समान, मुझे इस समय भी आनन्दित कर रहा है। हे आनन्द प्रदान करने वाली सीते! तुम कहाँ हो?।14।।

सीता– अत्यन्त गम्भीर मन से प्रेम को प्रदर्शित करने वाले, आनन्द की वर्षा करने वाले, आर्यपुत्र के उच्च स्वर से किए गए ये विलाप, निश्चय ही अमृत की वर्षा करने वाले हैं। इन विलापों के विश्वास से मैं ऐसा मानती हूँ कि अकारण ही परित्यागरूपी शल्य से बिंधे होने पर भी, मेरा जन्म ग्रहण करना अत्यन्त सार्थक है।

प्रस्तुत अंक में महाकवि ने श्रीराम तथा भगवती सीता के अन्तर्द्वन्द्व को भी अत्यन्त प्रभावी शैली में प्रस्तुत किया है। सम्पूर्ण अंक में करुणरस का प्रवाह प्रमुख रूप से दर्शनीय कहा जा सकता है।

रामः– अथवा कुतः प्रियतमा? नूनं संकल्पाभ्यासपाटवोपादान एष भ्रमो रामभद्रस्य।

(नेपथ्ये)

अहो, महान् प्रमादः। (सीतादेव्याः स्वकरकलितैः, इत्यर्धं पठ्यते।)

रामः– (सकरुणौत्सुक्यम्) **किं तस्य?**

(पुनर्नेपथ्ये) (वध्वा सार्धम्, इत्युत्तरार्धं पठयते।)

सीता– क इदानीमभियुज्यते?[1]

रामः– क्वासौ दुरात्मा? यः प्रियायाः पुत्रं वधूद्वितीयमभिभवति।

(इत्युत्तिष्ठति)

(प्रविश्य)

वासन्ती– (सम्भ्रान्ता।) **देव! त्वर्यताम्।**

सीता– हा, कथं मे प्रियसखी वासन्ती?[2]

रामः-- कथं देव्याः प्रियसखी वासन्ती?

वासन्ती– देव! त्वर्यतां त्वर्यताम्। इतो जटायुशिखरस्य दक्षिणेन सीतातीर्थेन गोदावरीमवतीर्य सम्भावयतु देव्याः पुत्रकं देवः।

सीता– हा तात जटायो! शून्यं त्वया विनेदं जनस्थानम्।[3]

रामः– अहह! हृदयमर्मच्छिदः खल्वमी कथोद्घाताः।

वासन्ती– इत इतो देवः।

सीता– भगवति! सत्यमेव वनदेवतापि मां न पश्यति।[4]

तमसा– अयि वत्से! सर्वदेवताभ्यः प्रकृष्टतममैश्वर्यं मन्दाकिन्याः। तत्किमिति विशंकसे?

सीता– ततोऽनुसरावः।[5] (इति परिक्रामति)

रामः– (परिक्रम्य) **भगवति गोदावरि! नमस्ते।**

---

1. को दाणिं अभिजुज्जइ?
2. हा कहं मे पिअसही वासन्ती?
3. हा ताद जडाओ? सुण्ण तुए विणा इदं जणट्ठाणम्।
4. भअवदि! सच्चं एव्व वणदेवदावि मं ण पेक्खदि।
5. तदो अणुसरह्य।

राम– अथवा यहाँ पर प्रियतमा कहाँ से आ सकती है? निश्चय ही, निरन्तर चिन्तन के अभ्यास से उत्पन्न होने वाला, यह मुझ राम का भ्रम ही है।

(नेपथ्य में)

अहो, महान् प्रमाद है, महान् प्रमाद है।

(ऐसा कहकर 'सीतादेव्या स्वकरकलितैः, इत्यादि श्लोक फिर से पढ़ा जाता है)

राम– (करुणा एवं उत्कण्ठापूर्वक) उसका क्या हुआ?

(फिर से नेपथ्य में)

('वध्वा सार्धं' इत्यादि उत्तरार्द्ध पढ़ा जाता है)

सीता– उससे इस समय कौन लड़ रहा है?

राम– वह दुरात्मा कहाँ है? जो प्रिया सीता के, पत्नी सहित पुत्र पर आक्रमण कर रहा है। (ऐसा कहकर उठ जाते हैं)

(प्रवेश करके)

वासन्ती– (घबराहटपूर्वक) महाराज! शीघ्रता कीजिए।

सीता– हा, क्या मेरी प्रिय सखी वासन्ती है?

राम– क्या देवी की प्रियसखी वासन्ती हैं?

वासन्ती– महाराज! शीघ्रता कीजिए, शीघ्रता कीजिए, यहाँ से 'जटायु शिखर' के दायीं ओर 'सीता–तीर्थ' से गोदावरी में उतरकर, आप देवी सीता के पुत्र की रक्षा कीजिए।

सीता– हाय, तात जटायु! आपके बिना यह जनस्थान सूना हो गया है।

राम– अहह! ये बीती हुई बातें, हृदय के मर्मस्थलों को भेदने वाली हैं।

वासन्ती– महाराज! इधर से, इधर से।

सीता– भगवति! सचमुच, वनदेवी भी मुझे नहीं देख रही हैं।

तमसा– पुत्रि! गंगाजी का प्रभाव सभी देवों से बढ़कर है। फिर तुम शंका क्यों कर रही हो?

सीता– तब तो हम दोनों इनके पीछे चलते हैं।

(यह कहकर घूमती हैं)

राम– (घूमकर) हे भगवति, गोदावरि! आपको नमस्कार है।

वासन्ती– (निरूप्य) **देव! मोदस्व विजयिना वधूद्वितीयेन देव्याः पुत्रकेण।**

रामः– **विजयतामायुष्मान्।**

सीता– **अहो! ईदृशो मे पुत्रकः संवृत्तः?**[1]

रामः– **हा देवि! दिष्ट्या वर्धसे।**

येनोद्गच्छद्विसकिसलयस्निग्धदन्ताङ्कुरेण,
व्याकृष्टस्ते सुतनु! लवलीपल्लवः कर्णमूलात्।
सोऽयं पुत्रस्तव मदमुचां वारणानां विजेता,
यत्कल्याणं वयसि तरुणे भाजनं तस्य जातः।।15।।

(अन्वयः– सुतनु! उद्गच्छत् विस–किसलय–स्निग्ध–दन्त–अङ्कुरेण येन, ते कर्ण–मूलात् लवली–पल्लवः व्याकृष्टः, सः अयम् तव पुत्रः मद–मुचाम् वारणानाम् विजेता (सत्), तरुणे वयसि यत् कल्याणम् तस्य भाजनम् जातः।।15।।)

सीता– **अवियुक्त इदानीं दीर्घायुरनया सौम्यदर्शनया भवतु।**[2]

रामः– **सखि वासन्ति! पश्य, पश्य, कान्तानुवृत्तिचातुर्यमपि शिक्षितं वत्सेन।**

लीलोत्खातमृणालकाण्डकवलच्छेदेषु संपादिताः,
पुष्यत्पुष्करवासितस्य पयसो गण्डूषसंक्रान्तयः।
सेकः शीकरिणा करेण विहितः कामं विरामे पुन–
र्यत्स्नेहादनरालनालनलिनीपत्रातपत्रं धृतम्।।16।।

(अन्वयः– यत् स्नेहात् लीला–उत्खात–मृणाल–काण्ड–कवल–च्छेदेषु, पुष्यत्–पुष्कर–वासितस्य पयसः, गण्डूष–संक्रान्तयः संपादिताः, शीकरिणा करेण कामम् सेकः विहितः, पुनः विरामे अनराल–नाल–नलिनी–पत्र–आतपत्रम् धृतम्।।16।।)

सीता– **भगवति तमसे! अयं तावद् ईदृशो जातः। तौ पुनर्न जानम्येतावता कालेन कुशलवौ कीदृशौ संवृत्ताविति?**[3]

---

1. अह्महे! ईदिसो मे पुत्तओ संवुत्तो?
2. अविउत्तो दाणिं दीहाऊ इमाए सोह्मदंसणाए होदु
3. भअवदि तमसे! अयं दाव ईरिसो जादो। दे उण ण आणामि, एत्तिएण कालेण कुसलवा कीरिसा संवुत्तेति?

वासन्ती– (देखकर) महाराज! सीता के पत्नी सहित विजयी पुत्र के दर्शन से आप प्रसन्न होइए।

राम– चिरंजीव! विजयी होओ।

सीता– अरे, मेरा पुत्र इतना बड़ा हो गया है।

राम– अहा देवि! सौभाग्य से तुम वृद्धि को प्राप्त कर रही हो।

हे सुन्दरि! उगते हुए मृणाल पल्लव के समान, स्निग्ध दाँतों रूपी अंकुर वाले, जिस हाथी के बच्चे ने तुम्हारे कर्णमूल से लवली लता के पत्ते को खींच लिया था, यह वह तुम्हारा पुत्र अब मदजल को बहाने वाले, हाथियों का विजेता होकर, युवावस्था में प्राप्त होने वाले, सुख का पात्र हो गया है।।15।।

सीता– अब यह दीर्घायु, प्रिय दर्शनों वाली, अपनी पत्नी से वियुक्त न होवे।

राम– सखि, वासन्ति! देखो, देखो, इस पुत्र ने तो प्रियतमा को प्रसन्न करने की कला (चातुर्य) को भी सीख लिया है।

जो कि इसने प्रेम के कारण अनायास ही उखाड़े गए, कमल दण्ड के ग्रासों के अन्त में खिले हुए, कमलों से सुगन्धित, अपने मुख के जल को अपनी प्रियतमा के मुख में छोड़ दिया और उसके बाद, जल की बूँदें छोड़ने वाली, सूँड़ से पर्याप्तरूप से सिंचन किया एवं अन्त में अत्यधिक स्नेहपूर्वक एक सीधी नाल वाले, कमल के पत्ते के छाते को, उसके ऊपर धारण कर लिया है।।16।।

सीता– भगवति, तमसे! यह तो इतना बड़ा हो गया है, न जाने इतने दिनों में वे कुश और लव कैसे हो गए होंगे?

सीता द्वारा पुत्रवत् पाले गए, गजशावक की अपनी प्रियतमा के साथ की गयी शृंगारिक अठखेलियों का महाकवि ने सुन्दर चित्र प्रस्तुत किया है। कवि की चित्रात्मक शैली भी दर्शनीय है।

तमसा– यादृशोऽयं, तादृशौ तावपि।

सीता– ईदृश्यस्मि मन्दभागिनी, यस्याः न केवलमार्यपुत्रविरहः, पुत्रविरहोऽपि।[1]

तमसा– भवितव्यतेयमीदृशी।

सीता– किं वा मया प्रसूतया? येनैतादृशं मम पुत्रकयोरीषद्विरल–धवलदशनकुड्मलोज्ज्वलमनुबद्धमुग्धकाकलीविहसितं नित्योज्ज्वलं मुख–पुण्डरीकयुगलं न परिचुम्बितमार्यपुत्रेण।[2]

तमसा– अस्तु देवताप्रसादात्।

सीता– भगवति तमसे! एतेनापत्यसंस्मरणेनोच्छ्वसितप्रस्नुतस्तनी इदानीं वत्सयोः पितुः सन्निधानेन क्षणमात्रं संसारिणी संवृत्तास्मि।[3]

तमसा– किमत्रोच्यते? प्रसवः खलु प्रकृष्टपर्यन्तः स्नेहस्य। परं चैतदन्योन्यसंश्लेषणं पित्रोः।

अन्तःकरणतत्त्वस्य, दम्पत्योः स्नेहसंश्रयात्।
आनन्दग्रन्थिरेकोऽयमपत्यमिति पठ्यते।।17।।

(अन्वयः– दम्पत्योः अन्तःकरण–तत्त्वस्य स्नेह–संश्रयात्, अयम् एकः आनन्द–ग्रन्थिः 'अपत्यम्' इति पठ्यते।।17।।)

वासन्ती– इतोऽपि देवः पश्यतु।

अनुदिवसमवर्धयत्प्रिया ते,
यमचिरनिर्गतमुग्धलोलबर्हम्।
मणिमुकुट इवोच्छिखः कदम्बे,
नदति स एष वधूसखः शिखण्डी।।18।।

(अन्वयः– अचिर–निर्गत–मुग्ध–लोलबर्हम् यम्, ते प्रिया अनु–दिवसम् अवर्धयत्, सः एषः शिखण्डी वधू–सखः (सन्), कदम्बे उच्छिखः मणि–मुकुटः इव नदति।।18।।)

---

[1] . ईरिसह्मि मन्दभाइणी, जाए ण केवलं अज्जउत्तविरहो पुत्तविरहो वि।

[2] . किंवा मए पसूदाए? जेण एआरिसं मह पुत्तआणं ईसिविरलधवलदसण–कुड्मलुज्जलं अणुबद्धमुद्धकाअलीविहसिदं , णिच्चुज्जलं, मुहपुण्डरीअजअलं णपरिचु–म्बिअं अज्जउत्तेण।

[3] . भअवदि तमसे! एदिणा अवच्चसंसुमरणेण उस्ससिदपण्हुदत्थणी दाणिं वच्चाणं पिदुणो सणिहाणेण खणमेत्तं संसारिणी संवुत्तह्मि।

तमसा– जैसा यह है, वे भी वैसे ही होंगे।

सीता– मैं ऐसे मन्दभाग्य वाली हूँ, जिसे केवल आर्यपुत्र का ही वियोग नहीं है, अपितु पुत्रों का भी विरह है।

तमसा– यह होनहार ही ऐसी है।

सीता– मेरे द्वारा पुत्रों को उत्पन्न करने से क्या लाभ? जिससे मेरे पुत्रों के कुछ विरल, शुभ्र एवं पुष्प की कलियों के समान, दाँतों से उज्ज्वल निरन्तर सम्बद्ध, मनोहर, अस्पष्ट, मधुर शब्द तथा हास्य से युक्त, मुख–कमल को आर्यपुत्र ने नहीं चूमा।

तमसा– देवों की कृपा से ऐसा ही होवे।

सीता– भगवति तमसे! सन्तानों के इस संस्मरण से कम्पन करते हुए मेरे पयोधरों से दूध बहने लगा है और इस समय बच्चों के पिता राम के सान्निध्य से क्षणमात्र के लिए मैं संसारिणी हो गयी हूँ।

तमसा– इस विषय में तो क्या कहना है? क्योंकि सन्तान तो स्नेह की चरम सीमा है तथा माता–पिता के हृदयों को परस्पर जोड़ने वाली ग्रन्थि (कड़ी) है।

स्नेह का आश्रय ग्रहण करने के कारण, पति–पत्नी के अन्तः–करण में रहने वाले, आनन्द की एकमात्र 'ग्रन्थि' को ही सन्तान इस रूप में कहा जाता है।।17।।

वासन्ती– महाराज, इधर भी देखिए,

नई निकली हुई चंचल और सुन्दर पूँछ वाले, जिस मयूर को आपकी प्रिया सीता ने प्रतिदिन पाल–पोसकर बड़ा किया था, मणिजटित किरीट के समान, ऊँची कलगी से युक्त, वह यह मोर अपनी प्रिया के साथ कदम्ब के वृक्ष पर कूक रहा है।।18।।

महाकवि का प्रकृति के साथ अन्तरंग सम्बन्ध तथा प्रेम अभिव्यक्त हुआ है। प्रस्तुत अंश में उन्होंने हाथी, मोर, मृग तथा कदम्ब व लताकुंज के प्रति सीता के पुत्रवत् प्रेम को सुन्दर अभिव्यक्ति प्रदान की है।

सीता– (सकौतुकस्नेहास्रम्) एषः सः?[1]

रामः– मोदयस्व वत्स! वयमद्य वर्धामहे।

सीता– एवं भवतु।[2]

रामः–**भ्रमिषु कृतपुटान्तर्मण्डलावृत्तिचक्षुः,**
प्रचलितचटुलभ्रूताण्डवैर्मण्डयन्त्या।
करकिसलयतालैर्मुग्धया नर्त्यमानं,
सुतमिव मनसा त्वां वत्सलेन स्मरामि।।19।।

(अन्वयः– भ्रमिषु कृत–पुटान्तः–मण्डल–आवृत्ति–चक्षुः, प्रचलित–चटुल–भ्रू–ताण्डवैः मण्डयन्त्या मुग्धया, कर–किसलय–तालैः नर्त्यमानम् त्वाम् सुतम् इव, वत्सलेन मनसा स्मरामि।।19।।)

हन्त, तिर्यंचोऽपि परिचयमनुरुन्धन्ते।

कतिपयकुसुमोद्गमः कदम्बः,
प्रियतमया परिवर्धितोऽयमासीत्।

सीता– (सास्रम्) सुष्ठु प्रत्यभिज्ञातमार्यपुत्रेण।[3]

रामः– **स्मरति गिरिमयूर एष देव्याः,**
स्वजन इवात्र यतः प्रमोदमेति।।20।।

(अन्वयः– प्रियतमया कतिपय–कुसुम–उद्गमः कदम्बः परिवर्धितः, आसीत्, एषः गिरि–मयूरः देव्याः स्मरति, यतः अत्र अयम् स्वजने इव प्रमोदम् एति।।20।।)

वासन्ती– अत्र तावदासनपरिग्रहं करोतु देवः।

(राम उपविशति)

वासन्ती–
नीरन्ध्रबालकदलीवनमध्यवर्ति,
कान्तासखस्य शयनीयशिलातलं ते।
अत्र स्थिता तृणमदाद्वनगोचरेभ्यः,
सीता ततो हरिणकैर्न विमुच्यते स्म।।21।।

---

1. एसो सो।
2. एव्वं होदु।
3. सुट्ठु पच्चहिआणिदं अज्जउत्तेण।

सीता– (उत्सुकता एवं स्नेहपूर्वक) वह यह है।

राम– पुत्र! प्रसन्न रहो।

सीता– ऐसा ही होवे।

राम–

हे मयूर! तुम्हारे चक्कर लगा–लगाकर घूमने पर, अपांग भाग में अन्दर ही अन्दर घूमने वाले, नेत्रों को चंचल तथा विलासपूर्ण भौहों के नृत्यों से अलंकृत करने वाली, भोली–भाली सीता द्वारा पल्लवों के समान, हाथों की तालियों से, नचाए जाते हुए तुम्हें, मैं पुत्र के समान स्नेहपूर्वक मन से स्मरण करता हूँ।।19।।

वाह! पशु–पक्षी भी परिचय का ध्यान रखते हैं।

प्रियतमा ने कुछ कलियों वाले, जिस कदम्ब को पाल–पोसकर बड़ा किया था,

सीता– (अश्रुपूर्वक) आर्यपुत्र ने ठीक पहचान लिया है।

राम– (उसी कदम्ब पर बैठकर) **यह पहाड़ी मोर देवी सीता को याद कर रहा है, क्योंकि यहाँ पर इसे 'स्वजन' के समान आनन्द का अनुभव हो रहा है।।20।।**

वासन्ती– महाराज! आप तब तक यहाँ पर आसन ग्रहण कीजिए।

(राम बैठते हैं)

वासन्ती– **प्रियतमा सीता के सहचर आपका घने और सुकुमार केलों के बीच में स्थित, यह विश्राम करने के लिए शिलातल था। यहाँ पर बैठी हुई सीता वन में रहने वाले, मृगों को घास के तिनके खिलाया करती थी, इसीलिए हरिण इसको नहीं छोड़ते थे।।21।।**

(अन्वयः– कान्ता–सखस्य ते नीरन्ध्र–बाल–कदली–वन–मध्यवर्ति, शयनीय–शिलातलम् (अस्ति) अत्र स्थिता सीता वन–गोचरेभ्यः तृणम् अदात्, ततः हरिणकैः न विमुच्यते स्म।।21।।)

रामः– इदमशक्यं द्रष्टुम्।

(इत्यन्यतो रुदन्नुपविशति)

सीता– सखि वासन्ति! किं त्वया कृतमार्यपुत्रस्य मम चैतद्द–र्शयन्त्या? हा धिक्! हा धिक्! स एवार्यपुत्रः तदेव पंचवटीवनम्, सैव प्रियसखी वासन्ती, त एव विविधविस्रम्भसाक्षिणो गोदावरीकाननोद्देशाः, त एव जातनिर्विशेषा मृगपक्षिणः पादपाश्च। मम पुनर्मन्दभाग्याया दृश्य–मानमपि सर्वमेवैतन्नास्ति। ईदृशो जीवलोकस्य परिणामः संवृत्तः।[1]

वासन्ती–सखि सीते! कथं न पश्यसि रामभद्रस्यावस्थाम्?

नवकुवलयस्निग्धैरंगैर्ददन्नयनोत्सवं,
सततमपि नः स्वेच्छादृश्यो नवो नव एव सः।
विकलकरणः पाण्डुच्छायः, शुचा परिदुर्बलः,
कथमपि स इत्युन्नेतव्यस्तथापि दृशोः प्रियः।।22।।

(अन्वयः– नव–कुवलय–स्निग्धैः अंगैः, नयन–उत्सवम् ददत्, सततम् अपि नः स्वेच्छा–दृश्यः सः नवः–नवः एव (आसीत् परं सम्प्रति तु) शुचा विकल–करणः पाण्डु–च्छायः, परि–दुर्बलः, सः इति कथम् अपि उन्नेतव्यः तथापि दृशोः प्रियः।।22।।)

सीता– सखि! पश्यामि।[2]

तमसा– पश्य प्रियं भूयाः।

सीता– हा दैव! एष मया विना अहमप्येतेन विनेति केन सम्भावितमासीत्? तन्मुहूर्तमात्रं जन्मान्तरादपि दुर्लभलब्धदर्शनं बाष्पसलिलान्तरेषु पश्यामि तावद्वत्सलमार्यपुत्रम्।[1] (इति पश्यन्ती स्थिता)

---

1 . सहि वासन्दि! किं तुए किदं अज्जउत्तस्स मह अ एदं दंसअन्तीए? हद्धी हद्धी! सो एव्व अज्जउत्तो, तं एव्व पंचवडीवणम्! सा एव्व पिअसही वासन्दी, दे एव्व विविहविस्सम्भ– सक्खिणो गोदावरीकाणणुद्देसा, दे एव्व जादणिव्विसेसा मिअपक्खिणो पाअवा अ। मह उण मन्दभाइणीए दीसन्तं वि सव्वं एव्व एदं णत्थि। ईदिसो जीवलोअस्स परिणामो संवुत्तो!

2 . सहि! पेक्खामि।

राम– यह तो देखना भी मुश्किल है।

(ऐसा कहकर रोते हुए दूसरी ओर बैठ जाते हैं)

सीता– हे सखि वासन्ति! आर्यपुत्र को तथा मुझे यह स्थान दिखाकर तुमने क्या कर दिया? हाय धिक्कार है, धिक्कार है। ये वही आर्यपुत्र हैं, वही पंचवटी वन है, वही प्रिय सखी वासन्ती है, वे ही हमारे विश्वस्त विहारों के साक्षी गोदावरी के वनप्रदेश हैं तथा वे ही पुत्रों के समान पशु, पक्षी तथा वृक्ष हैं, किन्तु मुझ मन्दभागिनी के लिए यह सब कुछ दिखायी देता हुआ भी कुछ नहीं है। मेरे लिए इस मनुष्य लोक का ऐसा दयनीय परिणाम हो गया है।

वासन्ती– हे सखि, सीते! श्रीराम की अवस्था को क्यों नहीं देख रही हो?

जो राम पूर्व में नूतन नीलकमल के समान, स्निग्ध अंगों से हमारे नेत्रों को उत्सव प्रदान करते हुए, हमेशा ही अपनी रुचि के अनुरूप नए–नए दिखायी देते थे, शोक के कारण विकल इन्द्रियों वाले, पाण्डु कान्ति से युक्त, अत्यधिक दुर्बल वे ही आज, 'ये वे ही हैं', इसप्रकार बड़ी मुश्किल से पहचानने योग्य हो गए हैं, किन्तु फिर भी नेत्रों को अच्छे लग रहे हैं।।22।।

सीता– सखि! देख रही हूँ।

तमसा– प्रिय राम को फिर से देखो।

सीता– हाय, दैव! ये मेरे बिना और मैं इनके बिना रहूँगी, यह किसने सम्भावना की थी? इसलिए दूसरे जन्म में भी दुर्लभ दर्शन वाले, प्रिय आर्यपुत्र को अश्रुओं के उमड़ने तथा फिर गिरने के बीच वाले समय में देखती हूँ। (यह कहकर देखती हुई खड़ी रहती है)

---

1 . हा! देब्व एसो। मए विणा अहंवि एदेण विणेत्ति केण सम्भाविदं आसि? ता मुहुत्तमेत्तं जन्मन्तरादोवि दुल्लहलद्धदंसणं बाहसलिलन्तरेसु पेक्खामि दाव वच्छलं अज्जउत्तम् ।

तमसा— (परिष्वज्य सास्रम्)

विलुलितमतिपूरैर्बाष्पमानन्दशोक—
प्रभवमवसृजन्ती पक्ष्मलोत्तानदीर्घा।
स्नपयति हृदयेशं स्नेहनिष्यन्दिनी ते,
धवलमधुरमुग्धा दुग्धकुल्येव दृष्टिः।।23।।

(अन्वयः— अति—पूरैः विलुलितम् आनन्द—शोक—प्रभवम् बाष्पम् अवसृजन्ती, पक्ष्मल—उत्तान—दीर्घा, धवल—मधुर—मुग्धा, दुग्ध—कुल्या इव ते दृष्टिः स्नेह—निष्यन्दिनी (सती) हृदयेशम् स्नपयति।।23।।)

वासन्ती—

ददतु तरवः पुष्पैरर्घ्यं फलैश्च मधुश्च्युतः,
स्फुटितकमलामोदप्रायाः प्रवान्तु वनानिलाः।
कलमविरलं रज्यत्कण्ठा क्वणन्तु शकुन्तयः,
पुनरिदमयं देवो रामः स्वयं वनमागतः।।24।।

(अन्वयः— मधुः—च्युतः, तरवः पुष्पैः फलैः च अर्घ्यम् ददतु, स्फुटित—कमल—आमोद—प्रायाः वन—अनिलाः प्रवान्तु, रज्यत्—कण्ठाः शकुन्तयः अविरलम् कलम् क्वणन्तु, अयम् देवः रामः स्वयं पुनः इदम् वनम् आगतः।।24।।)

रामः— एहि सखि वासन्ति! नन्वितः स्थीयताम्।

वासन्ती— (उपविश्य सास्रम्) **महाराज! अपि कुशलं कुमार—लक्ष्मणस्य?**

रामः— (अनाकर्णनमभिनीय)

करकमलवितीर्णैरम्बुनीवारशष्पै—
स्तरुशकुनिकुरंगान्मैथिली यानपुष्यत्।
भवति मम विकारस्तेषु दृष्टेषु कोऽपि,
द्रव इव हृदयस्य प्रस्रवोद्भेदयोग्यः।।25।।

(अन्वयः— मैथिली कर—कमल—वितीर्णैः, अम्बु—नीवार—शष्पैः, यान् तरु—शकुनि—कुरंगान् अपुष्यत्, तेषु दृष्टेषु प्रस्रव—उद्भेद—योग्यः मम हृदयस्य द्रवः इव कः अपि विकारः भवति।।25।।)

वासन्ती— महाराज! ननु पृच्छामि, कुशलं कुमारलक्ष्मणस्येति?

तमसा— (आलिंगन करके अश्रुपूर्वक)

अत्यधिक प्रवाहों के कारण फैले हुए, आनन्द तथा शोक से उत्पन्न, अश्रुओं को बहाती हुई, नेत्रों की सुन्दर बरोनियों से युक्त, स्नेह की वर्षा करने वाली, तुम्हारी धवल, मधुर तथा मनोहारिणी दृष्टि, दूध की कृत्रिम नदी (कुल्या) **के समान, अपने प्राणेश्वर राम को स्नान करा रही है।।23।।**

वासन्ती— क्योंकि भगवान् राम फिर से स्वयं इस वन में आए हैं, इसलिए इनका स्वागत करने हेतु, मकरन्द की वर्षा करने वाले वृक्ष, अपने फल तथा फूलों द्वारा इन्हें अर्घ्य प्रदान करें और वन के वायु प्रफुल्लित हुए, कमलों की सुगन्धि को लेकर प्रवाहित होवें तथा पक्षियों के समूह, सुरीले कण्ठ से निरन्तर कूजन करें।।24।।

राम— आओ, सखी वसन्ती, इधर बैठो।

वासन्ती— (बैठकर, अश्रुपूर्वक) महाराज! कुमार लक्ष्मण का कुशल तो है?

राम— (अनसुना करके अभिनयपूर्वक)

मैथिली ने अपने कर—कमलों से जल, नीवार एवं कोमल घास प्रदान करके, जिन वृक्ष, पक्षियों एवं मृगों को पाला—पोसा था, प्रसरण की उत्पत्ति के योग्य, आज उन्हें देखकर, मेरे हृदय में, झरने के फूट पड़ने के समान कोई अद्भुत ही विकार उत्पन्न हो रहा है।।25।।

वासन्ती— महाराज! वस्तुतः मैं आपसे कुमार लक्ष्मण का कुशल पूछ रही हूँ।

वनदेवता वासन्ती द्वारा राम के वनवास के बाद, फिर से जनस्थान में आने एवं उसके वनप्रदेशों को उपकृत करने के भाव को लेकर प्रसन्नता व्यक्त करने तथा वन के वृक्षों के फूल एवं फलों को प्रदान करके, उनके स्वागत का उल्लेख करने से महाकवि भवभूति का भारतीय संस्कृति में अगाध विश्वास व्यक्त हुआ है, जिससे उनकी प्रबल राष्ट्रीय भावना की भी अभिव्यक्ति हुई है।

रामः— (आत्मगतम्) **अये! महाराजेति निष्प्रणयमामन्त्रणपदम्। सौमित्रिमात्रके वाष्पस्खलिताक्षरः कुशलप्रश्नः। तथा मन्ये विदितसीता—वृत्तान्तेयमिति।** (प्रकाशम्) **आः कुशलं कुमारलक्ष्मणस्य।**

वासन्ती— (रुदती) **अयि देव! किं परं, दारुणः खल्वसि।**

सीताः— **सखि वासन्ति! किं त्वमेवं वादिनी भवसि? पूजार्हः सर्वस्यार्यपुत्रः विशेषतो मम प्रियसख्याः।**[1]

वासन्ती—

त्वं जीवितं त्वमसि मे हृदयं द्वितीयं,
त्वं कौमुदी नयनयोरमृतं त्वमंगे।
इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां
तामेव शान्तमथवा किमतः परेण।।26।।

(अन्वयः— त्वम् जीवितम्, त्वम् मे द्वितीयम् हृदयम्, त्वम् नयनयोः कौमुदी, त्वम् अंगे अभृतम् असि, इत्यादिभिः प्रिय—शतैः मुग्धाम् अनुरुध्य, ताम् एव अथवा शान्तम्, अतः परेण किम्?।।26।।)

(इति मुह्यति)

तमसा— **स्थाने वाक्यनिवृत्तिर्मोहश्च।**

रामः— **सखि! समाश्वसिहि समाश्वसिहि।**

वासन्ती— (समाश्वस्य) **तत्किमिदमकार्यमनुष्ठितं देवेन?**

सीता— सखि वासन्ति! विरम, विरम।[2]

रामः—**लोको न मृष्यतीति।**

वासन्ती— **कस्य हेतोः?**

रामः— **स एव जानाति किमपि।**

तमसा— **चिरादुपालम्भः।**

वासन्ती—

अयि कठोर! यशः किल ते प्रियं,
किमयशो ननु घोरमतः परम्?
किमभवद्विपिने हरिणदृशः,
कथय नाथ! कथं बत मन्यसे?।।27।।

---

[1] . सहि वासन्दि! किं तुमं एव्वंवादिणी होसि? पूआरुहो सव्वस्स अज्जउत्तो विसेसदो मह पिअसहीए।

[2] . सहि वांसन्दि! विरम, विरम।

राम— (अपने मन में) अरे! महाराज, यह सम्बोधन शब्द प्रेम से रहित है और अश्रुओं के कारण, अस्पष्ट अक्षरों से युक्त गदगद् स्वर से केवल लक्ष्मण के विषय में ही कुशल प्रश्न किया गया है, इससे मैं अनुमान करता हूँ कि यह वासन्ती सीता के समाचार से परिचित है। (स्पष्टरूप से) हाँ, कुमार लक्ष्मण कुशल हैं।

वासन्ती— (रोती हुई) अरे, देव! अधिक क्या? निश्चय ही, आप अत्यधिक कठोर हैं।

सीता— हे सखि वासन्ति! तुम इसप्रकार क्यों कह रही हो? आर्यपुत्र तो सभी के पूज्य हैं, विशेषरूप से मेरी प्रियसखी के।

वासन्ती— **तुम मेरी प्राण हो, तुम मेरा दूसरा हृदय हो, तुम मेरे नेत्रों की चाँदनी हो तथा तुम मेरे अंगों के लिए अमृत हो, इत्यादि सैंकड़ों चापलूसी से भरे हुए, वाक्यों से उस भोली—भाली सीता को बहकाकर आपने उसी को...... अथवा रहने दो, इससे आगे कहने से क्या लाभ?।। 26।।** (ऐसा कहकर मूर्च्छित हो जाती है)

तमसा— वाक्य की समाप्ति तथा मूर्च्छा दोनों उचित स्थान पर ही हुई हैं।

राम— सखि! धैर्य धारण करो, धैर्य धारण करो।

वासन्ती— (आश्वस्त होकर) तो आपने ऐसा अनर्थ क्यों कर दिया?

सीता— सखि वासन्ति! बस भी करो, रहने दे।

राम— लोक सहन नहीं करता था, (इसलिए कर दिया)

वासन्ती— किसलिए?

राम— जो कुछ भी हो, उसे वही जानता है।

तमसा— (लोक के प्रति) यह उपालम्भ अत्यन्त विलम्ब से दिया गया है।

वासन्ती— **हे कठोर हृदय राम! आपको यश अत्यधिक प्रिय है, किन्तु इससे अधिक कठोर अपयश और दूसरा क्या होगा?** (कि आपने निरपराध कठोर गर्भा उस सीता का परित्याग कर दिया) **मृग के समान नेत्रों वाली उस सीता का वन में क्या हुआ? नाथ! कुछ तो कहिए, आप क्या विचार कर रहे हैं? हाय, अत्यन्त दुःख है** (बत)।**।27।।**

(अन्वयः— अयि कठोर! यशः ते प्रियम् किल, ननु अतः परम् घोरम् अयशः किम्? हरिण–दृशः विपिने किम् अभवत्? नाथ! कथय कथम् मन्यसे? बत।।27।।)

सीता— सखि वासन्ति! त्वमेव दारुणा कठोरा च। यैवं प्रलपन्तं प्रलापयसि।[1]

तमसा— प्रणय एवं व्याहरति शोकश्च।

रामः— सखि! किमत्र मन्तव्यम्?

त्रस्तैकहायनकुरंगविलोलदृष्टे–
स्तस्याः परिस्फुरितगर्भभरालसायाः।
ज्योत्स्नामयीव मृदुबालमृणालकल्पा,
क्रव्याद्भिरंगलतिका नियतं विलुप्ता।।28।।

(अन्वयः— त्रस्त–एक–हायन–कुरंग–विलोल–दृष्टेः, परिस्फुरित–गर्भ–भर–आलसायाः तस्याः, मृदु–बाल–मृणाल–कल्पा, ज्योत्स्ना–मयी इव अंग–लतिका क्रव्याद्भिः नियतम् विलुप्ता।।28।।)

सीता— आर्यपुत्र! ध्रिये, एषा ध्रिये।[2]

रामः— हा प्रिये जानकि! क्वासि?

सीता— हा धिक्, हा धिक्! अन्य इवार्यपुत्रः प्रमुक्तकण्ठं प्ररुदितो भवति।[3]

तमसा— वत्से! साम्प्रतिकमेवैतत्। कर्तव्यानि खलु दुःखितै–र्दुखनिर्धारणानि।

पूरोत्पीडे तटाकस्य, परीवाहः प्रतिक्रिया।
शोकक्षोभे च हृदयं, प्रलापैरेव धार्यते।।29।।

(अन्वयः— तटाकस्य पूर–उत्पीडे परीवाहः प्रतिक्रिया (अस्ति) हृदयम् च शोक–क्षोभे, प्रलापैः एव धार्यते।।29।।)

विशेषतो रामभद्रस्य बहुप्रकारकष्टो जीवलोकः।

इदं विश्वं पाल्यं विधिवदभियुक्तेन मनसा
प्रियाशोको जीवं कुसुममिव घर्मो ग्लपयति।
स्वयं कृत्वा त्यागं विलपनविनोदोऽप्यसुलभ–
स्तदद्याप्युच्छ्वासो भवति ननु लाभो हि रुदितम्।30।

---

1. सहि वासन्दि! तुमं एव्व दारुणा कठोरा अ। जा एव्वं पलवन्तं पलावेसि।
2. अज्जउत्त! धरामि एसा धरामि।
3. हद्धी हद्धी! अण्णो अज्जउत्तो पमुक्ककण्ठं परुण्णो होदि।

सीता— सखि! वासन्ति! तू ही दारुण एवं कठोर है, जो इस प्रकार प्रलाप करते हुए, आर्यपुत्र को अधिक प्रलाप करा (रुला) रही है।

तमसा— प्रेम और शोक ही ऐसा कहलवा रहा है।

राम— सखि! इसमें सोचना ही क्या है?

एक वर्ष के भयभीत मृग के छौने के समान चंचल नयनों वाली एवं फड़कते हुए गर्भ के भार से आलस्ययुक्त सीता की चन्द्रिकामयी, कमल के समान कोमल काया, निश्चय ही, वन में मांस खाने वाले, प्राणियों द्वारा विनष्ट कर दी गयी होगी।।28।।

सीता— आर्यपुत्र! मैं तो यहीं पर धरी हूँ, यहीं धरी (विद्यमान) हूँ।

राम— हा प्रिये! जानकि! कहाँ हो?

सीता— हाय, धिक्कार है, धिक्कार है। आर्यपुत्र तो साधारण व्यक्ति के समान गला फाड़कर रो रहे हैं।

तमसा— पुत्रि! यह उचित ही है, क्योंकि दुःखी लोगों को अपने दुःखों का निर्धारण करना ही चाहिए।

जैसे तालाब में पानी अधिक भर जाने पर, उसे निकाल देना ही उसकी सुरक्षा का उपाय (प्रतिक्रिया) होता है, उसीप्रकार शोक से व्याकुल हुए, हृदय को प्रलापों द्वारा ही धारण किया जा सकता है।।29।।

विशेषरूप से श्रीराम के लिए तो यह मनुष्यलोक अनेक प्रकार से कष्टकर है, क्योंकि—

सर्वप्रथम तो इन्हें अत्यन्त सावधान चित्त से विधिपूर्वक इस संसार का पालन करना है, उस पर भी प्रिया का शोक। जैसे— कड़ी धूप पुष्प को सुखा ड़ालती है, उसीप्रकार वह शोक इनके शरीर को सुखा रहा है। पत्नी का स्वयं ही परित्याग करने के कारण, उसे रोकर बहलाना भी मुश्किल है, तो भी अभी तक जीवन विद्यमान (उच्छ्वास) **है, उसके लिए निश्चय ही, रोना लाभकारी है।।30।।**

घर्मः

(अन्वयः— अभियुक्तेन मनसा इदम् विश्वम् विधिवत् पाल्यम्, कुसुमम् इव प्रिया—शोकः जीवम् ग्लपयति, स्वयम् त्यागम् कृत्वा, विलपन—विनोदः अपि असुलभः, तत् अद्य अपि उच्छ्वासः भवति, ननु रुदितम् लाभः हि।।30।।)

रामः— कष्टं भो! कष्टम्!

दलति हृदयं शोकोद्वेगाद् द्विधा तु न भिद्यते,
वहति विकलः कायो मोहं न मुचति चेतनाम्।
ज्वलयति तनुमन्तर्दाहः करोति न भस्मसात्
प्रहरति विधिर्मर्मच्छेदि न कृन्तति जीवितम्।।31।।

(अन्वयः— हृदयम् शोक—उद्वेगात् दलति, द्विधा तु न भिद्यते, विकलः कायः मोहम् वहति, चेतनाम् न मुचति, अन्तर्दाहः तनुम् ज्वलयति, भस्मसात् (तु) न करोति, मर्म—छेदि विधिः प्रहरति, जीवितम् न कृन्तति।।31।।)

हे भगवन्तः पौरजानपदाः!

न किल भवतां देव्याः स्थानं गृहेऽभिमतं तत—
स्तृणमिव वने शून्ये त्यक्ता न चाप्यनुशोचिता।
चिरपरिचितास्ते ते भावास्तथा द्रवयन्ति मा—
मिदमशरणैरद्यास्माभिः प्रसीदत रुद्यते।।32।।

(अन्वयः— देव्याः गृहे स्थानम् भवताम् न अभिमतम् किल, ततः तृणम् इव शून्ये वने त्यक्ता, न च अनुशोचिता अपि, चिर—परिचिताः ते—ते भावाः माम् तथा द्रवयन्ति, अद्य अशरणैः अस्माभिः इदम् रुद्यते, प्रसीदत ।।32।।)

वासन्ती— (स्वगतम्) **अतिगभीरमापूरणं मन्युभारस्य।** (प्रकाशम्) **देव! अतिक्रान्ते धैर्यमवलम्ब्यताम्।**

रामः— किमुच्यते, धैर्यमिति?

देव्याः शून्यस्य जगतो, द्वादशः परिवत्सरः।
प्रणष्टमिव नामापि न च रामो न जीवति?।।33।।

(अन्वयः— देव्याः शून्यस्य जगतः द्वादशः परिवत्सरः (वर्तते), नाम अपि प्रणष्टम् इव (जातम्) रामः च न जीवति?, (इति) न।।33।।)

सीताः— **अपह्रिये च मोहितेव एतैरार्यपुत्रस्य प्रियवचनैः।**[1]

---

[1]. ओहरामि अ मोहिआ विअ एदेहि अज्जउत्तस्स पिअवअणेहिं।

राम— अरे! कष्ट है, अत्यधिक कष्ट है।

हृदय शोक के वेग से विदीर्ण हो रहा है, किन्तु दो टुकड़ों में विभक्त नहीं होता है। शोक से व्याकुल हुआ शरीर, मोह को धारण कर रहा है, किन्तु चेतना को नहीं छोड़ रहा है। इसीप्रकार यह शरीर अन्तःकरण के सन्ताप से जल रहा है, परन्तु इसे भस्मसात् नहीं करता है। इसके अतिरिक्त मर्मस्थलों पर आघात करने वाला, भाग्य प्रहार तो कर रहा है, किन्तु इस जीवन को विनष्ट नहीं करता है।।31।।

हे सम्माननीय नागरिकों! जनपद निवासियों!

देवी सीता को घर में रखना, आप लोगों को निश्चय ही अभीष्ट नहीं हुआ, इसीलिए उसे मैंने, तिनके के समान सूने वन में छोड़ दिया और उसके लिए कोई शोक भी नहीं किया, किन्तु आज चिरकाल से परिचित वे—वे मनोभाव मुझे इसप्रकार गला ड़ाल रहे हैं। इसीलिए आज मैं अशरण के समान रो रहा हूँ, आप लोग प्रसन्न होइए।।32।।

वासन्ती— (मन में) शोक का भार अत्यधिक बढ़ गया है (प्रकट में) महाराज! बीती हुई बातों के विषय में धैर्य धारण करें।

राम— क्या कहती हो? धैर्य धारण करूँ?

देवी सीता से शून्य संसार का यह बारहवाँ वर्ष है, उसका तो मानो नाम भी नष्ट हो गया है, किन्तु फिर भी राम जीवित नहीं है? ऐसा नहीं है।।33।।

सीता— आर्यपुत्र के इन वचनों से मैं मोहित सी होकर, सुधबुध खो रही हूँ।

सीता के वियोग में राम के अन्तर्मन की गहन व्याकुलता का चित्र अत्यन्त सुन्दर तथा कारुणिक शैली में खींचा गया है। करुण रस की स्रोतस्विनी का मन्द—मन्द प्रवाह सहृदय सामाजिक के हृदय को पूर्णरूप से आप्यायित करने वाला है। निश्चय ही, महाकवि भवभूति के अतिरिक्त इसप्रकार का चित्र सम्पूर्ण संस्कृत साहित्य में उपलब्ध नहीं है। मूर्त उपमानों के माध्यम से अमूर्त आन्तरिक भावों की व्याख्या भी दर्शनीय कही जा सकती है।

तमसा– एवमेव वत्से!

नैताः प्रियतमा वाचः स्नेहार्द्राः शोकदारुणाः।
एतास्ता मधुनो धाराः, श्च्योतन्ति सविषास्त्वयि।।34।

(अन्वयः– एताः प्रियतमाः वाचः स्नेह–आर्द्राः शोक–दारुणाः न, (किन्तु) एताः ता सविषाः मधुनः धाराः, त्वयि श्च्योतन्ति ।।34।।)

रामः– अयि वासन्ति! मया खलु–

यथा तिरश्चीनमलातशल्यं
प्रत्युप्तमन्तः सविषश्च दन्तः।
तथैव तीव्रो हृदि शोकशंकु–
र्मर्माणि कृन्तन्नपि किं न सोढः?।।35।।

(अन्वयः– यथा अन्तः प्रत्युप्तम्, तिरश्चीनम्, अलात–शल्यम् सविषः, दन्तः च तथा एव तीव्रः, मर्माणि कृन्तन् अपि, हृदि शोक–शंकुः किम् न सोढः?।।35।।)

सीता– एवमपि मन्दभागिन्यहं या पुनरायासकारिणी आर्यपुत्रस्य।[1]

रामः– एवमतिगूढस्तम्भितान्तःकरणस्यापि मम संस्तुतवस्तुदर्शनाद्यायमावेगः। तथा हि–

वेलोल्लोलक्षुभितकरुणोज्जृम्भणस्तम्भनार्थं,
यो यो यत्नः कथमपि समाधीयते तं तमन्तः।
भित्वा भित्वा प्रसरति बलात्कोऽपि चेतोविकार–
स्तोयस्येवाप्रतिहतरयः सैकतं सेतुमोघः।।36।।

(अन्वयः– वेला–उल्लोल–क्षुभित–करुणा–उज्जृम्भण–स्तम्भनार्थम्, यः यः यत्नः कथम् अपि समाधीयते, तम् तम् कः अपि चेतः विकारः, अप्रतिहत–रयः तोयस्य ओघः, सैकतम् इव अन्तः बलात् भित्वा भित्वा प्रसरति।।36।।)

सीता–आर्यपुत्रस्यैतेन दुर्वारदारुणारम्भेण दुःखसंयोगेन परिसुषितनिजदुःखं प्रमुक्तजीवितं मे हृदयं स्फुटति।[2]

1 एव्वं वि मन्दभाइणी अहं जा पुणो आआसआरिणी अज्जउत्तस्स।
2 अज्जउत्तस्स एदिणा दुव्वारदारुणारम्भेण दुःखसंजोएण परिमुसिअणिअदुःखं पमुक्कजीविअं मे हिअअं फुडइ।

तमसा– पुत्रि! ऐसा ही है–

ये वचन अत्यधिक प्रिय, स्नेह से शीतल एवं शोक के कारण कठोर नहीं है, अपितु ये तो वे विष से युक्त मधु की धाराएँ, तुम्हारे ऊपर टपक रही हैं।।34।।

राम– अयि वासन्ति! निश्चय ही, मैंने–

जिसप्रकार हृदय में अन्दर तक तिरछा धँसा हुआ, तपाने के कारण, लाल लोहे का कील एवं विष से युक्त दाँत, गहन वेदना को उत्पन्न करता है, उसीप्रकार इस असह्य और मर्मस्थलों को काट डालते हुए भी हृदय में प्रविष्ट हुए, शोकरूपी शंकु को क्या मैंने सहन नहीं किया?।।35।।

सीता– क्या मैं ऐसी मन्दभागिनी हूँ, जो आर्यपुत्र को फिर से दुःख देने वाली हो गयी हूँ?

राम– इसप्रकार अत्यधिक गुप्तरूप से अन्तःकरण को रोकने पर भी चिरपरिचित वस्तुओं को देखने से, मुझे यह शोक का आवेग हो गया है, क्योंकि

मर्यादा को लाँघने वाले, अन्तःकरण को मथ देने वाले, शोक के परिपाक को नियन्त्रित करने के लिए, जो–जो प्रयत्न मेरे द्वारा जैसे तैसे किया जाता है, उस–उस यत्न को कोई अनिर्वचनीय चित्त का विकार, न रोके जाने वाले वेग से युक्त, जलों के समूह द्वारा रेतीले पुल को तोड़कर फैलाने के समान, अन्दर प्रवेश करके, बलपूर्वक उसे भेदते हुए फैल जाता है।। 36।।

सीता– आर्यपुत्र के न रोके जाने वाले, इस दारुण शोक के संयोग से जीवन को त्यागकर, स्वयं के दुःख से रहित हुआ मेरा हृदय, फटा सा जा रहा है।

महाकवि भवभूति का शैलीगत वैशिष्ट्य है कि वे सूक्ष्म मनोभावों का चित्रण भी बड़ी खूबी के साथ करते हैं, उपर्युक्त अंश इस कथ्य का साक्षी है।

वासन्ती– (स्वगतम्) **कष्टमत्यासक्तो देवः। तदाक्षिपामि तावत्।** (प्रकाशम्) **चिरपरिचितानिदानीं जनस्थानभोगानवलोकनेन मानयतु देवः।**

रामः– एवमस्तु (इत्युत्थाय परिक्रामति)

सीता– संदीपन एव दुःखस्य प्रियसख्या विनोदनोपाय इति तर्कयामि।[1]

वासन्ती– देव देव!

अस्मिन्नेव लतागृहे त्वमभवस्तन्मार्गदत्तेक्षणः,
सा हंसैः कृतकौतुका चिरमभूद्गोदावरीसैकते।
आयान्त्या परिदुर्मनायितमिव त्वां वीक्ष्य बद्धस्तया,
कातर्यादरविन्दकुड्मलनिभो मुग्धः प्रणामांजलिः।।37।

(अन्वयः– अस्मिन् एव लता–गृहे त्वम्, तत् मार्ग–दत्त–ईक्षणः अभवः, सा हंसैः कृत–कौतुका, गोदावरी–सैकते चिरम् अभूत्, आयान्त्या तया त्वाम् परि–दुर्मनायितम् इव वीक्ष्य, कातर्यात् अरविन्द–कुड्मल–निभः मुग्धः प्रणाम–अंजलिः बद्धः ।।37।।)

सीता–दारुणासि वासन्ति! दारुणासि। या एतैर्हृदयमर्मोद्घाटितशल्यसंघट्टनैः पुनः पुनरपि मां मन्दभागिनीमार्यपुत्रं च स्मरयसि।[2]

रामः– अयि चण्डि जानकि! इतस्ततो दृश्यसे, नानुकम्पसे।

हा हा देवि स्फुटति हृदयं, ध्वसते देहबन्धः,
शून्यं मन्ये जगदविरलज्वालमन्तर्ज्वलामि।
सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा,
विष्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि? ।38।।

(अन्वयः– हा हा देवि! हृदयम् स्फुटति, देहबन्धः ध्वसते, जगत् शून्यम् मन्ये, अन्तः अविरल–ज्वालम् ज्वलामि सीदन् विधुरः अन्तरात्मा, **अन्धे** तमसि मज्जति इव, मोहः विष्वङ् स्थगयति, मन्दभाग्यः कथम् **करो**मि? ।38।।)

(इति मूर्च्छति)

सीता– हा धिक्, हा धिक्! पुनरपि मूढ आर्यपुत्रः।[1]

---

1. संदीवण एव्व दुःखस्स पिअसहीए विणोदणोवाओ त्ति तक्केमि।
2. दालुणासि वासन्ति! दालुणासि। जा एदेहिं हिअअमम्मुग्धाडिअसल्ल संघट्टनेहिं पुणोपुणोवि मं मन्दभाइणि अज्जउत्तं अ सुमरावेसि।

वासन्ती– (मन में) कष्ट है, महाराज अत्यधिक शोकाकुल हो गए हैं। इसलिए इनका ध्यान दूसरी ओर ले जाती हूँ। (प्रकट में) अब महाराज इन चिरपरिचित जनस्थान के प्रदेशों को देखकर, इन्हें सम्मानित करें।

राम– ऐसा ही होवे । (ऐसा कहकर उठकर घूमते हैं)

सीता– मैं ऐसा समझती हूँ कि आर्यपुत्र के दुःख को उद्दीप्त करना ही प्रिय सखी वासन्ती के मनोविनोद का साधन है।

वासन्ती– महाराज! महाराज!

यह वही लतागृह है, जहाँ आप मार्ग की ओर आँखें गड़ाकर प्रतीक्षा कर रहे थे, क्योंकि एक बार उस सीता को गोदावरी के रेतीले तट पर हंसों के साथ खेलते हुए देर हो गयी थी। आती हुई उसके द्वारा आपको कुछ खिन्न सा देखकर, उसने कातरता से कमल की कलियों के समान, सुन्दर प्रणामांजलि को बाँधा था।।37।।

सीता– हे वासन्ति! निश्चय ही, तुम अत्यधिक कठोर हो, कठोर हो, जो इन हृदयरूपी सन्धि–स्थलों से निकाली गयी, इन कीलों को बार–बार हिलाकर, मुझ अभागिन और आर्यपुत्र को याद दिला रही हो।

राम– अयि! अत्यन्त कुपित होने वाली, सीते! तुम इधर–उधर दिखायी तो दे रही हो, किन्तु मुझ पर अनुकम्पा नहीं कर रही हो?

हाय, हाय, देवि! तुम्हारे वियोग में हृदय फटा जा रहा है। शरीर के बन्धन ढ़ीले हो रहे हैं। सम्पूर्ण संसार को मैं शून्य मान रहा हूँ। मैं भीतर ही भीतर निरन्तर जला जा रहा हूँ। मेरा अन्तरात्मा मानो गहन अन्धकार में डूब रहा है और मोह चारों ओर से घेर रहा है। हाय, मन्दभाग्य वाला मैं अब क्या करूँ?।।38।।

(ऐसा कहकर मूर्च्छित हो जाता है)

सीता– हाय, धिक्कार है, धिक्कार है। आर्यपुत्र फिर से मूर्च्छित हो गए हैं।

---

1. हद्धी हद्धी! पुणोवि मुद्धो अज्जउत्तो।

वासन्ती– देव! समाश्वसिहि समाश्वसिहि।

सीता– आर्यपुत्र! मां मन्दभागिनीमुद्दिश्य सकलजीवलोकमांगलिकजन्मलाभस्य ते वारं वारं संशयितजीवितदारुणो दशापरिणाम इति हा हतास्मि।[1] (इति मूर्च्छति)

तमसा– वत्से! समाश्वसिहि समाश्वसिहि। पुनस्ते पाणिस्पर्शो रामभद्रस्य जीवनोपायः।

वासन्ती– कथमद्यापि नोच्छ्वसिति? हा प्रियसखि सीते! क्वासि! सम्भावयात्मनो जीवितेश्वरम्।

(सीता ससम्भ्रममुपसृत्य हृदि ललाटे च स्पृशति)

वासन्ती– दिष्ट्या प्रत्यापन्नचेतनो रामभद्रः।

रामः–

आलिम्पन्नमृतमयैरिव प्रलेपैरन्त–
र्वा बहिरपि वा शरीरधातून्।
संस्पर्शः पुनरपि जीवयनकस्मादा–
नन्दादपरमिवादधाति मोहम् ।।39।।

(अन्वयः– अमृतमयैः प्रलेपैः अन्तः वा, बहिः अपि वा, शरीर–धातून् आलिम्पन् इव, जीवयन्, अकस्मात् संस्पर्शः, पुनः अपि आनन्दात् अपरम् मोहम् इव आदधाति ।।39।।)

वासन्ती– कथमिव?

रामः– सखि! किमन्यत्? पुनरपि प्राप्ता जानकी।

वासन्ती– अयि देव रामभद्र! क्व सा?

रामः– (स्पर्शसुखमभिनीय) पश्य, नन्वियं पुरत एव।

वासन्ती– अयि देव रामभद्र! किमिति मर्मच्छेददारुणैरतिप्रलापैः प्रियसखीविपत्तिदुःखदग्धामपि मां पुनः पुनर्मन्दभाग्यां दहसि?

सीता– अपसर्तुमिच्छामि। एष पुनः चिरप्रणयसम्भारसौम्यशीतलेन आर्यपुत्रस्पर्शेन दीर्घदारुणमपि झटिति सन्तापमुल्लाघयता वज्रलेपोपनद्ध इव पर्यस्तव्यापार आसंजित इव मेऽग्रहस्तः।[1]

---

[1]. अज्जउत्त! मं मन्दभाइणि उद्दिसिअ सअलजीवलोअमंगलि अजम्मलाहस्स दे वारं वारं संसइदजीविअदालुणोदशापरिणामो त्ति हा हदह्मि।

वासन्ती– महाराज! धैर्य धारण कीजिए, धैर्य धारण कीजिए।

सीता– आर्यपुत्र! मुझ मन्दभागिनी को लक्ष्य करके, सम्पूर्ण संसार के कल्याण के लिए जन्म लेने वाले, आपका जीवन बार–बार भयंकर परिणाम वाला हो रहा है, इसलिए अभागिनी मैं तो मारी गयी।

(ऐसा कहकर मूर्च्छित हो जाती है)

तमसा– पुत्रि! धैर्य धारण करो, धैर्य धारण करो। फिर से तुम्हारे हाथ का स्पर्श ही राम के जीवन का उपाय है।

वासन्ती– क्या इस समय भी श्वास नहीं ले रहे हैं? हाय, प्रिय सखि! सीते! तुम कहाँ हो? अपने प्राणेश्वर को कृतार्थ करो।

(सीता घबराहटपूर्वक पास जाकर हृदय और मस्तक पर स्पर्श करती है)

वासन्ती– सौभाग्य से रामभद्र फिर से सचेत हो गए हैं।

राम– **शरीर के भीतर एवं बाहर की धातुओं पर मानो अमृतमय लेप करता हुआ, जीवन प्रदान करता हुआ, अकस्मात् किया हुआ यह स्पर्श, फिर से आनन्द को उत्पन्न करके, मानो दूसरे मोह को पैदा कर रहा है।।39।।**

वासन्ती– वह भला कैसे?

राम– हे सखि! और क्या? जानकी फिर से प्राप्त हो गयी है।

वासन्ती– अरे, महाराज राम! वह कहाँ है?

राम– (स्पर्श के सुख का अभिनय करके) देखो, यह सामने ही तो है।

वासन्ती– अरे, महाराज श्रीराम! मर्मस्थलों का छेदन करने वाले, अत्यधिक दारुण इन विलापों से, सखी के दुःख से दग्ध हुई मुझ मन्दभागिनी को क्यों जला रहे हो?

सीता– मैं दूर हटना चाहती हूँ, किन्तु बहुत दिनों से एकत्र हुए, प्रेम के कारण आनन्द प्रदान करने वाले, सौम्य, शीतल, दीर्घकालिक दारुण शोक को शीघ्र ही दूर करने वाले, आर्यपुत्र के स्पर्श से मानो

---

[1]. ओसरिदुं इच्छम्मि! एसो उण चिरप्पण असंभारसौम्मसीअलेण अज्जउत्तप्परिसेण दीहदारुणंवि झत्ति संदावं उल्लाहअन्तेण वज्जलेहावणद्धो विअ परिअद्धवावारो आसंजिओ विअ मे अग्गहत्थो।

रामः–सखि! कुतः प्रलापः?

गृहीतो यः पूर्वं परिणयविधौ कंकणधरः।
सुधासूतेः पादैरमृतशिशिरैर्यः परिचितः।।

सीता– आर्यपुत्र! स एवेदानीमसि त्वम्?[1]

रामः–

स एवायं तस्यास्तदितरकरौपम्यसुभगो।
मया लब्धः पाणिर्ललितलवलीकन्दलनिभः।।40।

(अन्वयः– पूर्वम् परिणय–विधौ कंकण–धरः यः गृहीतः सुधा–सूतेः, अमृत–शिशिरैः पादैः यः परिचितः, ललित–लवली–कन्दल–निभः तत् इतर–कर–औपम्य–सुभगः सः एव अयम् तस्याः पाणिः मया लब्धः।।40।।)

(इति गृह्णाति)

सीता– हा धिक् हा धिक्! आर्यपुत्रस्पर्शमोहितायाः प्रमादो मे संवृत्तः।[2]

रामः– सखि वासन्ति! आनन्दमीलितः प्रियास्पर्शसाध्वसेन परवानस्मि। तत्त्वमपि धारय माम्।

वासन्ती– कष्टमुन्माद एव।

(सीता ससम्भ्रमं हस्तमाक्षिप्यापसर्पति)

रामः– धिक् प्रमादः

करपल्लवः स तस्याः, सहसैव जडो जडात्परिभ्रष्टः।
परिकम्पिनः प्रकम्पी, करान्मम स्विद्यतः स्विद्यन्।।41।

(अन्वयः– जडः, प्रकम्पी, स्विद्यन्, तस्याः सः कर–पल्लवः जडात्, परिकम्पिनः, स्विद्यतः, मम करात् सहसा एव परिभ्रष्टः।।41।।)

सीता– हि धिक् हा धिक्! अद्याप्यनुबद्धबहुघूर्णमानवेदनं न संस्था– पयाम्यात्मानम्।[3]

तमसा– (सस्नेहकौतुकस्मितं निर्वर्ण्य)

---

1. अज्जउत्त! सो एव्व दाणिंसि तुमम्?
2. हद्धी हद्धी! अज्जउत्तप्फरिसमोहिदाए पमादो मे संवुत्तो।
3. हद्धी हद्धी अज्जवि अणुबद्धबहुघुम्मन्तवेअणं ण संठावेमि अत्ताणम्।

वज्र के लेप से जड़ा हुआ, निश्चेष्ट हुआ, मेरे हाथ के आगे का भाग आर्यपुत्र से चिपक सा गया है।

राम– सखि! प्रलाप कहाँ हैं?

जिसे पहले मैंने विवाह की विधि में कंगन धारण किए हुए पकड़ा था और जो चन्द्रमा की अमृतमय किरणों से परिचित था, ..

सीता– क्या आप अब भी वही हैं?

राम– सुन्दर लवली के अंकुर के समान, उसके दूसरे हाथ की उपमा से सुन्दर, वही यह सीता का हाथ, मेरे द्वारा प्राप्त कर लिया गया है।।40।।

सीता–हाय, धिक्कार है, धिक्कार है, आर्यपुत्र के स्पर्श से मोहित होने के कारण, मुझसे प्रमाद हो गया है।

राम– सखि वासन्ति! प्रिया के स्पर्श के आनन्द से उत्पन्न होने वाली, मन की हलचल के कारण, मैं पराधीन हो गया हूँ, इसलिए तुम ही मुझे सम्भालो।

वासन्ती– कष्ट है, यह तो उन्माद ही है।

(सीता घबराहटपूर्वक हाथ खींचकर दूर हट जाती है)

राम– अहो, धिक्कार है, प्रमाद हो गया।

जड़, कम्पन से युक्त, पसीने वाला, सीता का वह कोमल किसलय सदृश हाथ, मेरे जड़, कम्पित एवं पसीना आए हुए हाथ से अचानक ही छूट गया है।।42।।

सीता– हाय, धिक्कार है, धिक्कार है। अत्यधिक एवं बार–बार उत्पन्न होने वाली, निरन्तर वेदना के कारण, मैं अपने आपको सम्भाल नहीं पा रही हूँ।

तमसा– (स्नेह, कौतुक एवं मुस्कराहट पूर्वक देखकर)

महाकवि की उपमा योजना दर्शनीय है। प्रस्तुत अंक में ही ऐसे अनेक स्थल हैं, जो सहृदय को अपने उपमा सौन्दर्य से आह्लादित करते हैं। लवली लता के अंकुर के साथ, सीता के हाथ की उपमा अत्यन्त मनोरम बन पड़ी है।

सस्वेदरोमांचितकम्पिताङ्गी,
जाता प्रियस्पर्शसुखेन वत्सा।
मरुन्नवाम्भः परिधूतसिक्ता,
कदम्बयष्टिः स्फुटकोरकेव।।42।।

(अन्वयः– वत्सा, प्रिय–स्पर्श–सुखेन, मरुत्–नव–अम्भः–परिधूत–सिक्ता, स्फुट–कोरका, कदम्ब–यष्टिः इव सस्वेद–रोमांचित–कम्पित–अङ्गी जाता ।।42।।)

सीता– (स्वगतम्) **अवशेनैतेनात्मना लज्जापितास्मि भगवत्या तमस्या। किमिति किलैषा मंस्यत 'एष परित्याग एषोऽभिषंग' इति।**[1]

रामः– (सर्वतोऽवलोक्य) **हा कथं नास्त्येव? नास्त्येव? नन्वकरुणे वैदेहि!**

सीता– अकरुणास्मि, यैवंविधं त्वां पश्यन्त्येव जीवामि।[2]

रामः– क्वासि प्रिये? देवि! प्रसीद प्रसीद। न मामेवंविधं परित्य–क्तुमर्हसि।

सीता– अयि आर्यपुत्र! विप्रतीपमिव।[3]

वासन्ती– देव! प्रसीद प्रसीद। स्वेनैव लोकोत्तरेण धैर्येण संस्तम्भयातिभूमिगतमात्मानम्। कुत्र मे प्रियसखी?

रामः– व्यक्तं नास्त्येव। कथमन्यथा वासन्त्यपि न पश्येत्? अपि खलु स्वप्न एष स्यात्? न चास्मि सुप्तः। कुतो रामस्य निद्रा? सर्वथापि स एवैष भगवाननेकबारपरिकल्पितो विप्रलम्भः पुनः पुनरनुबध्नाति माम्।

सीता– भयैव दारुणया विप्रलब्धः आर्यपुत्रः।[4]

वासन्ती– देव! पश्य पश्य।

पौलस्त्यस्य जटायुषा विघटितः कार्ष्णायसोऽयं रथ–
स्ते चैते पुरतः पिशाचवदनाः कंकालशेषाः खराः।
खड्गच्छिन्नजटायुपक्षतिरितः सीतां चलन्तीं वह–
न्नन्तर्व्यापृतविद्युदम्बुद इव द्यामभ्युदस्थादरिः।।43।।

---

[1]. अवसेन एदेण अत्ताणएण लज्जाविदह्मि भअवदीए तमसाये। किंति किल एसा भणिस्सदि– एसो परिच्चाओ, एसो अहिसंगेत्ति।

[2]. अकरुणह्मि, जा एव्वंविहं तुमं पेक्खन्दी एव जीवेमि।

[3]. अयि अज्ज्उत्त! विप्पदीवं विअ।

[4]. मए एव्व दारुणाए विप्पलद्धो अज्जउत्तो।

पुत्री सीता, प्रियतम राम के स्पर्शरूपी सुख से, वायु द्वारा कँपायी गयी, पहली वर्षा के जल से सींची गयी, विकसित कलियों से युक्त कदम्ब की शाखा के समान, पसीने, रोमांच और कम्प वाले अंगों से युक्त हो गयी है।।42।।

सीता– (मन में) मेरे शरीर की इस विवशता के कारण, भगवती तमसा द्वारा मैं लज्जित की गयी हूँ, क्योंकि ये भी क्या विचार कर रही होंगी, कहाँ तो वह परित्याग और कहाँ यह आसक्ति?

राम– (चारों ओर देखकर) हाय, क्या नहीं है? अयि! अकरुणे वैदेहि!

सीता– निश्चय ही, मैं निर्दय हूँ, जो इसप्रकार दुःखी आपको देखती हुई भी जी रही हूँ।

राम– प्रिये, सीते! तुम कहाँ हो, प्रसन्न होओ, प्रसन्न होओ। तुम मुझे इसप्रकार त्यागने में समर्थ नहीं हो।

सीता– आर्यपुत्र, यह तो आप उलटा ही कह रहे हैं।

वासन्ती– महाराज, प्रसन्न होइए, प्रसन्न होइए। अपने ही लोकोत्तर धैर्य से अत्यधिक दूर गए हुए, आप स्वयं को सम्भालिए। मेरी प्रिय सखी सीता यहाँ पर कहाँ है?

राम– सचमुच ही वह नहीं है? नहीं तो क्या वासन्ती भी उसे न देख पाती? क्या यह स्वप्न है? किन्तु मैं सोया हुआ भी नहीं हूँ, क्योंकि राम को निद्रा कहाँ? निःसन्देह अनेक बार प्रकल्पित अत्यधिक शक्ति–शाली वही यह विरह मेरा बार–बार अनुसरण कर रहा है।

सीता– कठोर हृदय वाली, मैंने ही आर्यपुत्र को धोखा दिया है।

वासन्ती– महाराज! देखिए, देखिए।

यह जटायु द्वारा तोड़ा गया, लोहे से बनाया गया, रावण का रथ है और ये वे सामने पिशाचों के मुँह वाले कंकाल–शेष, उसके रथ के गधे हैं। यहीं से खड्ग से जटायु के पंखों को काटकर शत्रु रावण, काँपती हुई सीता को अन्दर ही चमकती हुई विद्युत् से युक्त, मेघ के समान लेकर, आकाश में उड़ गया था।।43।।

(अन्वयः– अयम् जटायुषा विघटितः, पौलस्त्यस्य कार्ष्णायसः रथः एते ते पुरतः कंकाल–शेषाः पिशाच–वदनाः खराः, इतः खड्ग–छिन्न–जटायु–पक्षतिः अरिः चलन्तीम् सीताम् वहन्, अन्तः व्यापृत–विद्युत् अम्बुदः इव द्याम् अभ्युदस्थात् ।।43।।)

सीता– (सभयम्) आर्यपुत्र! तातो व्यापाद्यते। तस्मात्परित्रायस्व परित्रायस्व। अहमप्यपह्रिये।[1]

रामः– (सेवगमुत्थाय) आः पाप! तातप्राणसीतापहारिन् लंकापते! क्व यास्यसि?

वासन्ती– अयि देव राक्षसकुलप्रलयधूमकेतो! किमद्यापि ते मन्युविषयः?

सीता– अह्मो! उद्भ्रान्तास्मि।[2]

रामः– अन्य एवायमधुना विपर्ययो वर्तते।

उपायानां भावादविरलविनोदव्यतिकरै–
र्विमर्दैर्वीराणां जगति जनितात्यद्भुतरसः।
वियोगो मुग्धाक्ष्याः स खलु रिपुघातावधिरभू–
त्कटुस्तूष्णीं सह्यो निरवधिरयं तु प्रविलयः।।44।।

(अन्वयः– उपायानाम् भावात्, अविरल–विनोद–व्यतिकरैः वीराणाम् विमर्दैः, जगति जनित–अति–अद्भुत–रसः मुग्धाक्ष्याः सः वियोगः, रिपुघात–अवधिः अभूत् खलु, कटुः तूष्णीम् सह्यः अयम् तु प्रविलयः निरवधिः।।44।।)

सीता– बहुमानितास्मि पूर्वविरहे। निरवधिरिति हतास्मि।[3]

रामः– कष्टं भोः!

व्यर्थं यत्र कपीन्द्रसख्यमपि मे, वीर्यं हरीणां वृथा,
प्रज्ञा जाम्बवतो न यत्र, न गतिः पुत्रस्य वायोरपि।

---

1. अज्जउत्त! तादो वावादीअदि। ता परित्ताहि परित्ताहि। अहं वि अवहरिज्जामि।
2. अह्महे! उब्भत्तह्मि।
3. बहुमाणिदाह्म पुव्वविरहे। णिरवधित्ति हा हदह्मि

सीता– (भयपूर्वक) आर्यपुत्र! तात जटायु मारे जा रहे हैं और मेरा हरण हो रहा है। इसलिए रक्षा करो, रक्षा करो।

राम– (वेगपूर्वक उठकर) तात जटायु के प्राण तथा सीता का अपहरण करने वाले, लंकाधिपति रावण! तू कहाँ जाएगा?

वासन्ती– अयि, महाराज! राक्षसों के वंश का विनाश करने में अग्नि के समान! क्या आज भी राक्षस आपके क्रोध के विषय हैं?

सीता– आश्चर्य है, मैं भी घबरा गयी हूँ।

राम– अब तो यह कुछ दूसरा ही परिवर्तन हो गया है

साधनों के होने से, निरन्तर विनोद व्यापारों से युक्त, वीरों के युद्धों से संसार में अत्यधिक अद्भुत रस को उत्पन्न करने वाला, भोले–भाले नेत्रों वाली, सीता का वह वियोग निश्चय ही, शत्रु के वधपर्यन्त ही रहने वाला था, जबकि कठोर एवं चुपचाप सहन करने योग्य, यह वियोग, तो अवधि से रहित है।।44।।

सीता–पहले के विरह से तो मैं अत्यन्त सम्मानित हुई थी, किन्तु अवधि–शून्य इस वाक्य से तो मारी ही गयी हूँ।

राम– अरे कष्ट है,

हे प्रिये! जहाँ पर सुग्रीव के साथ मेरी मित्रता तथा वानरों का पराक्रम भी व्यर्थ है। जहाँ पर जाम्बवान् की बुद्धि और हनुमान् की गति भी नहीं है। जहाँ पर मार्ग बनाने में विश्वकर्मा का पुत्र नल भी समर्थ नहीं है एवं जहाँ पर मेरे प्रिय लक्ष्मण के बाण भी नहीं पहुँच सकते हैं, तुम ऐसे किस स्थान पर हो?।।45।।

वर्तमानकालिक वियोग तथा पूर्वकालिक वियोग को तुलनात्मक दृष्टि से प्रस्तुत किया गया है। राम की दबी हुई अन्तर्वेदना का सुन्दर चित्र दर्शनीय है। सीता का त्याग किए हुए राम को बारह वर्ष का दीर्घकालिक समय हो गया है, इतने लम्बे समय तक मर्यादा पुरुषोत्तम राम ने सीता–त्याग विषयक वेदना को राजकार्यों में व्यस्त रहते हुए, दबाए रखने का प्रशंसनीय कार्य किया है, किन्तु यहाँ आकर उपयुक्त वातावरण प्राप्त करके मानो वह फूट पडा है।

मार्गं यत्र न विश्वकर्मतनयः कर्तुं नलोऽपि क्षमः
सौमित्रेरपि पत्रिणामविषये तत्र प्रिये! क्वासि मे? ।45।

(अन्वयः– प्रिये! यत्र कपीन्द्र–सख्यम् अपि व्यर्थम्, हरीणाम् वीर्यम् वृथा, यत्र जाम्बवतः प्रज्ञा न, वायोः पुत्रस्य अपि गतिः न, यत्र विश्वकर्म–तनयः नलः अपि मार्गम् कर्तुम् न क्षमः, मे सौमित्रेः अपि पत्रिणाम् अविषये तत्र, क्व असि? ।।45।।)

सीता– **बहुमानितास्मि पूर्वविरहे।**[1]

रामः– **सखि वासन्ति! दुःखायैव सुहृदामिदानीं रामदर्शनम्। कियच्चिरं त्वां रोदयिष्यामि। तदनुजानीहि मां गमनाय।**

सीता– (सोद्वेगमोहं तमसामाश्लिष्य) **हा भगवति तमसे! गच्छतीदानीमार्यपुत्रः। किं करोमि?**[2] (इति मूर्च्छति)

तमसा– **वत्से जानकि! समाश्वसिहि समाश्वसिहि । विधिस्त्वानुकूलो भविष्यति तदायुष्मतोः कुशलवयोर्वर्षर्द्धिमंगलानि संपादयितुं भागीरथीपदान्तिकमेव गच्छावः।**

सीता– **भगवति! प्रसीद। क्षणमात्रमपि दुर्लभदर्शनं पश्यामि।**[3]

रामः– **अस्ति चेदानीमश्वमेधसहधर्मचारिणी मे।**

सीता– (साक्षेपम्) **आर्यपुत्र! का?**[4]

वासन्ती– **परिणीतमपि किम्?**

रामः– **नहि नहि। हिरण्मयी सीताप्रतिकृतिः।**

सीता– (सोच्छ्वाससास्रम्) **आर्यपुत्र! इदानीमसि त्वम्। अहो, उत्खातितमिदानीं मे परित्यागशल्यमार्यपुत्रेण।**[5]

रामः– **तत्रापि तावद्बाष्पदिग्धं चक्षुर्विनोदयामि।**

---

1. बहुमाणिदह्मि पुव्वविरहे।
2. हा भअवदि तमसे! गच्छदि दाणिं अज्जउत्तो किं करिस्सम्?
3. अभवदि! पसीद। खणमेत्तं वि दुल्लहदंसणं पेक्खामि
4. अज्जउत्त! का?
5. अज्जउत्त! दाणिं सि तुमम्। अह्महे, उक्खाइदं दाणिं मे परिच्चा असल्लं अज्जउत्तेणं।

सीता– पहले विरह से मैं अत्यधिक सम्मानित हुई हूँ।

राम– सखि वासन्ति! इस समय राम का दर्शन तो वस्तुतः मित्रों के दुःख के लिए ही है। मैं और कितनी देर तक तुम्हें रुलाऊँगा? इसलिए मुझे जाने की आज्ञा प्रदान करो।

सीता– (उद्वेग एवं मोह के साथ तमसा का आलिंगन करके) हाय, भगवति तमसे! अब आर्यपुत्र जा रहे हैं, क्या करूँ?

(यह कहकर मूर्च्छित हो जाती है)

तमसा– पुत्रि, जानकि! धैर्य धारण करो, धैर्य धारण करो। भाग्य तुम्हारे अनुकूल होगा। इसलिए हम दोनों आयुष्मान् कुश और लव की वर्षगाँठ के मंगलकार्यों के सम्पादन हेतु, भगवती भागीरथी के चरणों के समीप ही चलते हैं।

सीता– हे भगवति! प्रसन्न होइए। मैं क्षणभर के लिए दुर्लभ दर्शनों वाले, आर्यपुत्र को देख लेती हूँ।

राम– इस समय तो वह अश्वमेध यज्ञ की मेरी धर्मचारिणी है।

सीता– (आक्षेपपूर्वक) आर्यपुत्र! वह कौन है?

वासन्ती– क्या विवाह भी कर लिया है?

राम– नहीं, नहीं, सुवर्णमयी सीता की प्रतिमा।

सीता– (उच्छ्वासपूर्वक अश्रुओं के साथ) आर्यपुत्र! इससमय तुम वस्तुतः (एक पत्नीव्रती) हो। अहो, इस सगय आर्यपुत्र ने मेरे त्यागरूपी शल्य को उखाड़ दिया है।

राम– उस सीता की मूर्ति में ही अश्रुपूर्ण नेत्रों को बहलाता हूँ।

उपर्युक्त अंश में कवि ने प्रस्तुत 'छाया' अंक के नियोजन के महत्त्वपूर्ण उद्देश्य को प्रस्तुत किया है, क्योंकि **सीता के मन के अकारण ही त्यागने विषयक आक्रोश** को दूर करना, कवि का महत्त्वपूर्ण उद्देश्य था, जिसमें उन्होंने पूर्णरूप से सफलता प्राप्त की है, तभी तो देवी सीता भी यहाँ सहसा कह उठी हैं– 'अहो, इस समय आर्यपुत्र ने मेरे त्यागरूपी शल्य को उखाड़ दिया है।' जो राम–सीता के भावी मिलन में सहायक सिद्ध हुआ है। प्रस्तुत अंक का साफल्य दर्शनीय है।

सीता— धन्या खलु सा, यैवमार्यपुत्रेण बहुमन्यते यैवमार्यपुत्रं विनोदयन्त्याशाबन्धनं खलु जाता जीवलोकस्य।[1]

तमसा— (सस्मितस्नेहार्द्रं परिष्वज्य) अयि वत्से! एवात्मा स्तूयते।

सीता— (सलज्जम्) परिहसितास्मि भगवत्या।[2]

वासन्ती— महानयं व्यतिकरोऽस्माकं प्रसादः। गमनं प्रति यथा कार्यहानिर्न भवति तथा कार्यम्!

रामः— तथाऽस्तु।

सीता— प्रतिकूलेदानीं मे वासन्ती संवृत्ता।[3]

तमसा— वत्से! एहि गच्छावः।

सीता— एवं करिष्यावः।[4]

तमसा— कथं वा गम्यते। यस्यास्तव—

प्रत्युप्तस्येव दयिते, तृष्णादीर्घस्य चक्षुषः।
मर्मच्छेदोपमैर्यत्नैः, सन्निकर्षो निरुध्यते।।46।।

(अन्वयः— दयिते प्रत्युप्तस्य इव तृष्णा—दीर्घस्य (तव) चक्षुषः सन्निकर्षः मर्मच्छेद—उपमैः यत्नैः निरुध्यते।।46।।)

सीता— नमः सुकृतपुण्यजनदर्शनीयाभ्यामार्यपुत्रचरणकमलाभ्याम्।[5]

(इति मूर्च्छति)

तमसा— वत्से! समाश्वसिहि।

सीता— (आश्वस्य) कियच्चिरं वा मेघान्तरेण पूर्णचन्द्रदर्शनम्?[6]

तमसा— अहो संविधानकम्।

---

1 . धण्णा खु सा, जा एव्वं अज्जउत्तेण बहुमण्णीअदि। जा एव्वं अज्जउत्तं विणोदयन्दी आसाबन्धणं खु जादा जीअलोअस्स।
2 . परिहसिदह्मि भअवदीए।
3 . पडिऊल्ला दाणि मे वासन्दी संवुत्ता।
4 . एव्वं करम्ह।
5 . णमो सुकिदपुण्णजणदंसणिज्जाणं अज्जउत्तचलण कमलाणम्।
6 . किअच्चरं वा मेहान्तरेण पुण्णचन्ददंसणम्?

सीता— तब तो सचमुच ही वह धन्य है, जिसे आर्यपुत्र इतना मानते हैं और जो इसप्रकार आर्यपुत्र का मनोविनोद करती हुई, निश्चय ही संसार की आशा का आधार हो गयी है।

तमसा— (स्मित और स्नेहपूर्ण आर्द्रभाव से आलिंगन करके) अयि! पुत्रि, इसप्रकार तुम अपनी ही प्रशंसा कर रही हो?

सीता— (लज्जापूर्वक) भगवती ने मेरी हँसी उड़ा दी।

वासन्ती— आपका यह आगमन हमारे लिए महान् अनुग्रह है। प्रस्थान के प्रति जिसप्रकार कार्य में हानि न हो, उसीप्रकार करना चाहिए।

राम— वैसा ही होवे।

सीता— इस समय वासन्ती मेरे प्रतिकूल हो गयी है।

तमसा— पुत्रि! आओ, चलें।

सीता— ऐसा ही करते हैं।

तमसा— अथवा कैसे चला जाए? जिस तुम्हारे,

प्रिय राम में बोए हुए के समान, तृष्णा से दीर्घ नेत्रों का जो सान्निध्य है, वह मर्मस्थल में छेदने के समान, विभिन्न प्रकार के यत्नों के माध्यम से रोका जा रहा है।।46।।

सीता— पुण्यों का भलीप्रकार आचरण करने वाले, लोगों के दर्शनीय आर्यपुत्र के चरण—कमलों में नमस्कार है।

तमसा— पुत्रि! धैर्य धारण करो।

सीता— (आश्वस्त होकर) मेघ से घिरे हुए पूर्ण चन्द्र का दर्शन कितने समय तक होता है।

तमसा— अहो, कैसी घटनाएँ (रचना) घटी हैं?

राम से अलग होते हुए, अदृश्य देवी सीता की मनःस्थिति का सुन्दर चित्र कवि द्वारा प्रस्तुत किया गया है। शब्दों का चयन एवं उनका सुनियोजन दोनों ही प्रशंसनीय हैं।

एको रसः करुण एव निमित्तभेदा–
द्भिन्नः पृथक्पृथगिवाश्रयते विवर्तान्।
आवर्तबुदबुदतरंगमयान्विकारा–
नम्भो यथा, सलिलमेव हि तत्समस्तम्।।47।।

(अन्वयः– एकः करुणः रसः एव, निमित्त–भेदात् भिन्नः (सत्) पृथक्–पृथक् विवर्तान् आश्रयते इव, आवर्त–बुदबुद्–तरंग–मयान् विकारान् (आश्रयते) अम्भः यथा हि तत् समस्तम् सलिलम् एव।।47।।)

राम– विमानराज! इत इतः।

(सर्वे उत्तिष्ठन्ति)

तमसावासन्त्यौ– (सीतारामौ प्रति)

अवनिरमरसिन्धुः सार्धमस्मद्विधाभिः
स च कुलपतिराद्यश्छन्दसां यः प्रयोक्ता।
च मुनिरनुयातारुन्धतीको वसिष्ठ–
स्तव वितरतु भद्रं भूयसे मंगलाय।।48।।

(अन्वयः– अवनिः अस्मत् विधाभिः सार्धम् अमर–सिन्धुः, सः च कुलपतिः, यः छन्दसाम् आद्यः प्रयोक्ता, सः च अनुयाता अरुन्धतीकः वसिष्ठः मुनिः, तव भूयसे मंगलाय भद्रम् वितरतु ।।48।।)

(इति निष्क्रान्ताः सर्वे।)

।। इति महाकविभवभूतिविरचिते उत्तररामचरिते 'छाया' नाम तृतीयोऽङ्कः।।

•••

करुण रस ही एकमात्र मुख्य रस है। निमित्त घटना से यह अलग–अलग रूप धारण कर लेता है। जैसे–जल, भँवर, बुलबुले एवं तरंगादि, जबकि होता यथार्थ में सम्पूर्ण जल ही है।।47।।

रामः– हे विमानराज! इधर से, इधर से–

(सभी उठते हैं)

तमसा और वासन्ती– (सीता एवं राम के प्रति)–

पृथ्वी, देवों की नदी भगवती भागीरथी, हम जैसी नदियों के साथ और वे कुलपति वाल्मीकि, जो छन्दों के सर्वप्रथम प्रयोग करने वाले हैं तथा वे अरुन्धती द्वारा अनुगमन किए जाते हुए महर्षि वसिष्ठ आप सभी के प्रचुर कल्याण के लिए मंगल का वितरण करें।।48।।

(ऐसा कहकर सभी निकल जाते हैं)

।। इसप्रकार महाकवि भवभूति विरचित उत्तररामचरित में 'छाया' नामक तृतीय अंक का **डॉ. राकेश शास्त्री, बाँसवाड़ा** द्वारा किया हुआ हिन्दी अनुवाद पूर्ण हुआ।।

•••

उपर्युक्त अंश में महाकवि की करुणरस के विषय में मान्यता तथा दर्शकों के लिए प्रभूत कल्याणों को प्रदान करने वाली मंगलकामनाओं की सुन्दर प्रस्तुति की गयी है, जो सहृदय को आह्लादित करने वाली है।

।। श्रीः ।।

चतुर्थोऽङ्कः

(ततः प्रविशतस्तापसौ)

एकः— सौधातके! दृश्यतामद्य भूयिष्ठन्निधापितातिथिजनस्य समधिकारम्भरमणीयता भगवतो वाल्मीकेराश्रमपदस्य। तथाहि—

नीवारौदनमण्डमुष्णमधुरं सद्यः प्रसूतप्रिया—
पीतादभ्यधिकं तपोवनमृगः पर्याप्तमाचामति।
गन्धेन स्फुरता मनागनुसृतो भक्तस्य सर्पिष्मतः,
कर्कन्धूफलमिश्रशाकपचनामोदः परिस्तीर्यते।।1।।

(अन्वय— तपोवन—मृगः सद्यः प्रसूत—प्रिया—पीतात् अभ्यधिकम् उष्ण—मधुरम् नीवार—ओदन—मण्डम् पर्याप्तम् आचामति, सर्पिष्मतः भक्तस्य स्फुरता गन्धेन मनाक् अनुसृतः, कर्कन्धू—फल—मिश्र—शाक—पचन—आमोदः परिस्तीर्यते।।1।।)

सौधातकिः— स्वागतमनेकप्रकाराणां जीर्णकूर्चानामनध्यायकारणानां तपोधनानाम्।[1]

प्रथमः— (विहस्य) अपूर्वः खलु बहुमानहेतुर्गुरुषु सौधातके!

सौधातकिः— भो दण्डायन! किं नामधेय इदानीमेष महतः स्त्रीसार्थस्य धुरंधरोऽद्यातिथिरागतः?[2]

दण्डायनः— धिक्प्रहसनम्! नन्वयमृष्यश्रृंगाश्रमादरुन्धतीं पुरस्कृत्य महाराजदशरथस्य दारानधिष्ठाय भगवान् वसिष्ठः प्राप्तः। तत्किमेवं प्रलपसि?

---

1. साअदं अणेअपिआराणं जिण्णकुच्छाणं अणज्झाअकालणाणं तपोधणाणम्।
2. भो दण्डाअण! किंणामहेओ दाणिं एसो महत्तस्स इत्थिआसत्थस्स धुरंधरो अज्ज अदिहि आआदो?

चतुर्थ अङ्क

(उसके बाद दो तपस्वी प्रवेश करते हैं)

एक— सौधातकि! आज अनेक अतिथियों से युक्त, भगवान् वाल्मीकि के आश्रम की अनेक कार्यों से बढ़ी हुई शोभा को तो देखो, जैसा कि—

तपोवन का मृग शीघ्र ही ब्याई हुई मृगी के पीने से बचे हुए, नीवार से निर्मित भात के गरम—गरम, मधुर माँड को पर्याप्त मात्रा में पी रहा है। घी से युक्त भात के फैलते हुए सुगन्ध के साथ मिलकर, बेरी के फलों से मिश्रित शाक को पकाने की सुगन्धि भी चारों ओर फैल रही है।।1।।

सौधातकि— सफेद दाढ़ी तथा मूँछों वाले, अनध्याय के कारण—रूप, इन अनेक प्रकार के तपस्वियों का स्वागत है।

पहला— (हँसकर) हे सौधातकि! निश्चय ही, गुरुजनों के प्रति तुम्हारा यह आदरसूचक वाक्य अद्भुत ही है।

सौधातकि— अरे! दण्डायन, इस समय यह अत्यधिक बड़े स्त्री समूह के अग्रणी होकर आए हुए, इन अतिथि का क्या नाम है?

दण्डायन— तुम्हारे इस परिहास को धिक्कार है। अरे! ऋष्यश्रृंग के आश्रम से अरुन्धती को आगे करके, महाराज दशरथ की धर्मपत्नियों के साथ भगवान् वसिष्ठ आए हुए हैं, फिर तुम इसप्रकार का प्रलाप क्यों कर रहे हो?

सौधातकिः— हुं वसिष्ठः?[1]

दण्डायनः— अथ किम्?

सौधातकिः— मया पुनर्ज्ञातं कोऽपि व्याघ्र इव एष इति।[2]

दण्डायन— आः, किमुक्तं भवति?

सौधातकिः— येन परापतितेननैव सा वराकी कपिला कल्याणी बलात्कृत्य मडमडायिता।[3]

दण्डायनः— 'समांसो मधुपर्कः' इत्याम्नायं बहुमन्यमानाः श्रोत्रियाभ्यागताय वत्सतरीं महोक्षं वा पचन्ति गृहमेधिनः। तं हि धर्मं धर्मसूत्रकाराः समामनन्ति।

सौधातकिः— भो निगृहीतोऽसि।[4]

दण्डायनः— कथमिव?

सौधातकिः— येनागतेषु वसिष्ठमिश्रेषु वत्सतरी विशसिता। अद्यैव प्रत्यागतस्य राजर्षेर्जनकस्य भगवता वाल्मीकिना दधिमधुभ्यामेव निर्वर्तितो मधुपर्कः। वत्सतरी पुनर्विसर्जिता।[5]

दण्डायनः— अनिवृत्तमांसानामेवं कल्पं व्याहरन्ति केचित्। निवृत्तमांसस्तु तत्रभवान् जनकः।

सौधातकिः— किन्निमित्तम्?[6]

दण्डायनः— यदेव्याः सीतायास्तादृशं दैवदुर्विपाकमुपश्रुत्य वैखानसः संवृत्तः तस्य, कतिपयसंवत्सरश्चन्द्रद्वीपतपोवने तपस्तप्यमानस्य!

सौधातिकः— ततः किमित्यागतः?[7]

---

1. हु वसिट्ठो?
2. मए उण जाणिदं कोवि वग्घो विअ एसीत्ति।
3. जेण पराबडिदेण एव्व सा वराई कविला कल्लाणी बालामोडिअ मडमडाइआ।
4. भो, णिगिहोदोसि।
5. जेण आअदेसु वसिट्ठमिस्सेमु वच्छदरी विससिदा। अज्ज एव्व पंचाअदस्स राएसिणो जणअस्स भअवदा वम्मीइणा धहिमहूहिं एव णिव्वत्तिदो महुवक्को। वच्छतरी उण विसज्जिदा।
6. किं णिमित्तम्?
7. [illegible] किंति आअदो?

सौधातकि— अरे! क्या वसिष्ठ हैं?

दण्डायन— और क्या?

सौधातकि— मैंने तो समझा था कि यह कोई व्याघ्र के समान है।

दण्डायन— ओह! तुमने यह क्या कह दिया?

सौधातकि— जिनके आने के बाद ही, वह बेचारी कपिल वर्ण वाली बछिया, बलपूर्वक 'मडमड' शब्द वाली कर दी गयी।

दण्डायन—'अतिथि को मांस सहित मधुपर्क देना चाहिए', इत्यादि वेद–वाक्य को प्रमाण मानते हुए, गृहस्थ लोग वेदज्ञ अतिथि के लिए, बछिया या बूढ़े बैल को पकाते हैं। धर्मसूत्रकार इस धर्म को अनुमति प्रदान करते हैं।

सौधातकि— अरे! तुम तो पकड़े गए।

दण्डायन— वह कैसे?

सौधातकि— वह इसलिए कि आए हुए समादरणीय वसिष्ठ के लिए बछिया को मारा गया, जबकि भगवान् वाल्मीकि ने आज ही आए हुए, राजर्षि जनक का 'मधुपर्क' दही और शहद द्वारा सम्पादित किया है और बछिया को छोड़ दिया है।

दण्डायन— कुछ धर्मशास्त्रकार मांस का परित्याग न करने वालों के लिए इसप्रकार की विधि का उल्लेख करते हैं, किन्तु समादरणीय जनक ने तो मांस का परित्याग कर रखा है।

सौधातकि— किसलिए?

दण्डायन— इसलिए कि महाराज जनक, देवी सीता के भाग्य का उसप्रकार का दुष्परिणाम सुनकर, वानप्रस्थी हो गए हैं एवं चन्द्रद्वीप नामक तपोवन में तपस्या करते हुए उन्हें कई वर्ष बीत गए हैं।

सौधातकि— तब वे यहाँ पर क्यों आए हैं?

दण्डायनः— सम्प्रति च प्रियसुहृदं भगवन्तं प्राचेतसं द्रष्टुम्।

सौधातिकः— अप्यद्य सम्बन्धिनीभिः समं निर्वृत्तं दर्शनमस्य न वेति।[1]

दण्डायनः— सम्प्रत्येव भगवता वसिष्ठेन देव्याः कौसल्यायाः सकाशं भगवत्यरुन्धती प्रहिता। यथा 'स्वयमुपेत्य स्नेहादयं द्रष्टव्यः' इति।

सौधातकिः— यथैते स्थविराः परस्परमेव मिलिताः, तथावामपि वटुभिः सह मिलित्वानध्ययामहोत्सवं खेलन्तो मानयावः। अथ कुत्र स जनकः?[2]

दण्डायनः— तथायं प्राचेतसवसिष्ठावुपास्य सम्प्रत्याश्रमस्य बहिर्वृक्षमूलमधितिष्ठति। य एषः—

हृदि नित्यानुषक्तेन, सीताशोकेन तप्यते।
अन्तः प्रसृप्तदहनो, जरन्निव वनस्पतिः।।2।।

(**अन्वय—** हृदि नित्य—अनुषक्तेन, सीता—शोकेन अन्तः प्रसृप्त—दहनः जरन् वनस्पतिः इव तप्यते ।।2।।)

(इति निष्क्रान्तौ)

(इति मिश्रविष्कम्भः)

(ततः प्रविशति जनकः)

जनकः—

अपत्ये यत्तादृग्दुरितमभवत्तेन महता,
विषक्तस्तीव्रेण व्रणितहृदयेन व्यथयता।
पटुर्धारावाही नव इव चिरेणापि हि न मे,
निकृन्तन्मर्माणि क्रकच इव मन्युर्विरमति।।3।।

(**अन्वय—** अपत्ये यत् तादृक् दुरितम् अभवत्, महता तीव्रेण व्रणित—हृदयेन व्यथयता तेन विषक्तः पटुः धारावाही चिरेण अपि, नवः इव हि मे मन्युः क्रकचः इव मर्माणि निकृन्तन् न विरमति।।3।।)

---

1. अवि अज्ज सम्बन्धिणीहिं सम णिउत्तं दंसणंसे णवेत्ति?
2. जह एदे ट्ठविरा परप्परं एव्व मिलिदा, तह अह्मेवि वडुहिं सह मिलअ, अणज्झाअमहस्सवं खेलन्तो मणेम्ह। अह कुत्थ सो जणव।

दण्डायन— इस समय वे अपने प्रिय मित्र भगवान् वाल्मीकि को देखने के लिए आए हैं।

सौधातकि— आज उनका साक्षात्कार सम्बन्धियों के साथ हुआ है कि नहीं?

दण्डायन— भगवान् वसिष्ठ ने अभी महारानी कौशल्या के पास में अरुन्धती को भेजा है कि वे स्वयं आकर स्नेहपूर्वक इन (महाराज जनक) का दर्शन करें।

सौधातकि— जिसप्रकार ये वृद्ध लोग आपस में मिल गए हैं, उसी प्रकार हम दोनों भी ब्रह्मचारियों के साथ मिलकर, खेलते हुए अनध्याय के महोत्सव को मनाते हैं। इसके अलावा वे जनक कहाँ हैं?

दण्डायन— वे महर्षि वाल्मीकि एवं वसिष्ठ जी की पूजा करके, इस समय आश्रम के बाहर, वृक्ष के नीचे बैठे हुए हैं, जो ये—

हृदय में निरन्तर विद्यमान, सीता के शोक से, अन्दर ही अन्दर फैली हुई अग्नि से युक्त, पुराने वृक्ष के समान, सन्ताप का अनुभव कर रहे हैं।। 2।।

(ऐसा कहकर दोनों चले जाते हैं)

।। मिश्र विष्कम्भक।।

(उसके बाद जनक प्रवेश करते हैं)

जनक—

सन्तान के विषय में, जो उसप्रकार का लोकापवाद रूपी पाप लग गया था, अत्यधिक तीक्ष्ण एवं हृदय को घायल कर देने वाला, अत्यन्त व्यथित करने वाला, उससे पूर्णरूप से जुड़ा हुआ, प्रबलरूप में निरन्तर बहने वाला, चिरकाल के बाद आज भी वह मेरा शोक, मर्मस्थलों को आरे के समान चीरता हुआ, शान्त नहीं हो रहा है।।3।।

महाकवि भवभूति ने हृदय के गूढ़ भावों की अभिव्यक्ति के लिए नूतन उपमानों का प्रयोग किया है। यहाँ प्रयुक्त श्लोक तीन में हृदय के मर्मस्थलों को आरे से चीरने के उपमान द्वारा, निरपराध, पूर्णगर्भा पुत्री सीता के त्याग से उत्पन्न पिता जनक की आन्तरिक वेदना को सुन्दर एवं सटीक अभिव्यक्ति प्रदान की गयी है, जिसे महाकवि की सूक्ष्म मनोवैज्ञानिक दृष्टि के रूप में भी देख सकते हैं।

'कष्टम्? एवं नाम जरता दुःखेन च दुरासदेन, भूयः पराकसांतपनप्रभृतिभिस्तपोभिरात्तरसधातुरनवष्टम्भो नाद्यापि मम दग्धदेहः पतति। अन्धतामिश्रा ह्यसूर्या नाम ते लोकास्तेभ्यः प्रतिविधीयन्ते य आत्मघातिन इत्येवमृषयो मन्यन्ते। अनेकसंवत्सरातिक्रमेऽपि प्रतिक्षणपरिभावनास्पष्टनिर्भासः प्रत्यग्र इव न मे दारुणो दुःखसंवेगः प्रशाम्यति। अयि मातैर्देवयजनसंभवे सीते, ईदृशस्ते निर्माणभागः परिणतो येन लज्जया स्वच्छन्दमाक्रन्दितमपि न शक्यते।

हा पुत्रि!

अनियतरुदितस्मितं विराजत्
कतिपयकमलदन्तकुड्मलाग्रम्।
वदनकमलकं शिशोः स्मरामि,
स्खलदसमंजसमँजुजल्पितं ते।।4।।

(**अन्वय–** अनियत–रुदित–स्मितम्, विराजत्–कतिपय–कमल–दन्त–कुड्मल–अग्रम्, स्खलत् असमंजस–मँजु–जल्पितम्, शिशोः ते वदन–कमलकम् स्मरामि ।।4।।)

भगवति वसुन्धरे! सत्यमतिदृढ़ाऽसि।

त्वं वह्निर्मुनयो वसिष्ठगृहिणी गंगा च यस्या विदु–
र्माहात्म्यं यदि वा रघोः कुलगुरुर्देवः स्वयं भास्करः।
विद्यां वागिव यामसूत भवती शुद्धिं गतायाः पुन–
स्तस्यास्त्वद् दुहितुस्तथा विशसनं किं दारुणेऽमृष्यथाः?।।5।

(**अन्वय–** दारुणे! यस्याः माहात्म्यम् त्वम्, वह्निः, मुनयः, वसिष्ठ–गृहिणी, गंगा च रघोः कुल–गुरुः, यदि वा देवः भास्करः स्वयम् विदुः, वाक् विद्याम् इव भवती याम् असूत, शुद्धिम् गतायाः तस्याः, त्वत् दुहितुः पुनः तथा विशसनम् किम् अमृष्यथाः?।।5।।)

(नेपथ्ये)

इत इतो भगवतीमहादेव्यौ।

जनकः– अये? गृष्टिनोपदिश्यमानमार्गा भगवत्यरुन्धती। (उत्थाय) कां पुनर्महादेवीत्याह? (निरूप्य) हा हा, कथमियं महाराजस्य दशरथस्य धर्मदाराः प्रियसखी मे कौसल्या? क एतां प्रत्येति सैवेयमिति नाम?

कष्ट है। इसप्रकार की वृद्धावस्था और असह्य शोक तथा इतने पर भी 'पराक' सन्तापन आदि व्रतों का पालन करने से, इस शरीर की धातुओं के सूख जाने पर भी प्राण अटके हुए हैं। महापातकी और दग्धप्राय मेरा यह शरीर, अभी भी नष्ट नहीं हो रहा है, जो आत्म–हत्या करने वाले होते हैं, मरने के बाद, वे सूर्यरहित (असूर्या) गहन अन्धकार वाले, लोकों को प्राप्त करते हैं, ऐसा ऋषि लोग मानते हैं।

अनेक वर्षों के व्यतीत होने पर भी, निरन्तर चिन्ता के कारण प्रत्यक्ष दिखायी देने वाला, यह मेरे दुःख का वेग नया सा होकर, शान्त नहीं हो रहा है। हे यज्ञभूमि से उत्पन्न होने वाली माँ सीते! तुम्हारे जीवन का ऐसा दुःखद परिणाम हुआ, जिससे कि मैं लज्जावश दूसरों के समक्ष स्वतन्त्रता पूर्वक रो भी नहीं पा रहा हूँ।

हाय पुत्रि!

अकारण ही हँसने तथा रोने वाले, कोमल कलिकाओं के अग्रभाग के समान, छोटे–छोटे विरल दाँतों से सुशोभित, तुतलाए हुए, बिना किसी क्रम के, मनोहर वचनों को बोलने वाले, शैशवावस्था के तुम्हारे मुख को मैं स्मरण कर रहा हूँ।।4।।

हे भगवति वसुन्धरे! निश्चय ही, तुम अत्यधिक कठोर हो,

जिसके प्रभाव को तुम, अग्नि, महर्षिगण, अरुन्धती, गंगा, रघुकुल के गुरु वसिष्ठ और स्वयं भगवान् भास्कर भलीप्रकार जानते हैं, जिस प्रकार सरस्वती विद्या को उत्पन्न करती है, ठीक वैसे ही, जिसे तुमने उत्पन्न किया है, उसप्रकार की अग्नि–परीक्षा से शुद्धि को प्राप्त हुई, अपनी पुत्री की (निर्वासनरूपी) **हिंसा को भला तुमने किसप्रकार सहन कर लिया?।।5।।**

(नेपथ्य में)

इधर से, भगवती और महारानी! इधर से,

जनक– अरे! गृष्टि नामक कंचुकी द्वारा मार्ग दिखलायी जाती हुई, भगवती अरुन्धती हैं (उठकर) तो इसने महादेवी किसे कहा है? (देखकर) हाय, हाय, ये महाराज दशरथ की धर्मपत्नी और मेरी प्रिय सखी कौशल्या कैसे आ गयीं? ये वे ही हैं, इस रूप में भला इन्हें कौन पहचान पाएगा?

आसीदियं दशरथस्य गृहे यथा श्रीः,
श्रीरेव वा किमुपमानपदेन सैषा ।
कष्टं बतान्यदिव दैववशेन जाता,
दुःखात्मकं किमपि भूतमहो विकारः । ।6 । ।

(**अन्वय–** इयम् दशरथस्य गृहे श्रीः यथा आसीत्, श्रीः एव वा उपमान–पदेन किम्? कष्टम् बत! सा एषा दैव–वशेन अन्यत् किम् अपि दुःखात्मकम् भूतम् इव जाता, अहो! विकारः । ।6 । ।)

य एव मे जनः पूर्वमासीन्मूर्तो महोत्सवः ।
क्षते क्षारमिवासह्यं जातं तस्यैव दर्शनम् । ।7 । ।

(**अन्वय–** यः एव जनः पूर्वम् मे मूर्तः महोत्सवः आसीत्, तस्य एव दर्शनम्, क्षते क्षारम् इव असह्यम् जातम् । ।7 । ।)

(ततः प्रविशत्यरुन्धती कौसल्याकंचुकी च)

अरुन्धती– ननु ब्रवीमि 'द्रष्टव्यः स्वयमुपेत्यैव वैदेह' **इत्येवं** वः कुलगुरोरादेशः। अतएव चाहं प्रेषिता। तत्कोऽयं पदे–पदे महान–**नध्यवसायः?**

कंचुकी– देवि! संस्तभ्यात्मानमनुरुध्यस्व भगवतो वसिष्ठस्यादेश–**मिति विज्ञापयामि।**

कौसल्या– ईदृशे काले मिथिलाधिपो मया द्रष्टव्य इति सममेव **सर्वदुःखान्यवतरन्ति।** तस्मान्न शक्नोम्युद्वर्तमानमूलबन्धनं हृदयं पर्यवस्थापयितुम्।[1]

अरुन्धती– अत्र कः सन्देहः?

सन्तानवाहीन्यपि मानुषाणां, दुःखानि सम्बन्धिवियोगजानि।
दृष्टे जने प्रेयासि दुःसहानि, स्रोतःसहस्रैरिव संप्लवन्ते । ।8 । ।

(**अन्वय–** मानुषाणाम् सन्तान–वाहीनि अपि सम्बन्धि–वियोगजानि दुःखानि, प्रेयासि जने दृष्टे दुःसहानि, स्रोतः–सहस्रैः इव संप्लवन्ते । ।8 । ।)

कौसल्या– कथं नु खलु वत्साया मे वध्वा वनगतायास्तस्याः पितू राजर्षेर्मुखं दर्शयामः?[2]

---

1 . ईरिसे काले मिहिलाहिवो मए दिट्ठव्वो त्ति समं एव्व सव्वदुःखाई ओदरन्ति। ताण सक्कणोमि उव्वट्टमाणमूलबन्धणं हिअअं पज्जवत्थादेदुम्।

2 . कहं णु खु वच्चाए मे बहूए वनगदाए तस्सा पिदुणो राएसिणो मुहं दंसम्ह।

कभी ये दशरथ के घर में लक्ष्मी के समान थीं अथवा लक्ष्मी ही थीं, क्योंकि उपमान सूचक शब्द से क्या लाभ? हाय, अत्यधिक कष्ट है कि ये, वे भाग्यवश कुछ और ही दुःखस्वरूप प्राणी के समान हो गयी हैं। आश्चर्य है, यह इतना भारी परिवर्तन दिखायी दे रहा है । ।6 । ।

यह जो कौशल्या मेरे लिए मूर्तिमान् महोत्सव थीं, आज उन्हीं का दर्शन कटे हुए पर नमक के समान, असह्य हो रहा है । ।7 । ।

(उसके बाद अरुन्धती, कौशल्या एवं कंचुकी प्रवेश करते हैं)

अरुन्धती– अरे! मैं कह रही हूँ कि 'पास में जाकर ही महाराज का दर्शन करना चाहिए', यह तुम्हारे कुल–गुरु वसिष्ठ का आदेश है। इसीलिए उन्होंने मुझे भी भेजा है। तब पग–पग पर तुम्हारा **यह** (जनकदर्शन के प्रति) कैसा भारी अनुत्साह है?

कंचुकी– देवि! मेरा निवेदन है कि अपने आप को **सम्भालकर** भगवान् वसिष्ठ के आदेश का पालन कीजिए।

कौशल्या– ऐसे समय में मुझे मिथिला के राजा जनक का **दर्शन** करना पड़ेगा? लगता है सभी दुःख एक साथ ही प्राप्त हो रहे **हैं।** इसलिए शिथिल बन्धन वाले हृदय पर नियन्त्रण नहीं रख पा रही हूँ।

अरुन्धती– इसमें क्या संदेह है?

मनुष्यों के अजस्र गति से प्रवाहित होने वाले, सम्बन्धी जनों के वियोग से उत्पन्न दुःख, प्रियजन को देखने पर असह्य होकर, मानो हजारों प्रवाहों में बहने लगते हैं । ।8 । ।

कौशल्या– अपनी प्यारी बहू सीता के वन चले जाने पर, हम उसके पिता, राजर्षि जनक को भला कैसे मुँह दिखाएँ?

अकारण ही कठोरगर्भा सीता के राम द्वारा वन में परित्याग के बाद, उनकी माता कौशल्या का अपने सम्बन्धी राजा जनक से न मिल पाने विषयक अन्तर्द्वन्द्व, संकोच तथा पीड़ा आदि को महाकवि भवभूति ने अत्यन्त सुन्दर एवं शिष्ट शैली में प्रस्तुत किया है।

अरुन्धती–

एष वः श्लाघ्यसम्बन्धीं, जनकानां कुलोद्वहः।
याज्ञवल्क्यो मुनिर्यस्मै ब्रह्मपारायणं जगौ।।9।।

(अन्वय– एषः वः श्लाघ्य–सम्बन्धीम् जनकानाम् कुल–उद्वहः (अस्ति), यस्मै याज्ञवल्क्यः मुनिः ब्रह्म–पारायणम् जगौ।।9।।)

कौसल्या–एष स महाराजस्य हृदयनिर्विशेषो वत्साया मे वध्वाः पिता विदेहराजः सीरध्वजः। स्मारितास्मि अनिर्वेदरमणीयान्दिवसान्। हा दैव! सर्वं तन्नास्ति।[1]

जनकः– (उपसृत्य) भगवत्यरुन्धति! वैदेहः सीरध्वजोऽभिवादयते।

यया पूतम्मन्यो निधिरपि पवित्रस्य महसः,
पतिस्ते पूर्वेषामपि खलु गुरूणां गुरुतमः।
त्रिलोकीमंगल्यामवनितललीनेन शिरसा,
जगद्वन्द्यां देवीमुषसमिव वन्दे भगवतीम्।।10।।

(अन्वय– पवित्रस्य महसः निधिः अपि पूर्वेषाम् गुरूणाम् गुरुतमः अपि ते पतिः, यया पूतम्–मन्यः खलु,त्रिलोकी–मंगल्याम्, जगत्–वन्द्याम् देवीम् उषसम् इव, भगवतीम् अवनि–तल–लीनेन शिरसा वन्दे।।10।।)

अरुन्धती– अक्षरं ते ज्योतिः प्रकाशताम्। स त्वां पुनातु देवः परो रजसां, य एष तपति।

जनकः– आर्य गृष्टे! अप्यनामयमस्य प्रजापालकस्य मातुः?

कंचुकी– (स्वगतम्) निरवेशषमतिनिष्ठुरमुपालब्धाः स्मः। (प्रकाशम्) राजर्षे! अनेनैव मन्युना चिरपरित्यक्तरामभद्रदर्शनां नार्हसि दुःखयितुम–तिदुःखितां देवीम्। रामभद्रस्यापि दैवदुर्योगः कोऽपि। यत्किल समन्ततः प्रवृत्तबीभत्सकिंवदन्तीकाः पौरा न चाग्निशुद्धिमनल्पकाः प्रतियन्तीति दारुणमनुष्ठितं देवेन।

जनकः– (सरोषम्) आः, कोऽयमग्निर्नामास्मत्प्रसूतिपरिशोधने? कष्टम् एवं वादिना जनेन रामभद्रपरिभूता अपि पुनः परिभूयामहे।

1 . एसो सो महाराअस्स हिअअणिव्विसेसो वच्चाए मे वहूए पिदा विदेहराओ सीरद्धओ। सुमरिदह्मि अणिव्वेदरमणीए दिवहे हा देव्व? सव्वं तं णत्थि।

अरुन्धती– ये आपके प्रशंसनीय सम्बन्धी जनक वंश में श्रेष्ठ (विदेह) हैं, जिन्हें महर्षि याज्ञवल्क्य ने वेद और उपनिषदों का उपदेश प्रदान किया था।।9।।

कौशल्या– महाराज दशरथ के अभिन्न हृदय और मेरी पुत्रवधू सीता के पिता, विदेहराज 'सीरध्वज' हैं। इन्हें देखकर मुझे आनन्द से रमणीय उन सुखमय दिनों का स्मरण हो आया है। हा दैव! अब तो वह सब कुछ नहीं रहा है।

जनक– (पास जाकर) भगवति अरुन्धति! विदेह वंश में उत्पन्न होने वाला 'सीरध्वज' आपको अभिवादन कर रहा है।

पवित्र तेज के निधान, सभी प्राचीन गुरुओं के भी गुरु, आपके पति वसिष्ठ भी, जिनसे अपने आप को पवित्र मानते हैं, तीनों लोकों की कल्याणकारिणी, सम्पूर्ण संसार की वन्दनीया, देवी उषा के समान, आपको मैं पृथ्वी पर झुके हुए सिर से प्रणाम कर रहा हूँ।।10।।

अरुन्धती– आपमें शाश्वत ज्योतिस्वरूप ब्रह्म का प्रकाश हो, जो सविता देवता रजस् आदि दोषों से दूर रहकर प्रकाशित होते हैं, वे आपको पवित्र करें।

जनक– आर्य गृष्टि! इन प्रजापालक की माता का कुशल तो है?

कंचुकी– (मन में) पूरी तरह से अत्यन्त निष्ठुरतापूर्वक हमें ताना दिया गया है (प्रकट में) हे राजर्षे! इसी क्रोध से श्रीराम का दर्शन छोड़ देने वाली, स्वयं ही दुःखी महारानी को और भी अधिक दुःखी करना आपके लिए उचित नहीं है और इस विषय में राम का कोई दुर्भाग्य ही था कि चारों ओर से, क्षुद्र नागरिक इस निन्दित किंवदन्ती के प्रचार में प्रवृत्त होकर (लंका में होने वाली) अग्नि–शुद्धि का भी विश्वास नहीं कर रहे थे। इसीलिए (लोकाराधन की भावना से) महाराज ने ऐसा कठोर कर्म कर दिया।

जनक– (आक्रोशपूर्वक) अरे! हमारी सन्तान को शुद्ध करने में यह अग्नि होता कौन है? कष्ट है, इसप्रकार कहने वाले, लोगों के द्वारा तो हम राम से तिरस्कृत होकर भी, फिर से अपमानित किए जा रहे हैं।

अरुन्धती– (निःश्वस्य) एवमेतत्। अग्निरिति वत्सां प्रति लघून्यक्षराणि। सीतेत्येव पर्याप्तम्। हा वत्से!

शिशुर्वा शिष्या वा यदसि मम तत्तिष्ठतु तथा,
विशुद्धेरुत्कर्षस्त्वयि तु मम भक्तिं द्रढयति।
शिशुत्वं स्त्रैणं वा भवतु ननु वन्द्यासि जगतां,
गुणाः पूजास्थानं गुणिषु न च लिंगं न च वयः।।11।।

(**अन्वय–** मम शिशुः वा, शिष्या वा, यत् असि, तत् तथा तिष्ठतु, त्वयि विशुद्धेः उत्कर्षः तु मम भक्तिम् द्रढयति, ननु शिशुत्वम् स्त्रैणम् वा भवतु, जगताम् वन्द्या असि, गुणिषु गुणाः पूजास्थानम्, न च लिंगम् न च वयः।।11।।)

कौसल्या– अहो, समुन्मूलयन्तीव वेदनाः।[1]

(इति मूर्च्छति)

जनकः– हन्त, किमेतत्?

अरुन्धतीः– राजर्षे! किमन्यत्?

स राजा तत्सौख्यं स च शिशुजनस्ते च दिवसाः,
स्मृतावाविर्भूतं त्वयि सुहृदि दृष्टे तदखिलम्।
विपाके घोरेऽस्मिन्न खलु न विमूढा तव सखी,
पुरन्ध्रीणां चित्तं कुसुमसुकुमारं हि भवति।।12।।

(**अन्वय–** सः राजा, तत् सौख्यम्, सः च शिशु–जनः, ते च दिवसाः सुहृदि त्वयि दृष्टे, तत् अखिलम् स्मृतौ आविर्भूतम्, अस्मिन् घोरे विपाके तव सखी, न विमूढा न खलु, हि पुरन्ध्रीणाम् चित्तम् कुसुम–सुकुमारम् भवति।।12।।)

जनकः– हन्त, सर्वथा नृशंसोऽस्मि। यच्चिरस्य दृष्टान्प्रियसुहृदः प्रियदारानस्निग्ध इव पश्यामि।

स सम्बन्धी श्लाघ्यः प्रियसुहृदसौ तच्च हृदयं,
स चानन्दः साक्षादपि च निखिलं जीवितफलम्।
शरीरं जीवो वा यदधिकमतोऽन्यत्प्रियतरं,
महाराजः श्रीमान् किमिव मम नासीद्दशरथः।।13।।

[1]. अहो! समूम्मूलअन्ति विअ वेअणाओ।

अरुन्धती–(लम्बी श्वास लेकर) ऐसा ही है, पुत्री सीता के प्रति 'अग्नि' ये अक्षर अत्यन्त तुच्छ हैं। 'सीता' कहना ही पर्याप्त है।

हाय पुत्रि!

तुम मेरी पुत्री हो या शिष्या, जो भी सम्बन्ध हो, वह वैसा ही रहे, तुम्हारे चरित्र की शुद्धि का उत्कर्ष ही, तुममें मेरी श्रद्धा को दृढ़ कर रहा है। तुममें शिशुत्व हो या स्त्रीत्व, तुम तो सम्पूर्ण संसार की वन्दनीया हो, क्योंकि गुणियों में गुण ही पूजा के स्थान होते हैं, लिंग अथवा आयु नहीं।।11।।

कौशल्या– अहो! वेदनाएँ मानो क्लेशप्रद होकर हृदय को मूल से ही उखाड़ रही हैं। (ऐसा कहकर मूर्च्छित हो जाती है)

जनक– हाय, यह क्या है?

अरुन्धती– राजर्षे! और क्या होता?

सम्बन्धी आपको देखकर, इन्हें वे महाराज दशरथ, वे अनुभव किए गए सुख, वे सीता–राम आदि शिशुजन तथा वे दिन स्मरण हो आए हैं, जिनके घोर परिणाम में क्या आपकी प्रिय सखी मूर्च्छित नहीं हुई? ऐसा नहीं है, (अर्थात् हुई हैं) **क्योंकि उत्तम कुल की स्त्रियों का चित्त पुष्प के समान कोमल होता है।।12।।**

जनक– हाय, मैं सर्वथा क्रूर हो गया हूँ, जो लम्बे समय के बाद, देखी गयी प्रिय मित्र दशरथ की पत्नी को भी स्नेह के साथ नहीं देख पा रहा हूँ।

वे राजा दशरथ प्रशंसनीय सम्बन्धी, प्रिय मित्र एवं मेरे दूसरे हृदय ही थे। वे साक्षात् आनन्द, जीवन के सर्वस्व, शरीर, प्राण या फिर संसार में जो भी इससे प्रिय वस्तु है, वह सभी कुछ थे। वे श्रीमान् महाराज दशरथ मेरे क्या नहीं थे?।।13।।

(अन्वय– सः श्लाघ्यः सम्बन्धी, असौ प्रिय–सुहृद्, तत् च हृदयम्, सः च साक्षात् आनन्दः, अपि च निखिलम् जीवित–फलम्, शरीरम् जीवः वा, अतः अधिकम् अन्यत् यत् प्रियतरम्, श्रीमान् महाराजः दशरथः मम किम् इव न आसीत् ।।13।।)

कष्टमियमेव सा कौसल्या।

यदस्याः पत्युर्वा रहसि परमन्त्रायितमभू–
दभूवं दम्पत्योः पृथगहमुपालम्भविषयः।
प्रसादे कोपे वा तदनु मदधीनो विधिरभू–
दलं वा तत्स्मृत्वा दहति यदवस्कन्ध हृदयम्।।14।।

(अन्वय– अस्याः पत्युः वा रहसि यत् पर–मन्त्रायितम् अभूत्, अहम् दम्पत्योः पृथक् उपालम्भ–विषयः अभूवम्, प्रसादे कोपे वा मत्–अधीनः विधिः अभूत्, तत् अनु तत् स्मृत्वा अलम् वा, यत् हृदयम् अवस्कन्ध दहति।।14।।)

अरुन्धती– हा कष्टम्! अतिचिरनिरुद्धनिःश्वासनिष्पन्दहृदयमस्याः।

जनकः– हा प्रियसखि! (इति कमण्डलूदकेन सिंचति)

कंचुकी–

सुहृदिव प्रकटय्य सुखप्रदां, प्रथममेकरसामनुकूलताम्।
पुनरकाण्डविवर्तनदारुणः परिशिनष्टि विधिर्मनसो रुजम्।।15।

(अन्वय– विधिः प्रथमम् सुहृत् इव, सुख–प्रदाम् एकरसाम् अनुकूलताम् प्रकटय्य, पुनः अकाण्ड–विवर्तन–दारुणः मनसः रुजम् परिशिनष्टि ।।15।।)

कौसल्या– (आश्वस्य) हा वत्से जानकि! कुत्रासि? स्मरामि ते नवविवाहलक्ष्मीपरिग्रहैकमंगलं, सफुल्लमुग्धमुखपुण्डरीकमारोहत्कौमुदी–चन्द्रसुन्दरम्। एहि मे पुनरपि जाते! उद्द्योतयोत्संगम्! सर्वदा महाराज एवं भणति– 'एषा रघुकुलमहत्तराणां वधूः, अस्माकं तु जनकसुता दुहितैव।'[1]

1 . हा वच्छे जाणइ! कहिं सि? सुमरामि दे णवविवाहलच्छीपरिग्गहेक्कमंगलं संफुल्लमुद्धमुहपुण्डरीअ आरुहन्तकौमुदी चन्दसुन्दरम्। एहि मे पुणो वि जादे उज्जोएहि उच्छंगम्। सव्वहा महाराअ एव्वं भणदि– 'एसा रहुउलमहत्तराणं बहू, अह्माणं दु जणअसुदा दुहिदेव्व।'

दुःख है, यह वही कौशल्या है?

इनका एवं इनके पति दशरथ का जो एकान्त में प्रणय–कलह होता था, उसमें मैं ही इन पति–पत्नी दोनों के उपालम्भ का अलग–अलग रूप से पात्र बनता था और उसके बाद, इन्हें प्रसन्न या कुपित करने का काम भी मेरे अधीन ही होता था अथवा उन्हें स्मरण करने से क्या लाभ? जो स्मरण मात्र से ही आघात करके, मेरे हृदय को जलाए डाल रहा है।।14।।

अरुन्धती– हाय, कष्ट है, बहुत समय तक श्वास रोकने से इसका हृदय शून्य हो गया है।

जनक– हाय प्रिय सखि!

(ऐसा कहकर कमण्डलु के जल से सींचते हैं)

कंचुकी–

भाग्य पहले मित्र के समान, सुख प्रदान करने वाली, एकमात्र रसयुक्त अनुकूलता को दिखाकर, उसके बाद, अनवसर में परिवर्तन करके, कठोर होता हुआ, मन की पीड़ा को विशेषरूप से बढ़ा देता है।।15।।

कौशल्या– (प्रकृतिस्थ होकर) हाय, पुत्रि जानकि! तुम कहाँ हो? मैं नए विवाह के समय शोभा को धारण करने से अनुपम मंगल युक्त, आकाश में फैली हुई चन्द्रिका से सुशोभित चन्द्रमा के समान तथा खिले हुए कमल के जैसे, भोले–भाले तुम्हारे मुख को स्मरण कर रही हूँ। हे पुत्रि! फिर से आओ और मेरी गोद को सुशोभित करो। महाराज दशरथ हमेशा यह कहा करते थे कि 'यह सीता रघुकुल के पूर्वजों की तो पुत्रवधू है, किन्तु हमारी तो जनक से सम्बन्ध होने के कारण पुत्री ही है।'

कंचुकी– यथाह देवी।

पंचप्रसूतेरपि तस्य राज्ञः,
प्रियो विशेषेण सुबाहुशत्रुः।
वधूचतुष्केऽपि तथैव नान्या,
प्रिया तनूजास्य यथैव सीता।।16।।

(**अन्वय–** पंच–प्रसूतेः अपि तस्य राज्ञः, सुबाहु–शत्रुः विशेषेण प्रियः, तथा एव अस्य वधू–चतुष्के अपि सीता एव तनूजा यथा प्रिया (तथा) अन्या न ।।16।।)

जनकः– हा प्रियसख महाराज दशरथ! एवमसि सर्वप्रकार–हृदयंगमः। कथं विस्सर्यसे?

कन्यायाः किल पूजयन्ति पितरो जामातुराप्तं जनं,
सम्बन्धे विपरीतमेव तदभूदाराधनं ते मयि।
त्वं कालेन तथाविधोऽप्यपहृतः सन्बन्धबीजं च तद्
घोरेऽस्मिन्मम जीवलोकनरके पापस्य धिग्जीवितम्।।17।।

(**अन्वय–** कन्यायाः पितरः जामातुः आप्तम् जनम् पूजयन्ति किल, सम्बन्धे मयि ते तत् आराधनम् विपरीतम् एव अभूत्, तथाविधः अपि त्वम् कालेन अपहृतः, तत् सन्बन्ध–बीजम् च (अपहृतम्),घोरे अस्मिन् जीव–लोक–नरके, पापस्य मम जीवितम् धिक् ।।17।।)

कौसल्या– जाते जानकि। किं करोमि? दृढवज्रलेपप्रतिबन्धनिश्चलं हतजीवितं मां मन्दभागिनीं न परित्यजति।[1]

अरुन्धती– आश्वसिहि राज्ञि! बाष्पविश्रामोऽप्यन्तरेषु कर्त्तव्य एव। अन्यच्च किं न स्मरसि? यदवोचदृष्यश्रृंगाश्रमे युष्माकं कुलगुरुः–''भवितव्यं तथेत्युपजातमेव। किन्तु कल्याणोदर्कं भविष्यतीति।

कौसल्या– कुतोऽतिक्रान्तमनोरथाया ममैतत्।[2]

अरुन्धती– तत्किं मन्यसे राजपत्नि! मृषोद्यं तदिति न हीदं क्षत्रिये! मन्तव्यम्।

---

1 जादे जाणइ! किं करोमि? दिढवज्जलेवपडिबद्धणिच्चलं हृदजीविदं म मन्दभाइणीं ण पडिच्चअदि।

2 कुदो अदिक्कमन्दमणोरहाए मह एदम्?

कंचुकी– महारानी ठीक कह रही हैं–

पाँच सन्तानों में महाराज को सुबाहु के शत्रु राम ही अत्यधिक प्रिय थे और इसीप्रकार चारों पुत्र–वधुओं में भी, सीता ही जैसी पुत्री के समान प्रिय थी, वैसी अन्य कोई नहीं थी।।16।।

जनक– हा, प्रियमित्र महाराज दशरथ! आप इसप्रकार सर्वात्मना मेरे हृदय में बस गए हैं कि आपको भला कैसे भुलाया जा सकता है?

सामान्यरूप से कन्या के पितृजन जामाता के बन्धुओं की पूजा करते हैं, किन्तु सम्बन्ध होने पर, तो मुझमें आपकी वह पूजा विपरीत ही रही। इसप्रकार के आपको और उस सम्बन्ध के बीजरूप सीता को भी काल ने अपहरण कर लिया है। भयंकर नरक के समान इस मनुष्य लोक में मुझ पापी के जीवन को धिक्कार है।।17।।

कौशल्या– पुत्रि जानकि! मैं क्या करूँ? अत्यधिक मजबूत वज्र के लेप से बँधे हुए, ये निन्दनीय प्राण मुझ अभागिन को नहीं छोड़ रहे हैं।

अरुन्धती– महारानी, धैर्य धारण करें, क्योंकि बीच–बीच में आँसुओं को रोकना भी चाहिए और फिर क्या तुम्हें याद नहीं है कि–

ऋष्यश्रृंग के आश्रम में तुम्हारे कुलगुरु ने कहा था कि 'जो होना था, वह तो हो चुका, किन्तु इसका परिणाम कल्याणों को उदित करने वाला होगा।'

कौशल्या– मनोरथ के चले जाने पर, मेरे लिए यह भला कैसे सम्भव है?

अरुन्धती– हे महारानी! क्या तुम उस गुरुवचन को मिथ्या समझती हो? हे क्षत्रिये! निश्चय ही, तुम्हें ऐसा नहीं मानना चाहिए।

आविर्भूतज्योतिषां ब्राह्मणानां,
ये व्याहारास्तेषु मा संशयो भूत्।
भद्रा ह्येषां वाचि लक्ष्मीर्निषक्ता,
नैते वाचं विलुप्तार्थां वदन्ति।।18।।

(अन्वय– आविर्भूत–ज्योतिषाम् ब्राह्मणानाम्, ये व्याहाराः तेषु संशयः मा भूत्, हि एषाम् वाचि भद्रा लक्ष्मीः निषक्ता, एते विलुप्त–अर्थाम् वाचम् न वदन्ति।।18।।)

(नेपथ्ये कलकलः, सर्वे आकर्णयन्ति)

जनकः– अये, शिष्टानध्याय इत्यस्खलितं खेलतां वटूना कोलाहलः।

कौसल्या– सुलभसौख्यमिदानीं बालत्वं भवति। (निरूप्य) अहो, एतेषां मध्ये क एष रामभद्रस्य कौमारलक्ष्मीसावष्टम्भैर्मुग्धललितैरंगैर्दारकोऽस्माकं लोचने शीतलयति?[1]

अरुन्धती– (स्वगतम् सहर्षोत्कण्ठम्) इदं नाम भागीरथीनिवेदितं रहस्यकर्णामृतम् न त्वेवं विद्मः कतरोऽयमायुष्मतो कुशलवयोरिति।

(प्रकाशम्)

कुवलयदलस्निग्धश्यामः शिखण्डकमण्डनो
वटुपरिषदं पुण्यश्रीकः श्रियेव सभाजयन्।
पुनरपि शिशुर्भूतो वत्सः स मे रघुनन्दनो,
झटिति कुरुते दृष्टः कोऽयं दृशोरमृतांजनम्?।।19।।

(अन्वय–कुवलय–दल–स्निग्ध–श्यामः, शिखण्डक–मण्डनः, पुण्य–श्रीकः श्रिया, वटु–परिषदम् सभाजयन्, पुनः अपि शिशुः भूतः सः मे वत्सः रघुनन्दनः इव, कः अयम् दृष्टः, झटिति दृशोः अमृत–अंजनम् कुरुते ?।।19।।)

कंचुकी– नूनं क्षत्रियब्रह्मचारी दारकोऽयमिति मन्ये।

जनकः– एवमेतत्। अस्य हि–

1. सुलहसोक्खं दाणिं बालत्तणं होदि। अह्महे एदाणं मज्झे को एसो रामभद्दस्स कोमारलच्छीसावट्ठम्मेहि मुद्धललिदेहिं अंगेहिं दारओ अह्माणं लोअणे शीअलावदि?

ब्रह्म का साक्षात्कार करने वाले, ब्राह्मणों के जो वचन हैं, उनमें सन्देह नहीं करना चाहिए, क्योंकि इनकी वाणी में सम्पूर्ण संसार का कल्याण करने वाली 'लक्ष्मी' का निवास होता है और वे कभी भी असत्य वाणी नहीं बोलते हैं।।18।।

(नेपथ्य में कोलाहल होता है, सभी सुनते हैं)

जनक– अरे! शिष्टजनों के आने के कारण, अनध्याय होने से बिना रुकावट के खेलने वाले, बालकों का यह कोलाहल है।

कौशल्या– इस बाल्यावस्था में ही तो सुख सरलता से प्राप्त होता है। (देखकर) अरे! इन बालकों के बीच में रामभद्र की बाल्यावस्था की शोभा से युक्त, यह कौन बालक, अपने सुन्दर एवं सुकुमार अंगों से हमारे दोनों नेत्रों को शीतल कर रहा है?

अरुन्धती– (मन में, हर्ष एवं उत्कण्ठापूर्वक) भागीरथी द्वारा बताया गया, कानों के लिए अमृत के समान, यह आनन्ददायी वचन गोपनीय है, किन्तु हम यह नहीं जानते हैं कि यह आयुष्मान् 'लव' और 'कुश' में से कौन है?

(प्रकट में)

नीलकमल के पत्ते के समान, स्निग्ध और श्यामल, काकपक्षों से सुशोभित, अलौकिक शोभा से युक्त, शरीर की कान्ति द्वारा, सभी ब्रह्मचारियों की परिषद् को अलंकृत करने वाला, यह कौन है? जो फिर से बाल्यावस्था में विद्यमान, मेरे वात्सल्य के भाजन राम के समान, देखने पर शीघ्र ही, नेत्रों में अमृतमय अंजन का लेप कर रहा है।।19।।

कंचुकी– मैं समझता हूँ कि निश्चय ही, यह क्षत्रिय बालक है।

जनक– ऐसा ही है, क्योंकि इसकी–

चूडाचुम्बितकंकपत्रमभितस्तूणीद्वयं पृष्ठतो
भस्मस्तोकपवित्रलांछनमुरो धत्ते त्वचं रौरवीम्।
मौर्व्या मेखलया नियन्त्रितमधो वासश्च मांजिष्ठकं,
पाणौ कार्मुकमक्षसूत्रवलयं दण्डोऽपरः पैप्पलः।।20।।

(**अन्वय–** पृष्ठतः अभितः चूडा–चुम्बित–कंक–पत्रम् तूणी–द्वयम्, भस्म–स्तोक–पवित्र–लांछनम्, उरः रौरवीम् त्वचम् धत्ते, अधः च मौर्व्याः मेखलया नियन्त्रितम्, मांजिष्ठकम् वासः, पाणौ कार्मुकम्, अक्ष–सूत्र–वलयम्, अपरः पैप्पलः दण्डः।।20।।)

भगवत्यरुन्धति! किमित्युत्प्रेक्षसे कुतस्त्योऽयम्? इति।

अरुन्धती– अद्यैव वयमागताः।

जनकः– आर्य गृष्टे! अतिकौतुकं वर्तते। तद्भगवन्तं वाल्मीकिमेव गत्वा पृच्छ। इमं च दारकं ब्रूहि 'वत्सः! केऽप्येते प्रवयसस्त्वां दिदृक्षवः' इति।

कंचुकी– यदाज्ञापयति देवः। (इति निष्क्रान्तः)

कौसल्या– किं मन्यध्वे? एवं भणिति आगमिष्यति वा नवेति?[1]

जनकः– भिद्यते वा सद्वृत्तमीदृशस्य निर्माणस्य?

कौसल्या– (निरूप्य) कथं सविनयनिशमितसृष्टिवचनो विसर्जिताशेषसदृशदारक इतोमुखमपसरित एव स वत्सः?[2]

जनकः– (चिरं निर्वर्ण्य) भोः किमप्येतत्!

महिम्नामेतस्मिन्विनयशिशिरो मौग्ध्यमसृणो,
विदग्धैर्निर्ग्राह्यो न पुनरविदग्धैरतिशयः।
मनो मे संमोहस्थिरमपि हरत्येष बलवा–
नयोधातुं यद्वत्परिलघुरयस्कान्तशकलः।।21।।

(**अन्वय–** एतस्मिन् विनय–शिशिरः मौग्ध्य–मसृणः महिम्नाम् अतिशयः विदग्धैः निर्ग्राह्यः, न पुनः अविदग्धैः, बलवान् एषः संमोहं–स्थिरम् अपि मे मनः हरति, यद्वत् परिलघुः अयस्कान्त– शकलः अयः–धातुम् (हरति)।।21।।)

1. किं मण्णेध? एव्वं भणिदो आआमिस्सदि वा ण वेत्ति?
2. कहं सविणअणिसमिदगिट्ठिवअणो विसज्जिदासेससरिसदारओ इतोमुहं ... वच्छो।

पीठ पर दोनों ओर शिखाओं का स्पर्श करने वाले, कंकपत्रों से युक्त, तरकस लटके हुए हैं। थोड़ी सी भस्म लगाने से इसका वक्षःस्थल पवित्र है। इसने वक्ष पर मृगचर्म को धारण किया हुआ है। इसके अधोभाग में मंजिष्ठ से रंगा हुआ वस्त्र, मूँज की तगड़ी से बँधा हुआ है तथा इसके एक हाथ में धनुष, रुद्राक्ष की माला एवं दूसरे में पीपल का दण्ड सुशोभित हो रहा है।।20।।

भगवति अरुन्धति! आपका क्या अनुमान है? यह बालक कहाँ से आया है?

अरुन्धती– हम तो आज ही आए हैं।

जनक– आर्य गृष्टि! मुझे अत्यधिक कौतूहल हो रहा है। इसलिए भगवान् वाल्मीकि से ही जाकर पूछो और इस बालक से कहो कि– 'ये कुछ बूढ़े लोग तुम्हें देखना चाहते हैं।'

कंचुकी– जैसी महाराज की आज्ञा।

(ऐसा कहकर निकल जाता है)

कौशल्या– आप लोगों का क्या विचार है? ऐसा कहने पर यह आएगा या नहीं?

जनक– इसप्रकार की अलौकिक आकृति से भी क्या शिष्टाचार अलग रह सकता है?

कौशल्या– (देखकर) नम्रतापूर्वक गृष्टि का वचन सुनकर, अपने साथ के सभी बालकों को विसर्जित करके, यह बालक तो इधर की ओर मुख करके ही आ रहा है।

जनक– (बहुत देर तक देखकर) ओह! यह तो कुछ अपूर्व ही है,

इस बालक में नम्रता से शीतल एवं कोमल, जो महत्ता का उत्कर्ष है, वह निपुण लोगों द्वारा ही ग्रहण करने योग्य है, साधारण पुरुषों द्वारा नहीं। यह बलवान् बालक, जिसप्रकार छोटा सा चुम्बक का टुकड़ा लोहे को अपनी ओर खींच लेता है, वैसे ही सम्मोह के कारण स्थिर हुए, मेरे मन को यह अपनी ओर आकर्षित कर रहा है।।21।।

लवः— (प्रविश्य, स्वगतम्) अविज्ञातवयः क्रमौचित्यात्पूज्यानपि सतः कथमभिवादयिष्ये? (विचिन्त्य) अयं पुनरविरुद्धप्रकार इत वृद्धेभ्यः श्रूयते। (सविनयमुपसृत्य) एष वो लवस्य शिरसा प्रणामपर्यायः।

अरुन्धतीजनकौ— कल्याणिन्! आयुष्मान् भूयाः।

कौसल्या— जात! चिरं जीव।[1]

अरुन्धती— एहि वत्स! (लवमुत्संगे गृहीत्वा आत्मगतम्) दिष्ट्या न केवलमुत्संगश्चिरान्मनोरथोऽपि मे पूरितः।

कौसल्या— जात! इतोऽपि तावदेहि। (उत्संगे गृहीत्वा) अहा, न केवलं दरविस्पष्टकुवलयमांसलोज्ज्वलेन देहबन्धनेन, कवलितारविन्द–केसरकषायकण्ठकलहंसघोषघर्घररानुनादिना स्वरेण च रामभद्रम–नुसरति। ननु कठोरकमलगर्भपक्ष्मलशरीरस्पर्शोऽपि तादृश एव। जात! पश्यामि ते मुखपुण्डरीकम्। (चिबुकमुन्नमय्य, निरूप्य, सबाष्पाकूतम्) राजर्षे! किं न पश्यसि? निपुणं निरूप्यमाणो वत्साया मे वध्वा मुखचन्द्रे–णापि संवदत्येव।[2]

जनकः— पश्यामि सखि! पश्यामि।

कौसल्या— अहो, उन्मत्तीभूतमिव मे हृदयं कुतोमुखं विलपति।[3]

जनकः— (निरूप्य)

वत्सायाश्च रघूद्वहस्य च शिशावस्मिन्नभिव्यज्यते,
संवृत्तिः प्रतिबिम्बितेव निखिला सैवाकृतिः सा द्युतिः।
सा वाणी विनयः स एव सहजः पुण्यानुभावोऽप्यसौ,
हा हा देवि किमुत्पथैर्मम मनः पारिप्लवं धावति?।।22।।

1. जाद! चिरं जीव।
2. जाद! इदो वि दाव एहि। अह्महे, ण केवलं दरविप्पट्टकन्दोट्टमंसलुज्जलेण देहबन्धणेण, कवलिदारविन्दकेसरकसाअ– कण्ठकलहंसघोसघग्घराणुणादिणा सरेण अ रामभद्दं अणुसरेदि। णं कठोरकमलगब्भप्पम्भल सरीरप्पस्सो वि तारिसो एव्व। जाद! पेक्खामि दे मुहपुण्डरीअम्। राएसि! किं ण पेक्खसि? णिउणं णिरूवज्जन्तो वच्छाए मे वहूए मुहचन्देणविसंवददि एव्व!
3. अह्महे, उन्मत्तीभूद विअ मे हिअअं कुदोमुहं विलवदि।

लव— (प्रवेश करके मन में) अवस्था, क्रम तथा औचित्य को न जानने के कारण, मैं इन पूजनीयों को कैसे प्रणाम करूँ? (सोचकर) यह प्रणाम का विरोधरहित प्रकार है, ऐसा वृद्ध लोगों से सुना जाता है। (नम्रतापूर्वक पास जाकर) आप लोगों को, पूजनीय जनों के क्रम से इस लव का सिर से प्रणाम है।

अरुन्धती और जनक— हे कल्याणिन्! आयुष्मान् बनो।

कौशल्या— पुत्र! चिरंजीवी होओ।

अरुन्धती— आओ, बेटा! (लव को गोद में लेकर, मन में) सौभाग्य से केवल मेरी गोद ही नहीं, अपितु मेरा बहुत दिनों का मनोरथ भी पूरा हुआ।

कौशल्या— पुत्र! इधर भी आओ, (गोद में लेकर) आश्चर्य है कि यह बालक केवल थोड़ा खिले हुए, नीले कमल के समान, पुष्ट और तेजस्वी शरीर के गठन से ही नहीं, अपितु कमल के केसर को खाने के कारण, मधुर कण्ठ वाले, हंस के स्वर के समान, स्वर द्वारा भी रामभद्र का अनुसरण कर रहा है। निश्चय ही, विकसित कमल के भीतरी भाग के समान सुकुमार, इसके शरीर का स्पर्श भी, उसी के समान है। बेटा! मैं जरा तुम्हारा मुख–कमल तो देख लूँ।

(ठुड्डी को ऊपर करके, देखकर, अश्रुपूर्वक अभिप्राय के साथ)

हे राजर्षे! क्या आप नहीं देख रहे हैं? कि भलीप्रकार देखे जाने पर, इस बालक का मुख, मेरी प्रिय वधू सीता के मुखरूपी चन्द्र से मेल खा रहा है।

जनक— देख रहा हूँ, सखि! देख रहा हूँ।

कौशल्या— अहो! मेरा हृदय तो उन्मत्त सा होकर, न जाने किस असम्भावनीय विषय में लगा हुआ विलाप कर रहा है।

जनक— (देखकर)

इस बालक में मानो पुत्री सीता तथा रघुकुल श्रेष्ठ रामभद्र का पवित्र सम्बन्ध अभिव्यंजित हो रहा है और वही सम्पूर्ण आकृति, वही कान्ति, वही वाणी तथा वही सहज विनम्रता एवं वही पुण्य प्रभाव भी है। हा, हा देवि! सीते, चंचल होकर मेरा मन, उन मार्गों पर क्यों दौड़ रहा है?।।22।।

(अन्वय– अस्मिन् शिशौ वत्सायाः रघूद्वहस्य च संवृत्तिः प्रतिबिम्बिता इव अभिव्यज्यते, सा एव निखिला आकृतिः, सा द्युतिः, सा वाणी, सः एव सहजः विनयः, असौ पुण्य–अनुभावः अपि, हा हा देवि! मम मनः पारिप्लवम्, उत्पथैः किम् धावति? ।।22।।)

कौसल्या– जात! अस्ति ते माता? स्मरसि वा तातम्?[1]

लवः– नहि।

कौसल्या– ततः कस्य त्वम्?[2]

लवः– भगवतः सुगृहीतनामधेयस्य वाल्मीकेः।

कौसल्या– अयि जात! कथितव्यं कथय।[3]

लवः– एतावदेव जानामि।

(नेपथ्ये)

भोः भोः सैनिकाः? एष खलु कुमारश्चन्द्रकेतुराज्ञापयति– 'न केनचिदाश्रमाभ्यर्णभूमय आक्रमितव्या' इति।

अरुन्धतीजनकौ– अये, मेध्याश्वरक्षाप्रसंगादुपागतोवत्सश्चन्द्रकेतुर्द्रष्टव्य इत्यसौ सुदिवसः।

कौसल्या– वत्सलक्ष्मणस्य पुत्रकः आज्ञापयतीत्यमृतबिन्दु सुन्दराण्यक्षराणि श्रूयन्ते।[4]

लवः– आर्य! क एष चन्द्रकेतुर्नाम?

जनकः– जानासि रामलक्ष्मणौ दाशरथी?

लवः– एतावेव रामायणकथापुरुषौ?

जनकः– अथ किम्?

लवः– तत्कथं न जानामि?

जनकः– तस्य लक्ष्मणस्यायमात्मजश्चन्द्रकेतुः।

लवः– उर्मिलार्यायाः पुत्रस्तर्हि मैथिलस्य राजर्षेर्दौहित्रः।

अरुन्धती– आविष्कृतं कथाप्रावीण्यं वत्सेन।

1. जाद! अत्थि दे मादा? सुमरसि वा तादम्!
2. तदो कस्स तुमम्?
3. अयि जाद? कहिदव्वं कहेहि।
4. वच्छलक्खणस्स पुतओ आणवेदिति अमिदबिन्दुसुन्दराइं अक्खराइं सुणीअन्दि।

कौशल्या– पुत्र! क्या तुम्हारी माता है? तुम क्या अपने पिता को याद करते हो?

लव– नहीं।

कौशल्या– तब तुम किसके पुत्र हो?

लव– स्वनाम धन्य वाल्मीकि के।

कौशल्या– अरे पुत्र! कहने योग्य बात को कहो।

लव– मैं इतना ही जानता हूँ।

(नेपथ्य में)

अरे सैनिकों! कुमार चन्द्रकेतु आज्ञा प्रदान करते हैं कि–'कोई भी आश्रम के समीपवर्ती प्रदेशों में आक्रमण न करे।'

अरुन्धती और जनक– अरे! अश्वमेध यज्ञ के पवित्र अश्व की रक्षा करने के प्रसंगवश आए हुए, कुमार चन्द्रकेतु का दर्शन होगा, इसलिए आज अत्यन्त सुन्दर दिन है।

कौशल्या– 'वत्स लक्ष्मण का पुत्र आज्ञा दे रहा है' अमृतबिन्दु के समान, ये सुन्दर अक्षर सुनायी दे रहे हैं।

लव– आर्य! ये चन्द्रकेतु कौन हैं?

जनक– दशरथ के पुत्र राम और लक्ष्मण को जानते हो?

लव– क्या ये ही रामायण कथा के मुख्य पुरुष हैं?

जनक– और क्या?

लव– तो फिर उन्हें क्यों नहीं जानूँगा?

जनक– यह चन्द्रकेतु उन्हीं लक्ष्मण का पुत्र है।

लव– तब तो ये चन्द्रकेतु, उर्मिला के पुत्र एवं विदेहराज जनक के दौहित्र हुए।

अरुन्धती– कुमार ने रामायण की कथा में निपुणता प्रदर्शित की है।

जनकः— (विचिन्त्य) यदि त्वमीदृशः कथायामभिज्ञस्तद् ब्रूहि तावत्पश्यामस्तेषां दशरथस्य पुत्राणां कियन्ति किंनामधेयान्यपत्यानि केषु दारेषु प्रसूतानि?

लवः— नायं कथाविभागोऽस्माभिरन्येन वा श्रुतपूर्वः।

जनकः— किं न प्रणीतः कविना?

लवः—प्रणीतः, न तु प्रकाशितः। तस्यैव कोऽप्येकदेशः प्रबन्धान्तरेण रसवानभिनेयार्थः कृतः। तं च स्वहस्तलिखितं मुनिर्भगवान् व्यसृजद्भगवतो भरतस्य तौयत्रिकसूत्रधारस्य।

जनकः— किमर्थम्?

लवः— स किल भगवान् भरतस्तमप्सरोभिः प्रयोजयिष्यतीति।

जनकः— सर्वमिदमाकूतकरस्माकम्।

लवः—महती पुनस्तस्मिन् भगवतो वाल्मीकेरास्था। यतः केषांचिद–न्तेवासिनां हस्तेन तत्पुस्तकं भरताश्रमं प्रति प्रेषितम्। तेषामनुयात्रिक–श्चापपाणिप्रमादच्छेदनार्थमस्मद् भ्राता प्रेषितः।

कौसल्या— भ्रातापि तेऽस्ति?[1]

लवः— अस्त्यार्यः कुशो नाम।

कौसल्या— ज्येष्ठ इति भणितं भवति।[2]

लवः— एवमेतत्! प्रसवानुक्रमेण स किल ज्यायान्।

जनकः— किं यमावायुमन्तौ?

लवः— अथ किम्?

जनकः— वत्स! कथय कथाप्रपंचय कियान्पर्यन्तः?

लवः— अलीकपौरापवादोद्विग्नेन राज्ञा निर्वासितां देवीं देवयजन–सम्भवां सीतामासन्नप्रसववेदनामेकाकिनीमरण्ये लक्ष्मणः परित्यज्य प्रति–निवृत्त इति।

1. भादावि दे अत्थि?
2. जेट्ठेत्ति भणिदं होदि।

जनक— (सोचकर) यदि तुम रामायण की कथा में इतने प्रवीण हो, तो हम भी तुम्हारे ज्ञान को जान लें। बोलो, दशरथ के पुत्रों के कितने और किस–किस नाम वाले, पुत्र किन–किन पत्नियों से हुए?

लव— इस कथाभाग को हमने या दूसरे किसी ने भी अभी तक नहीं सुना है।

जनक— क्या कवि वाल्मीकि ने उसकी रचना नहीं की है?

लव— रचना तो की है, किन्तु उसे प्रकाशित नहीं किया है। उसी का एक भाग उन्होंने दूसरे प्रबन्ध के रूप में, सरस तथा अभिनय के योग्य बनाया है तथा उस कथाभाग को स्वयं अपने हाथ से लिखकर, भगवान् वाल्मीकि ने नृत्य, गीत और वाद्य (तौर्यत्रिक) का प्रयोग करने वाले आचार्य भरत के पास भेजा है।

जनक— किसलिए?

लव— वे भगवान् भरत अप्सराओं द्वारा उसका अभिनय कराएँगे।

जनक— हमारे लिए तो यह सब कुछ गूढ़ रहस्य वाला है।

लव— उस अंश में भगवान् वाल्मीकि की अत्यधिक श्रद्धा है, इसी लिए उन्होंने कुछ विद्यार्थियों के हाथ उस पुस्तक को भरत मुनि के आश्रम में भेजा है और मार्ग में प्रमाद को दूर करने के लिए, उनके पीछे हाथ में धनुष लेकर, हमारे भाई को भी भेजा है।

कौशल्या— तुम्हारा भाई भी है?

लव— हाँ, आर्य कुश नामक भाई है।

कौशल्या— वे तुमसे बड़े हैं।

लव— ऐसा ही है, जन्म के क्रम से निश्चय ही, वे बड़े हैं।

जनक— क्या तुम दोनों जुड़वाँ हो?

लव— जी हाँ।

जनक— वत्स! बताओ, कथा की समाप्ति कहाँ तक है?

लव— प्रजाजनों के मिथ्या अपवाद से उद्विग्न, राजा राम द्वारा निर्वासित, यज्ञभूमि से उत्पन्न और प्रसव–पीड़ा से दुःखी महारानी सीता को लक्ष्मण, वन में अकेली छोड़कर लौट गए।

कौसल्या:— हा वत्से मुग्धमुखि! क इदानीं ते शरीरकुसुमस्य झटिति देवदुर्विलासपरिणाम एकाकिन्या निपतितः?[1]

जनकः— हा वत्से!

नूनं त्वया परिभवं च वनं च घोरं,
तां च व्यथां प्रसवकालकृतामवाप्य।
क्रव्यादगणेषु परितः परिवारयत्सु,
संत्रस्तया शरणमित्यसकृत्मृतोऽहम्।।23।।

(**अन्वय—** परितः क्रव्याद्—गणेषु परिवारयत्सु संत्रस्तया त्वया परिभवम् च, घोरम् वनम् च, प्रसव—काल—कृताम् ताम् व्यथाम् च, अवाप्य, अहम् 'शरणम्' इति, नूनम् असकृत् स्मृतः ।।23।।)

लवः— आर्ये? कावेतौ?

अरुन्धती— इयं कौसल्या। अयं जनकः।

(लवः सबहुमानखेदकौतुकं पश्यति)

जनकः— अहो निर्दयता दुरात्मनां पौराणाम् अहो! रामभद्रस्य क्षिप्रकारिता।

एतद्वैशसवज्रघोरपतनं शश्वन्ममोत्पश्यतः,
क्रोधस्य ज्वलितुं झटित्यवसरश्चापेन शापेन वा।

कौसल्या— (सभयकम्पम्) भगवति! परित्रायताम् प्रमादय कुपितं राजर्षिम्।[2]

लवः— **एतद्धि परिभूतानां प्रायश्चित्तं मनस्विनाम्।**

अरुन्धती—

राजन्नपत्यं रामस्ते पाल्याश्च कृपणा प्रजाः।।24।।

(**अन्वय—** एतत् वैशस—वज्र—घोर—पतनम् शश्वत् उत्पश्यतः मम क्रोधस्य चापेन शापेन वा, झटिति ज्वलितुम् अवसरः, एतत् हि परिभूतानाम् मनस्विनाम् प्रायश्चित्तम्, राजन्! रामः ते अपत्यम्, कृपणाः प्रजाः च पाल्याः ।।24।।)

---

1 : हा वच्छे मुद्धहि! को दाणिं दे सरीरकुसुमस्स झत्ति देव्वदुब्बिलास परिणामो एक्काइणीए निवडिदो?

2 . भअवदि! परित्ताअदु। पसादेहि कुविदं राएसिम्।

कौशल्या— हाय, सुमुखि पुत्रि! पुष्प के समान सुकुमार तुम्हारे अकेले शरीर पर अकस्मात् ही भाग्य का यह कैसा दारुण वज्रपात हुआ?

जनक— हाय, पुत्रि!

चारों ओर व्याघ्र आदि हिंसक जन्तुओं द्वारा घेर लिए जाने पर, भयभीत हुई तुमने, उस निर्वासनरूप तिरस्कार, भयंकर वन तथा प्रसव के समय होने वाली, पीड़ा को प्राप्त करके, निश्चय ही रक्षक समझ कर मुझे बार—बार स्मरण किया होगा।। 23।।

लव— आर्ये! ये दोनों कौन हैं?

अरुन्धती— ये कौशल्या हैं और ये जनक हैं।

(लव अत्यन्त आदर, विषाद तथा कौतूहलपूर्वक देखता है)

जनक— अहो, दुरात्मा नागरिकों की निर्दयता। अहो, रामभद्र की जल्दीबाजी।

सीता के ऊपर हुए हिंसारूपी इस अनर्थ के घोर वज्रपात को निरन्तर देखते हुए, मेरे क्रोध से धनुष अथवा शाप से शीघ्र प्रज्वलित होने का यह अवसर आ गया है।

कौशल्या—(भय के साथ कम्पपूर्वक) भगवति! रक्षा कीजिए। क्रुद्ध हुए राजर्षि को प्रसन्न कीजिए।

लव— अपमानित हुए स्वाभिमानियों का यही प्रतिकार है।

अरुन्धती— हे राजन्! राम तो आपके पुत्र हैं, जबकि बेचारे प्रजाजन तो पालन करने योग्य हैं।।24।।

महाकवि भवभूति की छोटे संवादों से युक्त भाषा दर्शनीय है, क्योंकि प्रस्तुत नाटक में जहाँ एक ओर लम्बे—लम्बे संवादों का प्रयोग किया गया है, वहीं दूसरी ओर इसप्रकार के छोटे संवाद भी अनेक स्थलों पर प्रस्तुत किए गए हैं।

इसीप्रकार वर्ण्यविषय के अनुसार उनकी भाषा भी परिवर्तित होती रही है, कहीं पर समासरहित तथा कहीं पर समासयुक्त भाषा का प्रयोग किया है। भावों के अनुसार प्रसादगुण युक्त भाषा का प्रयोग भी प्रशंसनीय है।

जनकः—

शान्तं वा रघुनन्दने तदुभयं यत्पुत्रभाण्डं हि मे,
भूयिष्ठद्विजबालवृद्धविकलस्त्रैणश्च पौरो जनः।।25।।

(**अन्वय—** वा हि यत् मे पुत्र—भाण्डम्, पौरः जनः च, भूयिष्ठ—द्विज—बाल—वृद्ध—विकल—स्त्रैणः रघुनन्दने तत् उभयम् शान्तम्।।25।।)

(प्रविश्य सम्भ्रान्ताः)

बटवः— कुमार! कुमार! 'अश्वोऽश्व' इति कोऽपि भूतविशेषो जनपदेष्वनुश्रूयते' सोऽयमधुनाऽस्माभिः स्वयं प्रत्यक्षीकृतः।

लवः— 'अश्वोऽश्व' इति नाम पशुसमाम्नाये सांग्रामिके च पठ्यते, तद् ब्रूत कीदृशः?

बटवः— अये, श्रूयताम्—

पश्चात्पुच्छं वहति विपुलं, तच्च धूनोत्यजस्रं,
दीर्घग्रीवः स भवति, खुरास्तस्य चत्वार एव।
शष्पाण्यत्ति, प्रकिरति शकृत्पिण्डकानाम्रमात्रान्,
किं व्याख्यानैर्व्रजति स पुनर्दूरमेह्येहि यामः।।26।।

(**अन्वय—** पश्चात् विपुलम् पुच्छम् वहति, तत् च अजस्रम् धूनोति, सः दीर्घ—ग्रीवः भवति, तस्य चत्वारः एव खुराः, शष्पाणि अत्ति, आम्र—मात्रान् शकृत्—पिण्डकान् प्रकिरति, व्याख्यानैः किम्? सः पुनः दूरम् व्रजति, एहि, एहि यामः।।26।।)

(इत्यजिने हस्तयोश्चाकर्षन्ति)

लवः— (सकौतुकोपरोधविनयम्) आर्याः! पश्यत। एभिर्नीतोऽस्मि।

(इति त्वरितं परिक्रामति)

अरुन्धतीजनकौ— महत्कौतुकं वत्सस्य।

कौसल्याः— अरण्यगर्भरूपालापैर्यूयं तोषिता वयं च। भगवति! जानामि तं पश्यन्ती वंचितेव। तस्मादितोऽन्यतो भूत्वा प्रेक्षामहे तावत् पलायमानं दीर्घायुषम्।[1]

1. अरण्यगब्भरूवालावेहिं तुह्मे तोसिदा अह्मे अ। भअवदि! जाणामि तं पेक्खन्त वंचिदा विअ। ता इदो अण्णदो भविअ पेक्खम्ह दाव पलायन्तं दीहाउम्।

जनक—

अथवा वे दोनों (चाप और शाप) **राम के विषय में भी शान्त हो जाएँ, क्योंकि वे राम तो मेरे पुत्ररूपी मूल धन ही हैं, जबकि नागरिक लोगों में तो बहुत से ब्राह्मण, बालक, वृद्ध, अंगहीन तथा स्त्रियाँ हैं।।25।।**

(घबराए हुए प्रवेश करके)

बटुकगण— कुमार! कुमार! जनपदों में, जो घोड़ा—घोड़ा इस प्रकार का कोई प्राणीविशेष सुना जाता है, उसे अभी हमने स्वयं प्रत्यक्ष रूप से देख लिया है।

लव— 'घोड़ा—घोड़ा' यह नाम तो पशु—शास्त्र तथा संग्राम—शास्त्र के अन्तर्गत पढ़ा जाता है। इसलिए बताओ वह कैसा है?

बटुकगण— अरे! सुनो,

वह पीछे लम्बी पूँछ को धारण करता है और उसे निरन्तर हिलाता रहता है। वह लम्बी गर्दन वाला है, उसके चार खुर हैं, कोमल घास खाता है, आम के फलों के बराबर लीद के टुकड़ों को फैलाता है। अधिक कहने से क्या लाभ? फिर वह दूर जा रहा है, इसलिए आओ, आओ, हम लोग जा रहे हैं।।26।।

(ऐसा कहकर उसके हाथ और मृगचर्म को खींचते हैं)

लव— (जिज्ञासा, आग्रह और विनम्रतापूर्वक) आर्यगण! देखिए, मैं इनके द्वारा ले जाया जा रहा हूँ।

(ऐसा कहकर शीघ्रतापूर्वक घूमता है)

अरुन्धती और जनक— बालक को अत्यधिक कौतूहल है।

कौशल्या— इन वनवासी बालकों के वार्तालाप से आप और हम लोग अत्यन्त सन्तुष्ट हुए हैं। भगवति! मुझे तो ऐसा प्रतीत हो रहा है कि मैं उसे देखती हुई ठगी सी रह गयी हूँ। इसलिए जरा यहाँ से दूसरी ओर होकर, इस दीर्घायु को भागते हुए देखते हैं।

अरुन्धती— अतिजवेन दूरमतिक्रान्तः सः चपलः कथं दृश्यते?

कंचुकी— (प्रविश्य) भगवान् वाल्मीकिराह— 'ज्ञातव्यमेतदवसरे भवद्भिरिति।

जनकः— अतिगम्भीरमेतत्किमपि। भगवत्यरुन्धति! सखि कौसल्ये! आर्य गृष्टे! स्वयमेव गत्वा भगवन्तं प्राचेतसं पश्यामः।

(इति निष्क्रान्तो वृद्धवर्गः)

(प्रविश्य)

बटवः— पश्यतु कुमारस्तावदाश्चर्यम्।

लवः— दृष्टमवगतं च। नूनमाश्वमेधिकोऽयमश्वः।

बटवः— कथं ज्ञायते?

लवः— ननु मूर्खाः पठितमेव हि युष्माभिरपि तत्काण्डम्। किं न पश्यथ? प्रत्येकशतसंख्याः कवचिनो दण्डिनो निषंगिणश्च रक्षितारः। तत्प्रायमेवान्यदपि दृश्यते। यदि च विप्रत्ययस्तत्पृच्छत।

बटवः— भो भोः, किंप्रयोजनोऽयमश्वः परिवृतः पर्यटति?

लवः— (सस्पृहमात्मगतम्) 'अश्वमेध' इति नाम विश्वविजयिनां क्षत्रियाणामूर्जस्वलः सर्वक्षत्रपरिभावी महानुत्कर्षनिकषः।

(नेपथ्ये)

योऽयमश्वः पताकेयमथवा वीरघोषणा।
सप्तलोकैकवीरस्य, दशकण्ठकुलद्विषः।।27।।

(अन्वय— अयम् यः अश्वः, इयम् सप्त—लोक—एक—वीरस्य, दश—कण्ठ—कुल—द्विषः पताका अथवा वीर—घोषणा ।।27।।)

लवः— (सगर्वम्)— अहो संदीपनान्यक्षराणि।

बटवः— किमुच्यते? प्राज्ञः खलु कुमारः।

लवः— भो भोः, तत्किमक्षत्रिया पृथिवी? यदेवमुद्घोष्यते।

(नेपथ्ये)

रे रे, महाराजं प्रति कुतः क्षत्रियः?

अरुन्धती— अत्यधिक वेग से दूर गया हुआ, वह चंचल बालक भला कैसे देखा जा सकता है?

कंचुकी— (प्रवेश करके) भगवान् वाल्मीकि ने कहा है कि आपको इसे अवसर आने पर ही जान लेना चाहिए।

जनक— यह कुछ गम्भीर बात है। भगवति अरुन्धति! सखि कौशल्ये! आर्य गृष्टि! स्वयं ही चलकर भगवान् 'प्राचेतस्' का दर्शन करते हैं।

(ऐसा कहकर वृद्धवर्ग निकल जाता है)

(प्रवेश करके)

बटुकगण— कुमार! जरा इस आश्चर्य को देखो।

लव— देख लिया और जान भी लिया। निश्चय ही, यह अश्वमेध यज्ञ का घोड़ा है।

बटुकगण— यह कैसे पता लगता है।

लव— अरे मूर्खों! तुम लोगों ने भी तो वह काण्ड पढ़ा ही है। क्या तुम नहीं देख रहे हो? कवच और दण्ड धारण करने वाले, तरकश से युक्त, प्रत्येक प्रकार के रक्षक, यहाँ सैंकड़ों की संख्या में विद्यमान हैं और उसी प्रकार की सेना भी दिखायी दे रही है। यदि अविश्वास हो तो पूछ भी लो।

बटुकगण— अरे, अरे! सेना से घिरा हुआ, यह अश्व किस प्रयोजन से घूम रहा है?

लव— (स्पृहापूर्वक मन में) अश्वमेध यज्ञ वस्तुतः संसार को जीतने वाले क्षत्रियों की, सभी राजाओं को पराजित करने वाली, अत्यधिक ऊर्जस्विनी बहुत बड़ी कसौटी है।

(नेपथ्य में)

यह जो घोड़ा है, यह वस्तुतः सातों लोकों में एकमात्र वीर और रावण वंश के शत्रु, श्रीराम की विजय पताका या वीरघोषणा है।।27।।

लव— (गर्वपूर्वक) अहो, ये अक्षर तो क्रोध को बढ़ाने वाले हैं।

बटुकगण— क्या कहते हो? तब तो निश्चय ही कुमार अत्यन्त विज्ञ हैं।

लव— अरे, अरे! सैनिकों! क्या पृथिवी, क्षत्रियों से शून्य हो गयी है? जो इसप्रकार की घोषणा की जा रही है।

(नेपथ्य में)

अरे, रे, महाराज राम के सामने भला कौन क्षत्रिय है?

लवः– धिग्जालमान्।

यदि नो सन्ति सन्त्येव, केयमद्य विभीषिका।
किमुक्तैरेभिरधुना, तां पताकां हरामि वः।।28।।

(अन्वय– यदि नो सन्ति, सन्ति एव, अद्य इयम् का विभीषिका? अधुना एभि उक्तैः किम्? वः ताम् पताकाम् हरामि ।।28।।)

हे बटवः! परिवृत्य लोष्ठैरभिघ्नन्त उपनयतैनमश्वम्। एष रोहितानां मध्येचरो भवतु।

(प्रविश्य सक्रोधः)

पुरुषः– धिक् चपल! किमुक्तवानसि? तीक्ष्णतरा ह्यायुधश्रेणयः शिशोरपि दृप्तां वाचं न सहन्ते। राजपुत्रश्चन्द्रकेतुर्दुर्दान्तः, सोऽप्यपूर्वारण्यदर्शनाक्षिप्तहृदयो न यावदायाति, तावदावरितमनेन तरुगहनेनापसर्पत।

बटवः– कुमारः! कृतं कृतमश्वेन। तर्जयन्ति विस्फारितशरासनाः कुमारमायुधीयश्रणेयः दूरे चाश्रमपदम्। इतस्तदेहि हरिणप्लुतैः पलायामहे।

लवः– किं नाम विस्फुरन्ति शस्त्राणि? (इति धनुरारोपयन्)

ज्याजिह्वयावलयितोत्कटकोटिदंष्ट्र–
मुद्भूरिघोरघनघर्घरघोषमेतत्।
ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्र–
जृम्भाविडम्बि विकटोदरमस्तु चापम्।।29।।

(अन्वय– ज्या–जिह्वया वलयित–उत्कट–कोटि–दंष्ट्रम्, उद्भूरि–घोर–घन–घर्घर–घोषम्, एतत् चापम् ग्रास–प्रसक्त–हसत्–अन्तक–वक्त्र–यन्त्र–जृम्भा–विडम्बि, विकट–उदरम् अस्तु ।।29।।)

(इति यथोचितं परिक्रम्य निष्क्रान्ताः सर्वे)

।। इति महाकविभवभूतिविरचिते उत्तररामचरिते 'कौसल्याजनक–योगो' नाम चतुर्थोऽङ्कः।।

लव– तुम जालिमों (नीचों) को धिक्कार है। **निश्चय ही वे हैं और यदि क्षत्रिय नहीं है,** (तो मैं कहता हूँ कि) **तुम यह व्यर्थ का भय क्यों दिखा रहे हो? इस समय इन कथनों से क्या लाभ?, क्योंकि मैं तुम्हारी उस पताका का अपहरण कर रहा हूँ।।28।।**

हे ब्राह्मण कुमारों! इस घोड़े को घेरकर, ढेलों से मारते हुए, आश्रम में ले जाओ। यह भी यहाँ मृगों के बीच में ही विचरण करे।

(प्रवेश करके क्रोधपूर्वक)

पुरुष– अरे! चंचल, तुम्हें धिक्कार है। तुमने क्या कहा? अरे, प्रचण्ड शस्त्रों को धारण करने वाले, जो बालक की भी अहंकारयुक्त वाणी को सहन नहीं कर पाते हैं। ऐसे राजकुमार चन्द्रकेतु अत्यधिक दुर्दान्त हैं। अद्भुत वन को देखने में आकृष्ट चित्त वाले वे, जब तक नहीं आते हैं, तब तक शीघ्र ही तुम इन सघन वृक्षों से होकर, भाग जाओ।

बटुकगण– कुमार! इस घोड़े से बस करो। धनुष को चमकाने वाले, शस्त्रधारियों के समूह हमें डाँट रहे हैं और आश्रम स्थल दूर है। इसलिए आओ, हरिणों के समान कुलाँचे भरते हुए, हम यहाँ से भाग जाते हैं।

लव– क्या कहा? शस्त्र चमक रहे हैं?

(ऐसा कहकर धनुष पर 'ज्या' चढ़ाते हुए)

जिसकी प्रत्यंचा ही जिह्वा है, इसे खींचने से गोलाकार होने से इसके दोनों किनारे, जिसकी भयंकर दाढ़ हैं तथा जो बड़ी भयंकर हुँकार भर रहा है। निगलने में लगे हुए होने से फैले हुए, यमराज के मुख की जम्भाई का अनुकरण करने वाला, मेरा यह धनुष विकराल उदर वाला हो जाए।।29।।

(ऐसा कहकर यथायोग्य घूमकर सभी चले जाते हैं)

।। इसप्रकार महाकवि भवभूति विरचित उत्तररामचरित में 'कौशल्याजनकयोग' नामक चतुर्थ अंक का डॉ. राकेश शास्त्री, बाँसवाड़ा **द्वारा किया हुआ हिन्दी अनुवाद पूर्ण हुआ।।**

।। श्रीः ।।

पंचमोऽङ्कः

(नेपथ्ये)

भो भोः! सैनिकाः! जातमवलम्बनमस्माकम्।

नन्वेष त्वरितसुमन्त्रनुद्यमान–
प्रोद्वल्गत्प्रजवितवाजिना रथेन।
उत्खातप्रचलितकोविदारकेतुः,
श्रुत्वा वः प्रधनमुपैति चन्द्रकेतुः।।1।।

(**अन्वय–** ननु त्वरित–सुमन्त्र–नुद्यमान–प्रोद्वल्गत्–प्रजवित–वाजिना रथेन, उत्खात–प्रचलित–कोविदार–केतुः एषः चन्द्रकेतुः वः प्रधनम् (युद्धम्) श्रुत्वा उपैति ।।1।।)

(ततः प्रविशति सुमन्त्रसारथिना रथेन धनुष्पाणिः साद्भुतहर्षसंभ्रमश्चन्द्रकेतुः)

चन्द्रकेतुः– आर्य सुमन्त्र! पश्य पश्य–

किरति कलितकिंचित्कोपरज्यन्मुखश्री–
रविरतगुणगुंजत्कोटिना कार्मुकेण।
समरशिरसि चंचत्पंचचूडश्चमूना–
मुपरि शरतुषारं कोऽप्ययं वीरपोतः।।2।।

(**अन्वय–**कलित–किंचित्–कोप–रज्यन्–मुखश्रीः, चंचत्–पंच–चूडः, कः अपि अयम् वीर–पोतः, समर–शिरसि अविरत–गुण–गुंजत्–कोटिना कार्मुकेण चमूनाम् उपरि शर–तुषारम् किरति ।।2।।)

(साश्चर्यम्)

मुनिजनशिशुरेकः सर्वतः संप्रकोपा–
न्नव इव रघुवंशस्याप्रसिद्धिप्ररोहः।
दलितकरिकपोलग्रन्थिटङ्कारघोर–
ज्वलितशरसहस्रः कौतुकं मे करोति।।3।।

पंचम अङ्क

अरे! अरे! सैनिकों! हमें सहारा मिल गया।

निश्चय ही, सुमन्त्र द्वारा शीघ्रतापूर्वक हाँके जाते हुए, चंचल एवं अत्यधिक वेगवान् घोड़ों वाले, रथ द्वारा, ऊँची–नीची भूमि पर चलने से शीघ्रतापूर्वक हिलती हुई, कोविदार से युक्त पताका वाले, चन्द्रकेतु आप लोगों के युद्ध को सुनकर चले आए हैं।।1।।

(उसके बाद, सारथि सुमन्त्र से अधिष्ठित, धनुष हाथ में लिए हुए, विस्मय, हर्ष एवं घबराहट के साथ चन्द्रकेतु प्रवेश करता है)

चन्द्रकेतु– आर्य सुमन्त्र! देखो, देखो,

कुछ क्रोध से लाल हुई मुख की शोभा वाला, हिलती हुई पाँच शिखाओं से युक्त, यह कोई वीर बालक, युद्धभूमि में प्रत्यंचा के कोनों पर टंकार करते हुए धनुष से, निरन्तर सेनाओं के ऊपर, ओलों के समान, वृष्टि कर रहा है।।2।।

(आश्चर्यपूर्वक)

रघुवंश की अप्रतिष्ठा के नए अंकुर के समान, यह मुनि बालक अकेला ही, अत्यधिक क्रोध में भरकर, हाथियों के गण्डस्थलों को विदीर्ण करने वाले, हजारों जलते हुए बाणों से उत्पन्न, शब्दों से मेरे मन में कौतूहल उत्पन्न कर रहा है।।3।।

प्रस्तुत अंक के कथोपकथनों में प्राकृत भाषा का प्रयोग नहीं हुआ है। यहाँ संवाद वीरोचित भावनाओं से ओतप्रोत, लव, चन्द्रकेतु तथा सुमन्त्र आदि पात्रों के चरित्रों का यथोचित उद्घाटन करने वाले, सशक्त तथा स्वाभाविकता लिए हुए हैं। कथोपकथनों के विषय में महाकवि की सरल शैली भी अभिव्यक्त हुई है।

(अन्वय– रघुवंशस्य नवः अप्रसिद्धि–प्ररोहः इव, मुनिजन–शिशुः एकः, सर्वतः संप्रकोपात् दलित–करि–कपोल–ग्रन्थि–टङ्कार–घोर–ज्वलित – शर–सहस्रः कौतुकम् मे करोति।।3।।)

सुमन्त्रः– आयुष्मन्!

अतिशयितसुरासुरप्रभावं, शिशुमवलोक्य तथैव तुल्यरूपम्।
कुशिकसुतमखद्विषां प्रमाथे, धृतधनुषं रघुनन्दनं स्मरामि।।4।

(अन्वय– अतिशयित–सुर–असुर–प्रभावम् शिशुम् अवलोक्य तथा एव तुल्य–रूपम् कुशिक–सुत–मख–द्विषाम् प्रमाथे धृत–धनुषम् रघुनन्दनम् स्मरामि।।4।)

चन्द्रकेतु– मम त्वेकमुद्दिश्य भूयसामारम्भ इति हृदयमपत्रपते।

अयं हि शिशुरेकको मदभरेण भूरिस्फुर–
त्करालकरकन्दलीजटिलशस्त्रजालैर्बलैः।
क्वणत्कनककिङ्किणीझणझणायितस्यन्दनै–
रमन्दमददुर्दिनद्विरदडामरैरावृतः।।5।।

(अन्वय– हि अयम् एककः शिशुः, मद–भरेण भूरि–स्फुरत्–कराल–कर–कन्दली–जटिल–शस्त्र–जालैः क्वणत्–कनक–किङ्किणी–झण–झणायित–स्यन्दनैः अमन्द–मद–दुर्दिन–द्विरद–डामरैः बलैः आवृतः)

सुमन्त्रः– वत्स! एभिः समस्तैरपि नालमस्य, किं पुनर्व्यस्तैः?

चन्द्रकेतुः– आर्य! त्वर्यतां त्वर्यताम्। अनेन हि महानाश्रितजन–प्रमाथोऽस्माकमारब्धः। तथाहि–

आगर्जद्गिरिकुंजकुंजरघटानिस्तीर्णकर्णज्वर–
ज्यानिर्घोषममन्ददुन्दुभिरवैराध्मातमुज्जृम्भयन्।
वेल्लद्भैरवरुण्डखण्डनिकरैर्वीरो विधत्ते भुवं,
तृष्यत्कालकरालवक्त्रविघसव्याकीर्यमाणामिव।।6।।

(अन्वय– (अयम्) वीरः अमन्द–दुन्दुभि–रवैः आध्मातम् आगर्जद्–गिरि–कुंज–कुंजर–घटा–निस्तीर्ण–कर्ण–ज्वर–ज्या–निर्घोषम् उज्जृम्भयन्, वेल्लद्–भैरव–रुण्ड–खण्ड–निकरैः, तृष्यत्–काल–कराल–वक्त्र– विघस–व्याकीर्यमाणाम् इव भुवम् विधत्ते ।।6।।)

सुमन्त्र– आयुष्मन्!

उसी प्रकार से समानरूप वाले, देवों एवं दैत्यों के प्रभाव का भी अतिक्रमण करने वाले, इस बालक को देखकर, विश्वामित्र के यज्ञ में विघ्न उत्पन्न करने वाले, राक्षसों को विनष्ट करते समय, धनुष धारण किए हुए, रघुनन्दन राम को मैं स्मरण कर रहा हूँ।।4।।

चन्द्रकेतु– इस एक बालक को ही लक्ष्य करके, हमारे अनेक सैनिकों द्वारा युद्ध किया जा रहा है, इसलिए मेरा हृदय लज्जित हो रहा है,

क्योंकि यह अकेला बालक, मद की अधिकता के कारण, अत्यधिक चमकते हुए, कठिनतापूर्वक दिखायी देने वाले, हाथरूपी सम्पुट के भीतर ग्रहण किए गए, अनेक शस्त्रों के समूह से युक्त, बजने वाली, स्वर्णमयी क्षुद्र–घण्टिकाओं से झण–झण शब्द करने वाले, रथों से युक्त, अत्यन्त मदरूपी जल की वृष्टि करने वाले, दुर्दिन के समान, हाथियों से भयंकर, सैनिकों द्वारा घिरा हुआ है।।5।।

सुमन्त्र– वत्स! ये सभी सेनाएँ मिलकर भी, इसके लिए पर्याप्त नहीं हैं, फिर विभक्त सेनाओं की तो बात ही क्या है?

चन्द्रकेतु– आर्य! शीघ्रता कीजिए, शीघ्रता कीजिए। वस्तुतः इसने हमारे सैनिकों का महान् विनाश आरम्भ कर दिया है, क्योंकि–

यह वीर बालक, भयंकर नगाड़ों की गड़गड़ाहट से बढ़े हुए, अत्यधिक गर्जन करने वाले, हाथियों की पंक्ति के कानों को भी पीड़ित कर देने वाले, अपने धनुष की डोरी के शब्द को उत्पन्न करता हुआ, छटपटाते हुए, भयंकर कबन्धों तथा उनके सिरों के समूह से मानो भूमि को, भूखे कराल–काल के मुख से भोजन के बिखरे हुए, जूठन के कणों के समान, आच्छादित कर रहा है।।6।।

उपर्युक्त अंश में लव का श्रीराम के साथ साम्य, युद्ध क्षेत्र में उसके अप्रतिम पराक्रम का विस्तार से उल्लेख किया गया है। अल्पायु होते हुए भी उसकी युद्ध करने की अप्रतिम सामर्थ्य एवं कला से सहृदय प्रभावित हुए बिना नहीं रहता है। वीररस का सुन्दर परिपाक भी दर्शनीय है। साथ ही, युद्ध–वर्णन की महाकवि की चित्रात्मक शैली की कुशलता भी प्रशंसनीय है।

सुमन्त्रः– (स्वगतम्) कथमीदृशेन सह वत्सस्य चन्द्रकेतोर्द्वन्द्व–संप्रहारमनुजानीमः। (विचिन्त्य) अथवा इक्ष्वाकुकुलवृद्धाः, खलु वयम्। प्रत्युपस्थिते रणे का गतिः?

चन्द्रकेतुः– (सविस्मयलज्जासम्भ्रमम्) हन्त धिक्। अपावृत्तान्येव सर्वतः सैन्यानि मम।

सुमन्त्रः– (रथवेगं निरूप्य) आयुष्मन्। एष ते वाग्विषयीभूतः स वीरः।

चन्द्रकेतुः– (विस्मृतिमभिनीय) आर्य, किं नामधेयमाख्यातमाह्–वायकैः।

सुमन्त्रः– 'लव' इति।

चन्द्रकेतुः–

भो भो लव! महाबाहो! किमेभिस्तव सैनिकैः।
एषोऽहमेहि मामेव तेजस्तेजसि शाम्यतु।।7।।

(अन्वय– भो भो लव! महाबाहो! किम् एभिः तव सैनिकैः एषः अहम् एहि माम् एव तेजः तेजसि शाम्यतु।।7।।)

सुमन्त्रः– कुमार! पश्य पश्य–

विनिवर्तित एष वीरपोतः पृतनानिर्मथनात्त्वयोपहूतः।
स्तनयित्नुरवादिभावलीनामवमर्दादिव दृप्तसिंहशावः।।8।।

(अन्वय– त्वया उपहूतः एषः वीर–पोतः, दृप्त–सिंह–शावः, स्तनयित्नु–रवात् इभ–अवलीनाम् अवमर्दात् इव पृतना–निर्मथनात् विनिवर्तितः।।8।।)

(ततः प्रविशति धीरोद्धतपराक्रमो लवः)

लवः– साधु राजपुत्र! साधु! सत्यमैक्ष्वाकः खल्वसि। तदहं परागत एवास्मि।

(नेपथ्ये महान् कलकलः)

लवः– (सावष्टम्भं परावृत्य) कथमिदानीं भग्ना अपि पुनः प्रति–निवृत्ताः पृष्ठानुसारिणः पर्यवष्टम्भयन्ति मां चमूपतयः। धिग्जाल्मान्।

अयं शैलाघातक्षुभितवडवावक्त्रहुतभुक्–
प्रचण्डक्रोधार्चिर्निचयकवलत्वं व्रजतु मे।

सुमन्त्र– (मन में) इसप्रकार के योद्धा के साथ, पुत्र चन्द्रकेतु को भला द्वन्द्वयुद्ध की आज्ञा हम कैसे दे दें। (सोचकर) अथवा हम तो इक्ष्वाकु वंश के वृद्ध हैं। युद्ध के उपस्थित होने पर उपाय भी क्या है?

चन्द्रकेतु– (आश्चर्य, लज्जा तथा सम्भ्रम के साथ) हाय, धिक्कार है। मेरी सेनाएँ तो चारों ओर भाग रही हैं।

सुमन्त्र–(रथ के वेग का अभिनय करके) आयुष्मन्! यह, वह वीर अब तुम्हारी वाणी का विषय हो गया है।

चन्द्रकेतु– (भूलने का अभिनय करके) आर्य! मुझे बुलाने वाले सैनिकों द्वारा इसका क्या नाम कहा था?

सुमन्त्र– 'लव' ऐसा।

चन्द्रकेतु–

अरे! अरे! विशाल भुजाओं वाले, लव! इन सैनिकों से तुम्हारा क्या प्रयोजन? यह मैं हूँ, तुम मेरे पास आओ, जिससे तेज, तेज में शान्त हो जावे।। 7।।

सुमन्त्र– कुमार! देखो, देखो।

तुम्हारे द्वारा आह्वान किया गया, यह वीर बालक, सेना के संहार से निवृत्त होकर, तुम्हारी ओर उसीप्रकार आ रहा है, जैसे दर्पयुक्त सिंह–शावक मेघ का गर्जन सुनकर हाथियों के समूह के मर्दन से विरत हो जाता है।।8।।

(उसके बाद, धीर और उद्धत पराक्रमी लव प्रवेश करता है)

लव– साधु, राजकुमार, साधु। निश्चय ही, तुम इक्ष्वाकुवंशीय हो, इसीलिए मैं भी तुम्हारे सामने आ गया हूँ।

(नेपथ्य में महान् कोलाहल होता है)

लव– (गर्व सहित लौटकर) क्या तितर–बितर हो जाने पर भी, ये सेनापति फिर से लौटकर मेरा पीछा करते हुए, मुझे रोक रहे हैं। इन जालिमों (नीचों) को धिक्कार है।

यह चारों ओर उठता हुआ, सेना के प्रबल और भयंकर खेल का कोलाहल, प्रलयकाल की वायु से प्रताड़ित समुद्र के प्रवाह के समान,

समन्तादुत्सर्पद्घनतुमुलसेनाकलकलः,
पयोराशेरोघः प्रलयपवनास्फालित इव।।9।।

(अन्वय—अयम् समन्तात् उत्सर्पत्—घन—तुमुल—सेना—कलकलः, प्रलय—पवन—आस्फालितः, पयो—राशेः ओघः इव मे शैल—आघात—क्षुभित—वडवा—वक्त्र—हुतभुक्—प्रचण्ड—क्रोध—अर्चिः—निचय—कवलत्वम् व्रजतु।)

(सवेगं परिक्रामति)

चन्द्रकेतुः— भो भोः कुमार!

अत्यद्भुतादपि गुणातिशयात्प्रियो मे
तस्मात्सखा त्वमसि, यन्मम तत्तवैव।
तत्किं निजे परिजने कदनं करोषि?
नन्वेष दर्पनिकषस्तव चन्द्रकेतुः।।10।।

(अन्वय— अति—अद्भुतात् गुण—अतिशयात् अपि, त्वम् मे प्रियः सखा असि, तस्मात् यत् मम, तत् तव एव, तत् निजे परिजने किम् कदनम् करोषि? ननु एषः चन्द्रकेतुः तव दर्प—निकषः(अस्ति)।।10।।)

लवः— (सहर्षसम्भ्रमं परावृत्य) अहो! महानुभावस्य प्रसन्नकर्कशावीरवचनप्रयुक्तिर्विकर्तनकुलकुमारस्य। तत्किमेभिः? एनमेव तावत्संभावयामि।

(पुनर्नेपथ्ये कलकलः)

लवः— (सक्रोधनिर्वेदम्) आः कदर्थीकृतोऽहमेभिर्वीरसंवादविघ्नकारिभिः पापैः। (इति तदभिमुखं परिक्रामति)

चन्द्रकेतुः— आर्य! दृश्यतां द्रष्टव्यमेतत्।

दर्पेण कौतुकवता मयि बद्धलक्ष्यः
पश्चाद्बलैरनुसृतोऽयमुदीर्णधन्वा।
द्वेधा समुद्धतमरुत्तरलस्य धत्ते,
मेघस्य मघवतचापधरस्य लक्ष्मीम्।।11।।

(अन्वय— कौतुकवता दर्पेण मयि बद्ध—लक्ष्यः, पश्चात् बलैः अनुसृतः, उदीर्ण—धन्वा अयम् द्वेधा समुद्धत—मरुत्—तरलस्य मघवत—चाप—धरस्य मेघस्य लक्ष्मीम् धत्ते।।11।।)

पर्वतों के आघात से क्षुब्ध, वडवानल के प्रचण्ड कोप की ज्वालाओं की भाँति, मेरी क्रोधाग्नि के ग्रासभाव को प्राप्त हो जाए।।9।।

(वेगपूर्वक घूमता है)

चन्द्रकेतु— अरे! अरे, कुमार,

अत्यधिक आश्चर्य के कारण तथा गुणों के उत्कर्ष से, तुम मेरे प्रिय मित्र हो, इसलिए जो मेरा है, वह तुम्हारा ही है, तब फिर अपने ही सेवकों को क्यों पीड़ित कर रहे हो? निश्चय ही, यह चन्द्रकेतु तुम्हारे गर्व की कसौटी है।।10।।

लव— (सहर्ष, सम्भ्रमपूर्वक लौटकर) अहो, महाप्रभाव से युक्त, सूर्यवंश के कुमार के वीरतापूर्वक वचनों का प्रयोग प्रसाद एवं कठोरता से युक्त है, इसलिए इन सैनिकों से क्या? जब तक (युद्ध द्वारा) इन्हीं का सत्कार करता हूँ।

(नेपथ्य में फिर से कोलाहल होता है)

लव— (क्रोध एवं निर्वेदपूर्वक) ओह, वीर के साथ वार्तालाप के प्रसंग में, मैं विघ्न उत्पन्न करने वाले, इन पापियों द्वारा व्यथित हुआ हूँ।

(ऐसा कहकर सेना की ओर घूमता है)

चन्द्रकेतु— आर्य! देखने योग्य इस बालक को देखिए।

कौतूहल से युक्त, गर्व से मेरी ओर निशाना लगाए हुए, पीछे की ओर सेनाओं द्वारा अनुगत, यह वीर बालक, दोनों ओर चलने वाले, भयंकर वायु से चंचल, इन्द्रधनुष से युक्त, मेघ की शोभा को धारण कर रहा है।।11।।

चन्द्रकेतु द्वारा शत्रु की प्रशंसा, उसके उदार व्यक्तित्व की परिचायक है, जिन्हें साम—नीति के प्रयोग के रूप में भी देखा जा सकता है। लव का युद्ध—कौशल दर्शनीय है। इसीप्रकार महाकवि की युद्ध—वर्णन की सुन्दर एवं चित्रात्मक शैली भी प्रशंसनीय कही जा सकती है।

सुमन्त्रः— कुमार एवैनं द्रष्टुमपि जानाति। वयं तु केवलं परवन्तो विस्मयेन।

चन्द्रकेतुः— भो भो राजानः!

संख्यातीतैर्द्विरदतुरगस्यन्दनस्थैः पदाता—
वत्रैकस्मिन् कवचनिचितैर्नद्धचर्मोत्तरीये।
कालज्येष्ठैरपरवयसि ख्यातिकामैर्भवद्भि—
र्योऽयं बद्धो युधि समभरस्तेन धिग्वो धिगस्मान्।।12।।

(**अन्वय**— संख्या—अतीतैः, द्विरद—तुरग—स्यन्दनस्थैः, कवच—निचितैः, काल—ज्येष्ठैः अपर—वयसि ख्याति—कामैः भवद्भिः एकस्मिन् पदातौ नद्ध—चर्म—उत्तरीये अत्र युधि यः अयम् समभरः बद्धः, तेन वः धिक्, अस्मान् धिक्।।12।।)

लवः— (सोन्माथम्) आः, कथमनुकम्पते नाम! (ससंभ्रमं विचिन्त्य) भवतु। कालहरणप्रतिषेधाय जृम्भकास्त्रेण तावत्सैन्यानि संस्तम्भयामि।

(इति ध्यानं नाटयति)

सुमन्त्रः— तत्किमकस्मादुल्लोलाः सैन्यघोषाः प्रशाम्यन्ति?

लवः— पश्याम्येनमधुना प्रगल्भम्।

सुमन्त्रः— (ससंभ्रमम्) वत्स! मन्ये कुमारकेणानेन जृम्भकास्त्रमा—मन्त्रितमिति।

चन्द्रकेतुः— अत्र कः सन्देहः?

व्यतिकर इव भीमस्तामसो वैद्युतश्च,
प्रणिहितमपि चक्षुर्ग्रस्तमुक्तं हिनस्ति।
अथ लिखितमिवैतत्सैन्यमस्पन्दमास्ते,
नियतमजितवीर्यं जृम्भते जृम्भकास्त्रम्।।13।।

(**अन्वय**— तामसः वैद्युतः च भीमः व्यतिकरः इव, प्रणिहितम् अपि ग्रस्त—मुक्तम् चक्षुः हिनस्ति, अथ एतत् सैन्यम् लिखितम् इव अस्पन्दम् आस्ते, नियतम् अजित—वीर्यम् जृम्भकास्त्रम् जृम्भते।।13।।)

आश्चर्यमाश्चर्यम्।

पातालोदरकुंजपुंजिततमःश्यामैर्नभो जृम्भकै—
रुत्तप्तस्फुरदारकूटकपिलज्योतिर्ज्वलद्दीप्तिभिः।
कल्पाक्षेपकठोरभैरवमरुद्व्यस्तैरभिस्तीर्यते
लीनाम्भोदतडित्कडारकुहरैर्विन्ध्याद्रिकूटैरिव।।14।।

सुमन्त्र— कुमार! तुम ही इसको देखने में समर्थ हो, क्योंकि हम तो आश्चर्य के कारण पराधीन हो गए हैं।

चन्द्रकेतु— अरे! अरे, राजाओं,

असंख्य हाथी, घोड़ों एवं रथों पर सवार, कवच को धारण किए हुए, अवस्था में बड़े तथा वृद्धावस्था में प्रसिद्धि की कामना करने वाले, आप लोगों ने अकेले, पैदल तथा मृगचर्म को उत्तरीय के रूप में बाँधे हुए, इस लव पर युद्ध में, जो यह सामूहिक प्रयास किया है, इसके लिए आप लोगों को धिक्कार है और हमें भी धिक्कार है।।12।।

लव— (व्यथित होकर) अरे! क्या यह मुझ पर दया कर रहा है? (सम्भ्रमपूर्वक विचार करके) ठीक है, समय बेकार न करने के लिए, तब तक इन सैनिकों को **जृम्भकास्त्र** से स्तम्भित कर देता हूँ।

(ऐसा कहकर ध्यान का अभिनय करता है)

सुमन्त्र— तो क्या कारण है कि सैनिकों के तुमुल नाद शान्त हो रहे हैं।

लव— अब मैं इस ढीठ को देखता हूँ।

सुमन्त्र— (घबराहट के साथ) वत्स! मैं समझता हूँ कि इस कुमार ने जृम्भकास्त्र का प्रयोग किया है।

चन्द्रकेतु— इसमें क्या सन्देह है?

अन्धकार तथा विद्युत् के भयंकर सम्पर्क के समान, प्रयत्नपूर्वक निक्षेप किए जाने पर भी, पहले अन्धकार से ग्रस्त तथा बाद में प्रकाश से मुक्त होकर, यह दृष्टि को बाधित कर रहा है। इसके अलावा यह सेना चित्रलिखित सी निश्चेष्ट हो गयी है। निश्चय ही, यह अजेय पराक्रम वाला, 'जृम्भकास्त्र' आविर्भूत हो रहा है।।13।।

आश्चर्य है, आश्चर्य है।

पाताल के मध्य स्थित लतागृहों में इकट्ठे हुए, अन्धकार के समान, श्यामवर्ण वाले, तपे हुए देदीप्यमान पीतल की प्रभा से युक्त, जृम्भकास्त्र, प्रलयकालीन प्रचण्ड तथा भयंकर वायु द्वारा, उड़ाए गए, छिपे हुए मेघों वाले और बिजली से पीली गुफाओं से युक्त, विन्ध्याचल के शिखरों के तुल्य आकाश को पूर्णरूप से व्याप्त कर रहे हैं।।14।।

(अन्वय— पाताल—उदर—कुंज—पुंजित—तमः—श्यामैः, उत्तप्त—स्फुरत् —आरकूट—कपिल—ज्योतिः—ज्वलद्—दीप्तिभिः जृम्भकैः, कल्प—आक्षेप—कठोर—भैरव—मरुद्—व्यस्तैः, लीन—अम्भोद—तडित्—कडार—कुहरैः, विन्ध्य —अद्रि—कूटैः इव नभः अभिस्तीर्यते।।14।।)

सुमन्त्रः— कुतः पुनरस्य जृम्भकाणामागमः स्यात्।

चन्द्रकेतुः— भगवतः प्राचेतसादिति मन्यामहे।

सुमन्त्रः— वत्स! नैतदेवमस्त्रेषु विशेषतो जृम्भकेषु। यतः—

कृशाश्वतनया ह्येते, कृशाश्वात्कौशिकं गताः।
अथ तत्सम्प्रदायेन रामभद्रे स्थिता इति।।15।।

(अन्वय— हि एते कृशाश्व—तनयाः, कृशाश्वात् कौशिकम् गताः, अथ तत् सम्प्रदायेन रामभद्रे स्थिताः, इति।।15।।)

चन्द्रकेतुः— अपरेऽपि प्रचीयमानसत्त्वप्रकाशाः स्वयं सर्वं मन्त्रदृशः पश्यन्ति।

सुमन्त्रः— वत्स! सावधानो भव। परागतस्ते प्रतिवीरः।

कुमारौः— (अन्योन्यं प्रति) अहो! प्रियदर्शनः कुमारः।

(सस्नेहानुरागं निर्वर्ण्य)

यदृच्छासंवादः किमु? गुणगणानामतिशयः?
पुराणो वा जन्मान्तरनिबिडबद्धः परिचयः।
निजो वा सम्बन्धः किमु विधिवशात्कोऽप्यविदितो?
ममैतस्मिन्दृष्टे हृदयमवधानं रचयति।।16।।

(अन्वय— एतस्मिन् दृष्टे यदृच्छा—संवादः किमु? गुण—गणानाम् अतिशयः किमु? जन्मान्तर—निबिड—बद्धः पुराणः परिचयः वा, विधि—वशात् अविदितः, कः अपि निजः सम्बन्धः वा, मम हृदयम् अवधानम् रचयति।।16।।)

सुमन्त्रः— भूयसां जीविनामेव धर्मं एष, यत्र स्वरसमयी कस्यचित्क्वचित्प्रीतिः, यत्र लौकिकानामुपचारस्तारामैत्रकं चक्षूराग इति। तदप्रतिसंख्येयनिबन्धनं प्रमाणमामनन्ति।

अहेतुः पक्षपातो यस्तस्य नास्ति प्रतिक्रिया।
स हि स्नेहात्मकस्तन्तुरन्तर्भूतानि सीव्यति।।17।।

सुमन्त्र— इसे जृम्भकास्त्रों की प्राप्ति कहाँ से हुई होगी?

चन्द्रकेतु— हमारा यह मानना है कि भगवान् वाल्मीकि से प्राप्त हुए होंगे।

सुमन्त्र— वत्स! इन अस्त्रों के विषय में ऐसा नहीं है, विशेषरूप से जृम्भकास्त्रों के विषय में, क्योंकि—

ये कृशाश्व के पुत्र तुल्य हैं तथा कृशाश्व से ये विश्वामित्र को प्राप्त हुए और इसके बाद, विश्वामित्र के उपदेश से रामभद्र में स्थित हुए हैं।।15।।

चन्द्रकेतु— सत्त्वगुण के आविर्भाव से दूसरे मन्त्रद्रष्टा ऋषि भी स्वयं सब कुछ देख लेते हैं।

सुमन्त्र— वत्स! सावधान हो जाओ, तुम्हारा प्रतिद्वन्द्वी योद्धा आ गया है।

दोनों कुमार— (एक दूसरे के प्रति) अहो! कुमार प्रियदर्शन वाले हैं। (स्नेह एवं अनुरागपूर्वक देखकर)

इन्हें देखने पर क्या यह वार्तालाप देवयोग से होने वाला है? अथवा क्या इसमें गुणों का उत्कर्ष ही कारण है? या फिर कोई जन्म जन्मान्तर का पुराना परिचय निमित्त है? अथवा दैववश अज्ञात कोई निजी सम्बन्ध मेरे हृदय को एकाग्र सा कर रहा है।।16।।

सुमन्त्र— बहुत से प्राणियों का यह स्वभाव होता है कि उन्हें कहीं भी किसी में भी आनन्द प्रदान करने वाली प्रीति हो जाती है, जिस विषय में लौकिक लोगों का मानना है कि—'यह नेत्रों की पुतलियों की मित्रता है अथवा नयनों का प्रेम है।' विद्वान् लोग इसप्रकार के प्रेम को अतर्क्य प्रमाण के रूप में स्वीकार करते हैं,

जो अकारण पक्षपात होता है, उसका कोई प्रतिकार सम्भव नहीं है, क्योंकि ऐसा प्रेमसूत्र प्राणियों के हृदयों को अन्दर से ही 'सी' देता है।।17।।

(**अन्वय–** यः अहेतुः पक्षपातः तस्य प्रतिक्रिया न अस्ति, हि सः स्नेहात्मकः तन्तुः भूतानि अन्तः सीव्यति।।17।।)

कुमारौ– (अन्योन्यमुदिश्य)

एतस्मिन्मसृणितराजपट्टकान्ते,
मोक्तव्याः कथामिव सायकाः शरीरे।
यत्प्राप्तौ मम परिरम्भणाभिलाषा–
दुन्मीलत्पुलककदम्बमंगमास्ते ।।18।।

(**अन्वय–** मसृणित–राजपट्ट–कान्ते, एतस्मिन् शरीरे सायकाः कथम् इव मोक्तव्याः? यत् प्राप्तौ परिरम्भण–अभिलाषात् मम अंगम् उन्मीलत्–पुलक–कदम्बम् आस्ते।।18।।)

किं चाक्रान्तकठोरतेजसि गतिः का नाम शस्त्रं विना?
शस्त्रेणापि हि तेन किं? न विषयो जायेत यस्येदृशः।
किं वक्ष्यत्ययमेव युद्धविमुखं मामुद्यतेऽप्यायुधे?
वीराणां समयो हि दारुणरसः स्नेहक्रमं बाधते।।19।।

(**अन्वय–** किम् च आक्रान्त–कठोर–तेजसि शस्त्रम् विना का नाम गतिः? यस्य ईदृशः विषयः न जायेत, तेन शस्त्रेण अपि किम्? आयुधे उद्यते अपि युद्ध–विमुखम् माम्, अयम् एव किम् वक्ष्यति? हि दारुण–रसः वीराणाम् समयः स्नेह–क्रमम् बाधते।।19।।)

सुमन्त्रः– (लवं निर्वर्ण्य सास्रमात्मगतम्) हृदय! किमन्यथा परिप्लवसे?

मनोरथस्य यद्बीजं, तद्दैवेनादितो हृतम्।
लतायां पूर्वलूनायां, प्रसवस्योद्भवः कुतः।।20।।

(**अन्वय–**मनोरथस्य यत् बीजम्, तत् दैवेन आदितः हृतम्, पूर्व–लूनायाम् लतायाम् प्रसवस्य कुतः उद्भवः?।।20।।)

चन्द्रकेतुः– अवतराम्यार्य सुमन्त्र! स्यन्दनात्।

सुमन्त्रः– कस्य हेतोः?

चन्द्रकेतुः– एकस्तावदयं वीरपुरुषः पूजितो भवति। अपि च खल्वार्य! क्षात्रधर्मः परिपालितो भवति। न रथिनः पादचारमभियुंजन्ती' ति शास्त्रविदः परिभाषन्ते।

दोनों कुमार– (एक दूसरे को लक्ष्य करके)

चिकने रेशमी वस्त्र के समान सुन्दर, इस शरीर पर बाणों को भला मैं कैसे छोडूँ? जिसे प्राप्त करने पर, आलिंगन की अभिलाषा से मेरा अंग रोमांचयुक्त हो रहा है।।18।।

इसके अलावा कठोर तपस्या से युक्त इसमें, शस्त्र के अभाव में भला क्या उपाय है? जिसका इसप्रकार का वीर लक्ष्य न बने, उस शस्त्र से भी भला क्या लाभ? शस्त्र के उठाने पर भी युद्ध से पराङ्मुख मुझे, भला यह क्या कहेगा? क्योंकि वीररस से युक्त पराक्रमी लोगों का आचरण, प्रेम के क्रम को तो रोक ही देता है।।19।।

सुमन्त्र– (लव को देखकर, अश्रुपूर्वक मन में) हे हृदय! तुम व्यर्थ ही चंचल क्यों हो रहे हो?

हमारे मनोरथ का जो कारण था, उसे तो भाग्य ने पहले ही छीन लिया है। पहले से काटी गयी लता में पुष्प की उत्पत्ति भला कैसे हो सकती है?।।20।।

चन्द्रकेतु– आर्य सुमन्त्र! मैं रथ से उतर रहा हूँ।

सुमन्त्र– किस कारण?

चन्द्रकेतु– एक तो इस वीरपुरुष का स्वागत होगा। इसके अलावा क्षत्रियधर्म का पालन भी भलीप्रकार हो जाएगा, क्योंकि रथ पर आरूढ़ लोग पैदल व्यक्ति से युद्ध नहीं करते हैं, ऐसा शास्त्रों के वेत्ता परिभाषित करते हैं।

चन्द्रकेतु तथा लव के आन्तरिक भावों का प्रस्तुतीकरण अन्तर्द्वन्द्व के रूप में प्रशंसनीय रहा है। लव को देखकर सुमन्त्र की राम–पुत्र होने की कल्पना के विषय में सुन्दर अभिव्यक्ति की गयी है। सीता की उपमा के लिए पूर्व में काटी गयी लतारूप में तथा लव का पुष्परूप में उपमान का प्रयोग अत्यन्त मनभावन बन पड़ा है, जिसे भावाभिव्यक्ति में सहयोगी होने के साथ–साथ कवि का उपमान विषयक मौलिक चिन्तन भी कहा जा सकता है।

सुमन्त्रः— (स्वगतम्) आः, कष्टां दशामनुप्रपन्नोऽस्मि।

कथं हीदमनुष्ठानं, मादृशः प्रतिषेधतु?
कथं वाऽभ्यनुजानातु साहसैकरसां क्रियाम्।।21।।

(**अन्वय—** हि मादृशः इदम् अनुष्ठानम् कथम् प्रतिषेधतु, साहस—एक—रसाम् क्रियाम् कथम् वा अभि—अनु—जानातु ।।21।।)

चन्द्रकेतुः— यदा तातमिश्रा अपि पितुः प्रियसखं त्वामर्थसंशयेषु पृच्छन्ति, तत्किमार्यो विमृशते?

सुमन्त्रः— आयुष्मन्! एवं यथाधर्ममभिमन्यसे।

एष सांग्रामिको न्याय एष धर्मः सनातनः।
इयं हि रघुसिंहानां, वीरचारित्रपद्धतिः।।22।।

(**अन्वय—** एषः सांग्रामिकः न्यायः, एषः सनातनः धर्मः, हि इयम् रघु—सिंहानाम् वीर—चारित्र—पद्धतिः।।22।।)

चन्द्रकेतुः— अप्रतिरूपं वचनमार्यस्य।

इतिहासं पुराणं च, धर्मप्रवचनानि च।
भवन्त एव जानन्ति, रघूणां च कुलस्थितिम्।।23।।

(**अन्वय—** भवन्तः एव इतिहासम् च, पुराणम् च, धर्म—प्रवचनानि, रघूणाम् कुल—स्थितिम् च जानन्ति।।23।।)

सुमन्त्रः— (सस्नेहास्रं परिष्वज्य)

जातस्य ते पितुरपीन्द्रजितो निहन्तु—
र्वत्सस्य वत्स! कति नाम दिनान्यमूनि।
तस्याप्यपत्यमनुतिष्ठति वीरधर्मं,
दिष्ट्यागतं दशरथस्य कुलं प्रतिष्ठाम्।।24।।

(**अन्वय—** वत्स! इन्द्रजितः निहन्तुः वत्सस्य ते पितुः अपि जातस्य अमूनि कति नाम दिनानि? तस्य अपत्यम् अपि वीर—धर्मम् अनुतिष्ठति, दिष्ट्या दशरथस्य कुलम् प्रतिष्ठाम् आगतम्।।24।।)

चन्द्रकेतुः— (सकष्टम्)

अप्रतिष्ठे कुलज्येष्ठे, का प्रतिष्ठा कुलस्य नः?
इति दुःखेन तप्यन्ते त्रयो नः पितरोऽपरे।।25।।

सुमन्त्र— (मन में) अहो, कष्टमयी दशा को प्राप्त हो गया हूँ। **क्योंकि मेरे समान व्यक्ति इस कार्य का प्रतिषेध कैसे करे? अथवा एकमात्र साहस—प्रधान इसे करने की अनुमति भी कैसे प्रदान करे?।।21।।**

चन्द्रकेतु— आर्य! कर्तव्य—अकर्तव्य का सन्देह होने पर, हमारे पूजनीय पितृगण राम आदि भी, अपने पिता दशरथ के प्रिय आपसे ही परामर्श लेते हैं, तो फिर आप इस समय विचार क्यों कर रहे हैं?

सुमन्त्र— आयुष्मन्! तुम तो इसप्रकार की परिस्थिति में धर्म के अनुसार कर्तव्य से सुपरिचित हो।

यही संग्राम के सम्बन्ध में न्याय है, यही सनातन धर्म है। वस्तुतः रघुवंश के वीरों की यही शूर—परिपाटी भी है।।22।

चन्द्रकेतु— आपका वचन अनुपम है,

आप ही इतिहास, पुराण, धर्मशास्त्रों के वचन तथा रघुवंश के राजाओं की कुल—मर्यादा को जानते हैं।।23।।

सुमन्त्र— (स्नेह के अश्रुओं के साथ आलिंगन करके)

वत्स! मेघनाद को मारने वाले, वात्सल्य भाजन, तुम्हारे पिता लक्ष्मण को भी, उत्पन्न हुए कितने दिन हुए हैं? उनका पुत्र भी वीर धर्म का अनुष्ठान कर रहा है। सौभाग्यवश दशरथ का कुल प्रतिष्ठा को प्राप्त हो गया है।।24।।

चन्द्रकेतु— (कष्टपूर्वक)

कुल में ज्येष्ठ (श्रीराम) **के निःसन्तान होने पर, हमारे वंश की प्रतिष्ठा कहाँ है? इसीलिए दुःख से हमारे दूसरे तीन पितृजन** (भरत, लक्ष्मण तथा शत्रुघ्न) **सन्ताप का अनुभव कर रहे हैं।। 25।।**

रघुकुल के प्रतिष्ठारूप श्रीराम के परिवार में सुमन्त्र की उच्च एवं सम्माननीय स्थिति की पुष्टि हुई है, जिससे उनके उज्ज्वल चरित्र पर भी प्रकाश पड़ता है। प्राचीनकाल में राजपरिवारों में बड़े पुत्र को ही राजसिंहासन पर प्रस्थापित किया जाता था, इसीलिए राम के निःसन्तान होने के कारण, उनके वंश की प्रतिष्ठा न हो पाने की बात का उल्लेख किया गया है, जिससे उनके सभी भाई दुःखी हैं।

(अन्वय– कुल–ज्येष्ठे अप्रतिष्ठे नः कुलस्य का प्रतिष्ठा? इति दुःखेन नः अपरे त्रयः पितरः तप्यन्ते।।25।।)

सुमन्त्रः– हृदयमर्मदारणानि एतानि चन्द्रकेतोर्वचनानि।

लवः– हन्त, मिश्रीकृतक्रमो रसो वर्तते–

यथैन्दावानन्दं व्रजति समुपोढे कुमुदिनी,
तथैवास्मिन्दृष्टिर्मम, कलहकामः पुनरयम्।
रणत्कारक्रूरक्वणितगुणगुंजद्गुरुधनु–
र्धृतप्रेमा बाहुर्विकचविकरालव्रणमुखः।।26।।

(अन्वय– यथा इन्दौ समुपोढे, कुमुदिनी आनन्दम् व्रजति, तथा एव अस्मिन् मम दृष्टिः, रणत्कार–क्रूर–क्वणित–गुण–गुंजत्–गुरु–धनुः धृत–प्रेमा विकच–विकराल–व्रण–मुखः, अयम् बाहुः पुनः कलह–कामः।।26।)

चन्द्रकेतुः– (अवतरणं निरूपयन्) आर्य! अयमसावैक्ष्वाकश्चन्द्रकेतुरभिवादयते।

सुमन्त्रः– अहितस्यैव पुनः पराभवाय महानादिवराहः कल्पताम्। अपि च–

देवस्त्वां सविता धिनोतु समरे गोत्रस्य यस्ते पति–
स्त्वां मैत्रावरुणोऽभिनन्दतु गुरुर्यस्ते गुरूणामपि।
ऐन्द्रावैष्णवमाग्निमारुतमथो सौपर्णमोजोऽस्तु ते,
देयादेव च रामलक्ष्मणधनुर्ज्याघोषमन्त्रो जयम्।।27।।

(अन्वय– समरे देवः सविता त्वाम् धिनोतु, यः ते गोत्रस्य पतिः, मैत्रावरुणः त्वाम् अभिनन्दतु, यः ते गुरूणाम् अपि गुरुः, अथो ऐन्द्रा–वैष्णवम्, आग्नि–मारुतम्, सौपर्णम् ओजः ते अस्तु, राम–लक्ष्मण–धनुः–ज्या–घोष–मन्त्रः च, जयम् एव देयात् ।।27।।)

लवः– अतीव नाम शोभसे रथस्थ एव। कृतं कृतमत्यादरेण।

चन्द्रकेतुः– तर्हि महाभागोऽप्यन्यं रथमलंकरोतु।

लवः– आर्य! प्रत्यारोपय रथोपरि राजपुत्रम्।

सुमन्त्रः– त्वमप्यनुरुध्यस्व वत्सस्य चन्द्रकेतोर्वचनम्।

लवः– को विचारः स्वेषूपकरणेषु? किंत्वरण्यसदो वयमनभ्यस्त रथचर्याः।

सुमन्त्र– चन्द्रकेतु के वचन निश्चय ही हृदय के मर्मस्थलों को विदीर्ण करने वाले हैं।

लव– अहो! वात्सल्य रस, वीररस से भलीप्रकार मिश्रित क्रम वाला हो रहा है,

जिसप्रकार चन्द्रमा के उदित होने पर कुमुदिनी आनन्द को प्राप्त होती है, उसीप्रकार इस चन्द्रकेतु में मेरी दृष्टि भी प्रफुल्लता को प्राप्त हो रही है। रणत्कार से भयंकर शब्द करने वाली, प्रत्यंचा के गूँजते हुए बड़े धनुष में प्रेम करने वाला, अग्रभाग में भयंकर घावों के चिह्नों से युक्त, यह मेरा बाहु फिर से युद्ध करने के लिए उत्सुक हो रहा है।।26।।

चन्द्रकेतु– (उतरने का अभिनय करते हुए) आर्य!(सुमन्त्र) इक्ष्वाकु कुल में उत्पन्न, यह वह चन्द्रकेतु आपको अभिवादन कर रहा है।

सुमन्त्र– तुम्हारे शत्रु की पराजय के लिए भगवान् आदिवराह समर्थ होवें और भी,

युद्ध में सविता देवता तुम्हें प्रसन्न करें, जो तुम्हारे वंश के स्वामी हैं। महर्षि वसिष्ठ तुम्हारा अभिनन्दन करें, जो तुम्हारे गुरुओं के भी गुरु हैं। इसके अलावा इन्द्र और विष्णु का, अग्नि और वायु का एवं गरुड़ का तेज तुम्हें प्राप्त हो। राम, लक्ष्मण के धनुष की प्रत्यंचा का शब्दरूपी मन्त्र तुम्हें विजय प्रदान करे।।27।।

लव– आप वस्तुतः रथ पर स्थित ही अत्यधिक सुशोभित हो रहे हैं। इसलिए अधिक सम्मान की आवश्यकता नहीं है।

चन्द्रकेतु– तो आप भी दूसरे रथ को सुशोभित करें।

लव– आर्य! राजकुमार को रथ पर चढ़ा दीजिए।

सुमन्त्र– तुम भी तो वात्सल्य के भाजन चन्द्रकेतु के वचनों का अनुसरण करो।

लव– अपने साधनों के प्रयोग में विचार कैसा? हम तो जंगल में रहने के कारण, रथ पर चलने के अभ्यस्त नहीं हैं।

सुमन्त्रः– जानासि वत्स! दर्पसौजन्ययौर्यदाचरितम्। यदि पुन–स्त्वामीदृशमैक्ष्वाको राजा रामभद्रः पश्येत्तदा तस्य स्नेहेन हृदयम–भिष्यन्देत्।

लवः–अन्यच्च चन्द्रकेतो! सुजनः स राजर्षिः श्रूयते।(सलज्जमिव)

वयमपि न खल्वेवंप्रायाः क्रतुविघातिनः
क इह न गुणैस्तं राजानं जनो बहु मन्यते।
तदपि खलु मे स व्याहारस्तुरंगरक्षिणां,
विकृतिमखिलक्षत्राक्षेपप्रचण्डतयाऽकरोत्।।28।।

(**अन्वय–** वयम् अपि न खलु, एवम् प्रायाः, क्रतु–विघातिनः, कः इह जनः च गुणैः, राजानम् बहु न मन्यते? तत् अपि खलु तुरंग–रक्षिणाम् सः व्याहारः, अखिल–क्षत्र–आक्षेप–प्रचण्डतया मे विकृतिम् अकरोत्।।28।।)

चन्द्रकेतुः– किं नु भवतस्तातप्रतापोत्कर्षेऽप्यमर्षः।

लवः– अस्त्विहमर्षो मा भूद्वा। अन्यदेतत्पृच्छामि दान्तं हि राजानं राघवं शृणुमः। स किल नात्मना दृप्यति, नाप्यस्य प्रजा वा दृप्ताः जायन्ते। तत्किं मनुष्यास्तस्य राक्षसीं वाचमुदीरयन्ति?

ऋषयो राक्षसीमाहुर्वाचमुन्मत्तदृप्तयोः।
सा योनिः सर्ववैराणां, सा हि लोकस्य निष्कृतिः।।29।।

(**अन्वय–** ऋषयः उन्मत्त–दृप्तयोः वाचम् राक्षसीम् आहुः, सा सर्व–वैराणाम् योनिः, सा हि लोकस्य निष्कृतिः।।29।।)

इति हस्म तां निन्दन्ति। इतरामभिष्टुवन्ति।

कामं दुग्धे, विप्रकर्षत्यलक्ष्मीं, कीर्तिं सूते, दुर्हृदो निष्प्रलान्ति।
शुद्धां शान्तां मातरं मंगलानां, धेनुं धीराः सूनृतां वाचमाहुः।।30

(**अन्वय–**धीराः सूनृताम् वाचम् शुद्धाम्, शान्ताम्, मंगलानाम् मातरम् धेनुम् आहुः, कामम् दुग्धे, अलक्ष्मीम् विप्रकर्षति, कीर्तिम् सूते, दुर्हृदः निष्प्रलान्ति।।30।।)

सुमन्त्रः– परिभूतोऽयं बत कुमारः वाक्चेतसान्तेवासी। वदत्ययम–भ्युपपन्नार्षेण संस्कारेण।

सुमन्त्र– वत्स! अहंकार एवं विनय का जो आचरण है, उसको तुम जानते हो। इस स्थिति में यदि तुम्हें इक्ष्वाकु वंश के राजा राम देख लें, तो स्नेह से उनका हृदय पिघल ही जाए।

लव– और भी हे चन्द्रकेतु! वे राजर्षि राम सज्जन सुने जाते हैं, (लज्जित सा होकर)

यद्यपि यज्ञ के प्रति द्वेष करने वाले दैत्यों के शत्रु, श्रीराम में हम लोग भी प्रेम करने वाले हैं, क्योंकि कौन व्यक्ति भला गुणों के कारण उन राजा का अत्यधिक आदर नहीं करता है? फिर भी अश्व के रक्षकों की उस उक्ति से सभी क्षत्रियों के तिरस्कार तथा क्रूरता के कारण निश्चय ही मुझमें (क्रोधरूपी) विकार को उत्पन्न कर दिया है।।28।।

चन्द्रकेतु– क्या आपको पिताश्री के प्रताप के उत्कर्ष में भी अमर्ष हो रहा है।

लव– उनमें अमर्ष हो अथवा न हो, किन्तु मैं तो दूसरी बात पूछता हूँ कि श्रीराम तो जितेन्द्रिय (दान्त) सुने जाते हैं, वे स्वयं भी अहंकार नहीं करते हैं तथा न ही उनकी प्रजा ही कभी गर्व करती है, तो फिर उनके लोग राक्षसी–वाणी का उच्चारण क्यों करते हैं?

ऋषि लोग उन्मत्त तथा अहंकारी वाणी को 'राक्षसी' कहते हैं। वह सभी विरोधों का उत्पत्ति स्थान है तथा वही संसार में तिरस्कार का भी कारण है।।29।।

इसीलिए सज्जन लोग उसकी निन्दा तथा दूसरी प्रिय वाणी की प्रशंसा करते हैं।

अतः विद्वान् लोग सत्य और प्रिय वाणी को शुद्ध, शान्त तथा कल्याणों की उत्पत्ति करने वाली 'कामधेनु' कहते हैं, जो व्यक्ति की अभिलाषाओं को पूरा करती है, अलक्ष्मी को दूर करती है, कीर्ति को उत्पन्न करती है, शत्रुओं को विनष्ट करती है।।30।।

सुमन्त्र– खेद है कि महर्षि वाल्मीकि के शिष्य, ये कुमार अप–मानित हुए हैं, इसीलिए ऋषियों के संस्कार के अनुसार क्रोध की भावना से ऐसा बोल रहे हैं।

लवः– यत्पुनश्चन्द्रकेतो! वदसि किन्तु भवतस्तातप्रतापोत्कर्षेऽप्यमर्ष इति, तत्पृच्छामि 'किं व्यवस्थितविषयः क्षत्रधर्म' इति?

सुमन्त्रः– नैव खलु जानासि देवमैक्ष्वाकम्! तद्विरमातिप्रसंगात्।

सैनिकानां प्रमाथेन, सत्यमोजायितं त्वया।
जामदग्न्यस्य दमने, न हि निर्बन्धमर्हसि।।31।।

(**अन्वय–** सत्यम्, सैनिकानाम् प्रमाथेन त्वया ओजायितम्, हि जामदग्न्यस्य दमने निर्बन्धम्, न अर्हसि।।31।।)

लवः– (सहासम्) आर्य? जामदग्न्यस्य दमनः स राजेति कोऽप्यमुच्चैर्वादः?

सिद्धं ह्येतद्वाचि वीर्यं द्विजानां
बाह्वोर्वीर्यं यत्तु तत्क्षत्रियाणाम्।
शस्त्रग्राही ब्राह्मणो जामदग्न्य–
स्तस्मिन्दान्ते का स्तुतिस्तस्य राज्ञः।।32।।

(**अन्वय–** हि एतत् सिद्धम्, द्विजानाम् वाचि वीर्यम्, यत् बाह्वोः वीर्यम् तत् तु क्षत्रियाणाम्, जामदग्न्यः शस्त्र–ग्राही ब्राह्मणः, तस्मिन् दान्ते तस्य राज्ञः का स्तुतिः?।।32।।)

चन्द्रकेतुः– (सोन्माथमिव) आर्य सुमन्त्र! कृतमुत्तरोत्तरेण।

कोऽप्येष सम्प्रति नवः पुरुषावतारो,
वीरो न यस्य भगवान्भृगुनन्दनोऽपि।
पर्याप्तसप्तभुवनाभयदक्षिणानि,
पुण्यानि तातचरितान्यपि यो न वेद।।33।।

(**अन्वय–**सम्प्रति एषः कः अपि, नवः पुरुष–अवतारः, यस्य भगवान् भृगु–नन्दनः अपि न वीरः, यः पर्याप्त–सप्त–भुवन–अभय–दक्षिणानि पुण्यानि तात–चरितानि अपि न वेद।।33।।)

लवः– को हि रघुपतेश्चरितं महिमानं च न जानाति? यदि नाम किंचिदस्ति वक्तव्यम्। अथवा शान्तम्।

वृद्धास्ते न विचारणीयचरितास्तिष्ठन्तु हुं वर्तते,
सुन्दस्त्रीमथनेऽप्यकुण्ठयशसो लोके महान्तो हि ते।
यानि त्रीणि कुतोमुखान्यपि पदान्यासन्खरायोधने,
यद्वा कौशलमिन्द्रसूनुनिधने तत्राप्यभिज्ञो जनः।।34।।

लव– इसके अलावा हे चन्द्रकेतु! जो तुम यह कह रहे हो कि 'पिताजी (तात) के प्रताप के उत्कर्ष में आपको असहनीयता है', तो मैं तुमसे पूछता हूँ कि– 'क्या क्षत्रिय धर्म एक ही व्यक्ति में निहित है?'

सुमन्त्र– तुम इक्ष्वाकुवंश के श्रीराम को नहीं जानते हो, इसलिए इस अनावश्यक प्रसंग से बस करो।

इन सैनिकों के मर्दन से तुमने निश्चय ही, तेजस्वी के समान आचरण किया है, किन्तु परशुराम का भी दमन करने वाले, श्रीराम के सम्बन्ध में कठोर वचनों को बोलना तुम्हारे लिए उचित नहीं है।।31।।

लव– (हास्यपूर्वक) आर्य! वे राजा राम यदि परशुराम का दमन करने वाले हैं, तो इसमें कौन सी प्रशंसा की बात है?

ब्राह्मणों की वाणी में पराक्रम विद्यमान रहता है, तो भुजाओं का बल क्षत्रियों का है। परशुराम शस्त्र ग्रहण करने वाले ब्राह्मण हैं, तो (उनके दमन में) **राजा राम की क्या बड़ाई है?।।32।।**

चन्द्रकेतु– (व्यथित सा होकर) आर्य सुमन्त्र! इस समय उत्तर एवं प्रत्युत्तर की आवश्यकता नहीं है।

क्योंकि अब तो यह कोई नया ही पुरुषरूपी अवतार हो गया है, जिसके लिए भगवान् परशुराम भी वीर नहीं हैं। इसके अलावा जो यह सभी सात भुवनों को पूर्णरूप से अभय प्रदान करने वाले, पिता श्रीराम के चरितों से भी परिचित नहीं है।।33।।

लव– श्रीराम के चरित और महिमा को कौन नहीं जानता है? यदि कुछ विशेष हो तो कहो, अथवा कहने से क्या लाभ है?

वस्तुतः वे श्रीराम वयोवृद्ध हैं, इसीलिए उनके चरित्र पर विचार करना उचित नहीं है, अतः उन्हें तो रहने ही दो, क्योंकि इस विषय में मौन रखना ही उचित है। वस्तुतः 'सुन्द' की स्त्री 'ताड़का' का वध करने पर भी अकुण्ठित यश वाले, वे लोक में महान् ही हैं। इसके अलावा 'खर' के साथ युद्ध में, जो तीन पग पीछे हट गए थे, इन्द्र के पुत्र 'बाली' के वध में, उन्होंने जो कौशल दिखाया, उससे भी लोग अभिज्ञ हैं।।34।।

(अन्वय– हुम् वर्तते, ते वृद्धाः विचारणीय–चरिताः न, तिष्ठन्तु, सुन्द–स्त्री–मथने अपि अकुण्ठ–यशसः (ते) लोके, महान्तः हि, खर–आयोधने यानि त्रीणि कुतः मुखानि पदानि अपि आसन्, वा इन्द्र–सूनु–निधने यत् कौशलम्, तत्र अपि जनः अभिज्ञः।।34।।)

चन्द्रकेतुः– आः तातापवादिन्। भिन्नमर्याद! अति हि नाम प्रगल्भसे।

लवः– अये, मय्येव भ्रुकुटीमुखः संवृत्तः?

सुमन्त्रः– स्फुरितमनयोः क्रोधेन। तथाहि–

क्रोधेनोद्धतधूतकुन्तलभरः सर्वांगजो वेपथुः,
किंचित्कोकनदच्छदस्य सदृशे नेत्रे स्वयं रज्यतः।
धत्ते कान्तिमिदं च वक्त्रमनयोर्भंगेन भीमं भ्रुवो–
श्चन्द्रस्योद्भटलांछनस्य कमलस्योद्भ्रान्तभृंगस्य च।।35।।

(अन्वय– सर्वांगजः क्रोधेन उद्धत–धूत–कुन्तल–भरः, वेपथुः, स्वयम् कोक–नद–च्छदस्य सदृशे नेत्रे किंचित् रज्यतः, भ्रुवः भंगेन भीमम् अनयोः इदम् च वक्त्रम्, उद्भट–लांछनस्य चन्द्रस्य उद्भ्रान्त–भृंगस्य च कमलस्य कान्तिम् धत्ते।।35।।)

लवः– कुमार! कुमार! एह्येहि। विमर्दक्षमां भूमिमवतरावः।

(इति निष्क्रान्ताः सर्वे)

।। इति महाकविभवभूतिविरचित उत्तररामचरिते 'कुमारविक्रमो' नाम पंचमोऽङ्कः।

चन्द्रकेतु– आः! तात (पिता श्रीराम) की निन्दा करने वाले! मर्यादा का अतिक्रमण करने वाले! तुम तो बहुत ही ढ़ीठ हो रहे हो।

लव– अरे! ये तो मेरे ऊपर ही भौंहों को चढ़ाने लग गए हैं।

सुमन्त्र– इन दोनों का क्रोध भड़क उठा है, क्योंकि–

क्रोध के कारण सम्पूर्ण केशसमूह को अत्यधिक कँपा देने वाला, इसके समस्त शरीर में कम्प उत्पन्न हो रहा है। स्वभाव से ही लाल कमलदल के समान, दोनों नेत्र लाल हो रहे हैं तथा भौंहों को टेढ़ा करने से, इन दोनों के मुख भी कलंकयुक्त चन्द्रमा के समान एवं ऊपर भ्रमण करने वाले, भौरों से युक्त कमल की भाँति, कान्ति को धारण कर रहे हैं।।35।।

लव– कुमार! कुमार! आओ, आओ। हम दोनों युद्ध के योग्य भूमि में उतरते हैं।

(ऐसा कहकर सभी निकल जाते हैं)

।। इसप्रकार महाकवि भवभूति विरचित उत्तररामचरित में 'कुमार विक्रम' नामक पंचम अंक का डॉ. राकेश शास्त्री, बाँसवाड़ा **द्वारा किया हुआ हिन्दी अनुवाद पूर्ण हुआ।।**

षष्ठोऽङ्कः

(ततः प्रविशति विमानेनोज्ज्वलं विद्याधरमिथुनम्)

विद्याधरः– अहो नु खल्वनयोर्विकर्तनकुलकुमारयोरकाण्डकलह–प्रचण्डयोयुरुद्योतितक्षत्रलक्ष्मीकयोरत्यद्भुतोद्भ्रान्तदेवासुराणि विक्रान्त–विलसितानि। तथाहि! प्रिये पश्य–

झणज्झणितकंकणक्वणितकिंकिणीकं धनु–
र्ध्वनद्गुरुगुणाटनीकृतकरालकोलाहलम्।
वितत्य किरतोः शरानविरतं पुनः शूरयो–
र्विचित्रमभिवर्तते भुवनभीममायोधनम्।।1।।

(अन्वय– झण–झणित–कंकण–क्वणित–किंकिणीकम्, ध्वनत्–गुरु–गुण–अटनी–कृत–कराल–कोलाहलम्, धनुः वितत्य शरान् अविरतम् किरतोः, शूरयः पुनः विचित्रम् भुवन–भीमम् आयोधनम् अभिवर्तते।।1।।)

जृम्भितं च विचित्राय मंगलाय द्वयोरपि।
स्तनयित्नोरिवामन्ददुन्दुभेर्दुन्दुमायितम्।।2।।

(अन्वय– द्वयोः अपि विचित्राय मंगलाय स्तनयित्नोः इव अमन्द–दुन्दुभेः दुन्दुमायितम् जृम्भितम् च ।।2।।)

तत्प्रवर्त्यतामनयोः प्रवीरयोरनवरतमविरलमिलितविकचकनककमल–कमनीयसंहतिरमरतरुतरुणमणिमुकुलनिकरमकरन्दसुन्दरः पुष्पनिपातः।

विद्याधरी– तत्किमिति पुर आकाशं दुर्दर्शतरलतडिच्छटाकडार–मपरमिव झटिति संवृत्तम्।[1]

---

[1]. ता किं ति पुरो आआसं दुद्दंतरलतडिच्छडाकडारं अवरं विअ झति संवुत्तम्?

षष्ठ अङ्क

(उसके बाद, विमान द्वारा विद्याधर युगल प्रवेश करता है)

विद्याधर– आश्चर्य है, आकस्मिक कलह से प्रचण्ड, क्षत्रियोचित शोभा का प्रदर्शन करने वाले, इन सूर्यवंशी कुमारों के, देवों तथा दैत्यों को भी निश्चय ही आश्चर्यचकित कर देने वाले, पराक्रमपूर्ण कार्य प्रकाशित हो रहे हैं। हे प्रिये! देखो,

झन, झन शब्द करने वाले, कंकण के समान, ध्वनि से युक्त, घुँघरुओं से सुशोभित एवं टंकार करती हुई, विशाल प्रत्यंचा तथा धनुष की कोटियों से किए गए, भयंकर कोलाहल वाले, धनुष को चढ़ाकर, निरन्तर वर्षा करते हुए, इन वीरों का फिर से संसार को त्रस्त करने वाला, भयंकर संग्राम हो रहा है।।1।।

इन दोनों के विचित्र मंगल के लिए, गर्जन करने वाले, मेघ के समान, दुन्दुभि का 'धम धम' शब्द भी बढ़ रहा है।।2।।

इसलिए इन दोनों महावीरों के ऊपर, हम दोनों निरन्तर सघन, मिले हुए और विकसित कमलों से सुन्दर समूह वाली, 'कल्पतरु' की पकी हुई मणि के समान, कलियों के गुच्छे के कारण, मनोहर पुष्प–वृष्टि करते हैं।

विद्याधरी– तब भला सामने की ओर का आकाश, दुःख से देखे जाने योग्य, चंचल बिजली की चमक से पीले वर्ण वाला होकर, मानो शीघ्र ही दूसरे पदार्थ के समान क्यों हो गया है?

विद्याधर वस्तुतः देवयोनि से सम्बन्धित जाति है, इसीलिए कवि द्वारा इनके माध्यम से यहाँ विमान द्वारा युद्ध के दृश्य का वर्णन कराया गया है।

विद्याधरः— तत्किं नु खल्वद्य?

त्वष्टृयन्त्रभ्रमिभ्रान्तमार्तण्डज्योतिरुज्ज्वलः।
पुटभेदो ललाटस्थनीललोहितचक्षुषः।।3।।

(**अन्वय**— त्वष्टृ—यन्त्र—भ्रमि—भ्रान्त—मार्तण्ड—ज्योतिः—उज्ज्वलः ललाटस्थ—नील—लोहित—चक्षुषः पुट—भेदः।।3।।)

(विचिन्त्य) आं ज्ञातम्। जातक्षोभेण चन्द्रकेतुना प्रयुक्तमप्रति–रूपमाग्नेयमस्त्रम्, यस्यायमग्निवच्छरसम्पातः। सम्प्रति हि–

अवदग्धबर्बरितकेतुचामरै–
रपयातमेव हि विमानमण्डलैः।
दहति ध्वजांशुकपटावलीमिमां,
नवकिंशुकद्युतिसविभ्रमः शिखी।।4।।

(**अन्वय**— हि अव—दग्ध—बर्बरित—केतु—चामरैः, विमान—मण्डलैः अप—यातम् एव, नव—किंशुक—द्युति—सविभ्रमः शिखी, इमाम् ध्वज—अंशुक—पट—अवलीम् दहति ।।4।।)

आश्चर्यम्! प्रवृत्त एवायमुच्चण्डवज्रखण्डावस्फोटपटुरटत्स्फुलिंग–गुरुरुत्तालतुमुललेलिहानोज्जवलज्वालासंभारभैरवो भगवानुषर्बुधः प्रचण्ड–श्चास्य सर्वतः संपातः। तत्प्रियामंशुकेनाच्छाद्य सुदूरमपसरामि।

(तथा करोति)

विद्याधरी— दिष्ट्या एतेन विमलमुक्ताशैलशीतलस्निग्धमसृण–मांसलेन, नाथदेहस्पर्शेनानन्दसंदलितघूर्णमानवेदनाया अर्धोदित एवान्त–रितो मे सन्तापः।[1]

विद्याधरः— अयि, किमत्र मया कृतम्? अथवा–

न किंचिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति।
तत्तस्य किमपि द्रव्यं, यो हि यस्य प्रियो जनः।।5।।

(**अन्वय**— हि यः यस्य प्रियः जनः, तत् तस्य किम् अपि द्रव्यम्, किंचित् अपि न कुर्वाणः, सौख्यैः दुःखानि अपोहति।।5।।)

---

1. दिट्ठिआ, एदेण विमलमुत्तासेअसीअलसिणि द्धमसिझमंसलेण, णाहदेहप्पंसेण, आणन्दसंदलिदघुण्णमाणवेअणाए अद्धोदिदो एव्व अन्दरिदो मे संदावो!

विद्याधर— तो क्या आज निश्चय ही,

विश्वकर्मा द्वारा शानयन्त्र पर घुमाए गए, सूर्य के उज्ज्वल प्रकाश का या भगवान् शंकर के मस्तक पर स्थित, तीसरे नेत्र का उन्मीलन हुआ है?।।3।।

(सोचकर) अहो, समझ गया। क्षुब्ध हुए चन्द्रकेतु ने असाधारण 'आग्नेयास्त्र' का प्रयोग किया है, जिसकी अग्नि के समान, यह बाणों की धारा विद्यमान है, क्योंकि इस समय–

कुछ जले हुए, बर्बर शब्द करने वाले, ध्वजाओं तथा चामरों से युक्त, विमानों के समूह भाग ही गए हैं और नए पलाश पुष्प की कान्ति के समान अग्नि, ध्वजाओं की पंक्तियों को जला रहा है।।4।।

आश्चर्य है कि अत्यधिक प्रचण्ड वज्रखण्ड के टूटने के समान, तेजी से शब्द करते हुए, चिनगारियों के कारण ऊँचे और लपलपाती हुई लपटों से भयंकर, अग्निदेव ही चारों ओर फैल गए हैं। इसलिए अपनी प्रियतमा को कपड़े से ढ़ककर दूर चला जाता हूँ।

(वैसा करता है)

विद्याधरी— सौभाग्य से, कुछ ही उत्पन्न होकर मेरा सन्ताप, निर्मल मोती के पर्वत के समान, शीतल, स्निग्ध, कोमल तथा मांसल प्रिय पतिदेव के इस शरीर के स्पर्श से, आनन्द के कारण, फैलती हुए पीड़ा के दूर होने के कारण शान्त हो गया है।

विद्याधर— अरी, इसमें मैंने क्या कर दिया? अथवा

जो जिसका प्रिय जन होता है, वह उसका कुछ अनिर्वचनीय पदार्थ ही होता है, जो उसके लिए कुछ भी न करता हुआ, सुखों के माध्यम से दुःखों को दूर कर देता है।।5।।

मध्यम श्रेणी के पात्रों (विद्याधर एवं विद्याधरी) द्वारा प्रस्तुत वार्तालाप वस्तुतः कवि ने **शुद्ध विष्कम्भक** के रूप में अंक के आरम्भ में प्रयुक्त किया है, जिसमें लव और चन्द्रकेतु के हो रहे भयंकर युद्ध तथा नायक राम को भविष्य में होने वाली पुत्र–प्राप्ति विषयक सूचना को दिया गया है।

विद्याधरी– कथमविरलविलोलघूर्णमानविद्युल्लताविलासमांसलैर्मत्त–मयूरकण्ठश्याम लैरवस्तीर्यते नभोंगणं जलधरैः?[1]

विद्याधर– कुमारलवप्रयुक्तवारुणास्त्रप्रभावः खल्वेषः। कथमविरल–प्रवृत्तवारिधारासंपातं प्रशान्तमेव पावकास्त्रम्?

विद्याधरी– प्रियं मे, प्रियं मे।[2]

विद्याधर– हन्त भोः! सर्वमतिमात्रं दोषाय। यत्प्रलेयवातोत्क्षोभ–गम्भीरगुलुगुलायमानमेघमेदुरितान्धकारनीरन्ध्रनद्धमिव एकबारविश्वग्रसन–विकटविकरालकालमुखकन्दरविवर्तमानमिव युगान्तयोगनिद्रानिरुद्धसंव–द्वारं नारायणोदरनिविष्टमिव भूतं विपद्यते। साधु चन्द्रकेतो! साधु! स्थाने वायव्यमस्त्रमीरितम्। यतः–

विद्याकल्पेन मरुता मेघानां भूयसामपि।
ब्रह्मणीव विवर्तानां क्वापि प्रविलयः कृतः।।6।।

(अन्वय– विद्या–कल्पेन मरुता, भूयसाम् मेघानाम् अपि विवर्तानाम् ब्रह्मणि इव, क्व अपि प्रविलयः कृतः।।6।।)

विद्याधरी–नाथ! कः इदानीमेष ससंभ्रमोत्क्षिप्तकरभ्रम दुत्तरीयांचलो दूरत एव मधुरस्निग्धवचनप्रतिषिद्धयुद्धव्यापार एतयोरन्तरे विमानवरमव–तारयति?[3]

विद्याधर– (दृष्ट्वा) एष शम्बूकवधात्प्रतिनिवृत्तो रघुपतिः।

शान्तं महापुरुषसंगदितं निशम्य,
तद्गौरवात्समुपसंहृतसंप्रहारः।
शान्तो लवः प्रणत एव च चन्द्रकेतुः,
कल्याणमस्तु सुतसंगमनेन राज्ञः।।7।।

(अन्वय– शान्तम् महापुरुष–संगदितम् निशम्य, तत् गौरवात् सम–उपसंहृत–संप्रहारः लवः शान्तः, चन्द्रकेतुः च प्रणतः एव, सुत–संगमनेन राज्ञः कल्याणम् अस्तु।।7।।)

---

1. कहं अविरलविलोलघुम्ममाणविज्जुल्लदाविलाससमसलेहिमत्तमयूर कण्ठसामलेहि ओत्थरीअदि णहंगणं जलहरेहिं?
2. पिअं मे पिअं मे।
3. णाह! को दाणिं एसो ससंभमोक्खित्तकरब्भसदुत्तरी– अंचलो दूरदो एव्व महुरसिणिद्धवअणपडिसिद्ध जुद्धव्वावारो एदाणं अन्दरे विमाणवरं ओदरावेदि?

विद्याधरी– किस प्रकार निरन्तर चंचल एवं घूमती हुई, विद्युल्लताओं के चमकने के कारण, परिपुष्ट तथा मत्त मोरों के कण्ठों के समान, श्यामवर्ण मेघों से आकाश आच्छादित हो रहा है।

विद्याधर– यह कुमार लव द्वारा छोड़े गए 'वारुणास्त्र' का प्रभाव है, जिससे निरन्तर गिरती हुई जल–धाराओं से 'आग्नेयास्त्र' शान्त ही हो गया है।

विद्याधरी– मेरे लिए बहुत प्रिय है, बहुत हितकर है।

विद्याधर– हन्त, अरे! अतिशयता सभी जगह दोष का कारण होती है। यह जो प्रलयकाल की वायु से क्षुब्ध गम्भीर 'गुल गुल' शब्द करने वाले, मेघों से समृद्ध एवं घने अन्धकार से अविरलरूप से बँधा जाता हुआ, एक ही बार में संसार को निगलने के लिए, कराल–काल की मुखरूपी गुफा में छटपटाता हुआ सा, प्रलयकाल की योगनिद्रा से रोके गए, मुख आदि निर्गम मार्गों से युक्त और नारायण के उदर में प्रविष्ट सा होकर, यह सम्पूर्ण संसार नष्ट हो रहा है। वाह, चन्द्रकेतु वाह, तुमने सही समय पर 'वायव्यास्त्र' का प्रयोग किया है, क्योंकि–

जिसप्रकार तत्त्वज्ञान से नामरूपात्मक सभी सांसारिक पदार्थों का ब्रह्म में विलय हो जाता है, उसीप्रकार ज्ञान के समान इस वायव्यास्त्र ने अगणित मेघों का भी कहीं पर विलय कर दिया है।।6।।

विद्याधरी– नाथ! इस समय यह कौन शीघ्रता से हाथ को ऊँचा करके, अपने उत्तरीय वस्त्र को हिलाता हुआ, दूर से ही मधुर एवं स्नेहमय वचनों से युद्ध को रोकता हुआ, इन दोनों के बीच में विमान को उतार रहा है?

विद्याधर– (देखकर) शम्बूक का वध करके, ये रघुकुल के स्वामी राम लौटे हैं।

महापुरुष का शान्तिपूर्ण वचन सुनकर, उनके गौरव से शस्त्रों के प्रयोग को बन्द करके, लव शान्त हो गया है तथा चन्द्रकेतु भी प्रणाम करते हुए नतमस्तक हो गया है। पुत्र के समागम से महाराज का कल्याण हो।।7।।

तदितस्तावदेहि ।

(इति निष्क्रान्तौ)

।। विष्कम्भकः ।।

(ततः प्रविशति रामो लवः प्रणतश्चन्द्रकेतुश्च)

रामः– (पुष्पकादवतरन्)

दिनकरकुलचन्द्र! चन्द्रकेतो!
सरभसमेहि दृढ़ं परिष्वजस्व।
तुहिनशकलशीतलैस्तवांगैः,
शममुपयातु ममापि चित्तदाहः।।8।।

(अन्वय– दिनकर–कुल–चन्द्र! चन्द्रकेतो! सरभसम् एहि दृढ़म् परिष्वजस्व, तुहिन–शकल–शीतलैः तव अंगैः, मम चित्त–दाहः अपि शमम् उपयातु ।।8।।)

(उत्थाय सस्नेहास्रं परिष्वज्य)

अप्यनामयं नूतनदिव्यास्त्रायोधनस्य तव ?

चन्द्रकेतुः– अभिवादये। कुशलमत्यद्भुतप्रियवयस्यलाभाभ्युदयेन। तद्विज्ञापयामि मामिवाविशेषेण स्निग्धेन चक्षुषा पश्यत्वमु वीरमनरालसाहसं तातः।

रामः– (लवं निरूप्य) दिष्ट्या अतिगम्भीरमधुरकल्याणकृतिरयं वयस्यो वत्सस्य।

त्रातुं लोकानिव परिणतः कायवानस्त्रवेदः,
क्षात्रो धर्मः श्रित इव तनुं ब्रह्मकोशस्य गुप्त्यै।
सामर्थ्यानामिव समुदयः संचयो वा गुणाना–
माविर्भूय स्थित इव जगत्पुण्यनिर्माणराशिः।।9।।

(अन्वय– लोकान् त्रातुम् कायवान् परिणतः, अस्त्र–वेदः इव, ब्रह्म–कोशस्य गुप्त्यै ब्रह्मकोशस्य गुप्त्यै, तनुम् श्रितः क्षात्रः धर्मः इव, सामर्थ्यानाम् समुदयः इव, गुणानाम् संचयः, वा जगत्–पुण्य–निर्माण–राशिः आविर्भूय स्थितः इव ।।9।।)

लवः– (स्वगतम्) अहो! पुण्यानुभावदर्शनोऽयं महापुरुषः।

आश्वास इव भक्तीनामेकमायतनं महत्।
प्रकृष्टस्येव धर्मस्य प्रसादो मूर्तिसुन्दरः।।10।।

तो जरा इधर आओ।

(यह कहकर दोनों निकल जाते हैं)

।। विष्कम्भक।।

(उसके बाद, राम, लव और प्रणाम करता हुआ चन्द्रकेतु प्रवेश करता है)

राम– (पुष्पक विमान से उतरते हुए)

सूर्यवंश के चन्द्र! हे चन्द्रकेतु! शीघ्र आओ और मेरा प्रगाढ़ आलिंगन करो, जिससे तुम्हारे हिम–खण्ड के समान, शीतल अंगों से मेरे मन का भी ताप शान्त हो जाए।।8।।

(उठकर, स्नेह के साथ अश्रुपूर्वक आलिंगन करके) दिव्य अस्त्रों से नया–नया युद्ध करने वाले, तुम्हारा स्वास्थ्य तो ठीक है?

चन्द्रकेतु– मैं प्रणाम करता हूँ। अत्यधिक अद्भुत प्रियमित्र के प्राप्त होने रूप अभ्युदय से सभी कुछ कुशल है। इसलिए मैं आपसे प्रार्थना करता हूँ कि आप मेरे ही समान, इस सरल, साहसी और वीर को विशेष स्नेहपूर्ण दृष्टि से ही देखें।

राम– (लव को देखकर) सौभाग्य से लव का मित्र, अत्यधिक गम्भीर, सुन्दर तथा शुभ लक्षणों से युक्त आकृति से सम्पन्न है,

सभी लोकों की रक्षा के लिए क्या धनुर्वेद ही अवतीर्ण हो गया है, या फिर वेदरूपी कोष की रक्षा के लिए क्षत्रिय धर्म ने ही शरीर धारण कर लिया है? अथवा शक्तियों का समूह, गुणों का संग्रह या संसार का पुण्यरूपी पुँज ही, मानो इसके रूप में प्रकट हो गया है।।9।।

लव– (मन में) अहो! ये महापुरुष पुण्य प्रभाव एवं दर्शनों वाले हैं।

श्रद्धालुओं को सुख प्रदान करने वाले स्थान के समान, ये अद्वितीय और महान् आधार एवं लोकोत्तर धर्म की मूर्तिमयी प्रसन्नता के समान हैं।।10।।

(अन्वय– भक्तीनाम् आश्वासः इव, एकम् महत् आयतनम्, प्रकृष्टस्य धर्मस्य मूर्ति–सुन्दरः प्रसादः इव ।।10।।)

आश्चर्यम्!

विरोधो विश्रान्तः, प्रसरति रसो निर्वृत्तिघन–
स्तदौद्धत्यं क्वापि व्रजति, विनयः प्रह्वयति माम्।
झटित्यस्मिन्दृष्टे किमिति परवानस्मि? यदि वा,
महार्घस्तीर्थानामिव हि महतां कोऽप्यतिशयः।।11।।

(अन्वय– विरोधः विश्रान्तः, निर्वृत्तिः घनः रसः प्रसरति, तत् औद्धत्यम् क्व अपि व्रजति, विनयः माम् प्रह्वयति, अस्मिन् दृष्टे किम् इति झटिति परवान् अस्मि, यदि वा हि महा–अर्घः तीर्थानाम् इव महताम् कः अपि अतिशयः (भवति)।।11।।)

रामः– तत्किमयमेकपद एव मे दुःखविश्रामं ददात्युपस्नेहयति च कुतोऽपि निमित्तादन्तरात्मानम्? अथवा 'स्नेहश्च निमित्तसव्यपेक्ष' इति विप्रतिषिद्धमेतत्।

व्यतिषजति पदार्थानान्तरः कोऽपि हेतु–
र्न खलु बहिरुपाधीन्प्रीतयः संश्रयन्ते।
विकसति हि पतंगस्योदये पुण्डरीकं
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः।।12।।

(अन्वय– कः अपि आन्तरः हेतुः, पदार्थान् व्यतिषजति, खलु प्रीतयः बहिः उपाधीन् न संश्रयन्ते, हि पतंगस्य उदये पुण्डरीकम् विकसति, हिमरश्मौ उद्गते चन्द्रकान्तः द्रवति च ।।12।।)

लवः– चन्द्रकेतो! क एते?

चन्द्रकेतुः– प्रियवयस्य! ननु तातपादाः।

लवः– ममापि धर्मतस्तथैव, यतः प्रियवयस्येति भवतोक्तम्। किन्तु चत्वारः किल भवन्त्येवं व्यपदेशभागिनस्तत्रभवन्तो रामायणकथापुरुषाः। तद्विशेषं ब्रू हि।

चन्द्रकेतुः– ज्येष्ठतात इत्यवेहि।

लवः– (सोल्लासम्) कथं रघुनाथ एव? दिष्ट्या सुप्रभातमद्य, यदयं देवो दृष्टः। (सविनयं निर्वर्ण्य) तात! प्राचेतसान्तेवासी लवोऽभिवादयते।

आश्चर्य है कि

इनके दर्शन से विरोध शान्त हो गया है, प्रगाढ़ प्रेम अत्यधिक आनन्दपूर्वक फैल रहा है। वह उद्दण्डता कहीं चली गयी है। विनय मुझे विनम्र बना रहा है। इन्हें देखने मात्र से मैं शीघ्र ही पराधीन सा क्यों हो रहा हूँ अथवा निश्चय ही, तीर्थों के समान, महापुरुषों का भी कोई बहुमूल्य उत्कर्ष होता है।।11।।

राम– तो यह बालक मेरे दुःख को सहसा ही क्यों समाप्त कर रहा है? और किसी अज्ञात आन्तरिक कारण से मेरे अन्तःकरण को स्नेह से सींच रहा है अथवा प्रेम किसी कारण की अपेक्षा रखता है, यह कथन ठीक नहीं है।

कोई आन्तरिक कारण पदार्थों को आपस में मिला देता है, प्रेम कभी भी बाह्य कारणों का आश्रय नहीं लेता है, क्योंकि सूर्य के उदित होने पर, श्वेतकमल खिल ही जाता है तथा चन्द्रमा के उदय होने के बाद चन्द्रकान्त मणि पिघलती ही है।।12।।

लव– चन्द्रकेतु! ये कौन हैं?

चन्द्रकेतु– प्रियमित्र! ये पूजनीय तात (पिताश्री) हैं।

लव– तब तो मेरे भी ये धर्म से वैसे ही लगते हैं, क्योंकि तुमने मुझे प्रियमित्र कहा है, किन्तु आपके 'तात' शब्द से व्यवहार करने योग्य, रामायण के कथापुरुष, चार समादरणीय हैं। इसलिए तुम मुझे विशेषरूप से बताओ (उनमें ये कौन हैं?)।

चन्द्रकेतु– तब तो आप इन्हें ज्येष्ठ पिताश्री इस रूप में समझिए।

लव– (प्रसन्नतापूर्वक) क्या ये रघुनाथ ही हैं? सौभाग्य से आज सुप्रभात है, जो इन महाराज का दर्शन हो गया। (विनम्रतापूर्वक देख कर) पिताश्री! महर्षि वाल्मीकि का शिष्य लव आपको अभिवादन करता है।

रामः— आयुष्मन्! एह्येहि। (इति सस्नेहमांलिग्य) अयि वत्स! कृतमत्यन्तविनयेन। अंगेन मामपरिश्लथं परिरम्भस्व।

परिणतकठोरपुष्करगर्भच्छदपीनमसृणसुकुमारः।
नन्दयति चन्द्रचन्दननिष्यन्दजडस्तव स्पर्शः।।13।।

(**अन्वय**—परिणत—कठोर—पुष्कर—गर्भ—च्छद—पीन—मसृण—सुकुमारः चन्द्र—चन्दन—निष्यन्द—जडः तव स्पर्शः नन्दयति ।।13।।)

लवः— (स्वगतम्) ईदृशो मां प्रत्यमीषामकारणस्नेहः। मया पुनरेभ्य एवाभिद्रोग्धुमझेनायुधपरिग्रहः कृतः। (प्रकाशम्) मृष्यन्तां त्विदानीं लवस्य बालिशतां तातपादाः।

रामः— किमपराद्धं वत्सेन?

चन्द्रकेतुः— अश्वानुयात्रिकेभ्यस्तातप्रतापाविष्करणमुपश्रुत्य वीरा—यितमनेन।

रामः— नन्वयमलंकारः क्षत्रियस्य।

न तेजस्तेजस्वीं प्रसृतमपरेषां विषहते,
स तस्य स्वो भावः प्रकृतिनियतत्वादकृतकः।
मयूखैरश्रान्तं तपति यदि देवो दिनकरः,
किमाग्नेयो ग्रावा निकृत इव तेजांसि वमति।।14।।

(**अन्वय**— तेजस्वीम् प्रसृतम् अपरेषाम् तेजः न विषहते, तस्य सः प्रकृति—नियतत्वात् अकृतकः स्वः—भावः, यदि दिनकरः मयूखैः अश्रान्तम् तपति, देवः आग्नेयः ग्रावाः निकृतः इव तेजांसि किम् वमति।।14।।)

चन्द्रकेतुः— अमर्षोऽप्यस्यैव शोभते महावीरस्य। पश्यन्तु हि तात—पादाः प्रियवयस्यनियुक्तेन जृम्भकास्त्रैण विक्रम्य स्तम्भितानि सर्व—सैन्यानि।

रामः— (सविस्मयखेदं निर्वर्ण्य। स्वगतम्) अहो! वत्सस्य ईदृशः प्रभावः? (प्रकाशम्) वत्स! संह्रियतामस्त्रम्। त्वमपि चन्द्रकेतो! निर्व्यापारतया विलक्षाणि सान्त्वय बलानि।

चन्द्रकेतुः— यथा निर्दिष्टम्। (इति निष्क्रान्तः)

(लवः प्रणिधानं नाटयति)

लवः— तात! प्रशान्तमस्त्रम्।

राम— आयुष्मन्! आओ, आओ। (ऐसा कहकर स्नेह के साथ आलिंगन करके)

पूर्णरूप से खिले हुए कमल के भीतर की पंखुड़ियों के समान, परिपुष्ट, स्निग्ध तथा कोमल एवं चन्द्रमा और चन्दन के रस के जैसा तुम्हारा शीतल स्पर्श मुझे आनन्दित कर रहा है।।13।।

लव— (मन में) इनका मुझ पर स्वयं ही ऐसा अहेतुक स्नेह है, किन्तु मुझ मन्दमति ने इनसे ही द्रोह करने के लिए शस्त्र को ग्रहण किया था। (प्रकट में) समादरणीय तात! अब आप लव की मूर्खता को क्षमा कर दीजिए।

राम— वत्स ने क्या अपराध किया है?

चन्द्रकेतु— अश्व का अनुगमन करने वाले रक्षकों से, आपके प्रताप की अधिकता को सुनकर, इन्होंने वीर पुरुष के समान आचरण किया है।

राम— निश्चय ही, यह तो क्षत्रिय का आभूषण है,

तेजस्वी व्यक्ति फैले हुए, दूसरे के तेज को सहन नहीं करता है, उसका वह कार्य स्वभाव से निश्चित होने के कारण, स्वाभाविक अपना ही धर्म है। भगवान् भास्कर अपनी तीक्ष्ण किरणों द्वारा अत्यधिक तपते हैं तथा सूर्यकान्त मणि तिरस्कृत के समान, अग्नि क्यों उगलता है?।।14।।

चन्द्रकेतु— यह असहनशीलता ही इस महावीर को भी सुशोभित कर रही है। तात! देखिए, प्रिय मित्र द्वारा छोड़े गए 'जृम्भकास्त्र' ने पराक्रम प्रदर्शित करके, हमारी सम्पूर्ण सेना को निश्चेष्ट कर दिया है।

राम— (आश्चर्य एवं खेदपूर्वक देखकर, मन में) अहो, वत्स का ऐसा प्रभाव है? (प्रकट में) वत्स! अस्त्र लौटा लो। हे चन्द्रकेतु! तुम भी स्तम्भित होने के कारण लज्जित सेनाओं को सान्त्वना प्रदान करो।

चन्द्रकेतु— जैसी आपकी आज्ञा।

(इसप्रकार कहकर निकल जाता है)

(लव ध्यान का अभिनय करता है)

लव— तात! अस्त्र शान्त हो गया है।

रामः— सरहस्यप्रयोगसंहारजृम्भकास्त्राणि दिष्ट्या वत्सस्यापि संपद्यन्ते।

ब्रह्मादयो ब्रह्महिताय तप्त्वा,
परःसहस्रं शरदस्तपांसि।
एतान्यदर्शन्गुरवः पुराणाः,
स्वान्येव तेजांसि तपोमयानि।।15।।

(**अन्वय—** ब्रह्म—आदयः पुराणाः गुरवः, ब्रह्म—हिताय परः—सहस्रम् शरदः तपांसि तप्त्वा, स्वानि एव एतानि तपोमयानि तेजांसि अदर्शन् ।।15।।)

अथैतामस्त्रमन्त्रोपनिषदं भगवानकृशाश्वः परः सहस्राधिकसंवत्सर—परचर्यानिरतायान्तेवासिने कौशिकाय प्रोवाच। स भगवान् मह्यमिति गुरुपूर्वानुक्रमः। कुमारस्य कुतः सम्प्रदायः? इति पृच्छामि।

लवः— स्वतः प्रकाशान्यावयोरस्त्राणि।

रामः— (विचिन्त्य) किं न सम्भाव्यते? प्रकृष्टपुण्योपादानकः कोऽपि महिमा स्यात्? द्विवचनं तु कथम्?

लवः— भ्रातरावावां यमौ।

रामः— स तर्हि द्वितीयः कः?

(नेपथ्ये)

दण्डायन!

आयुष्मतः किल लवस्य नरेन्द्रसैन्यै—
रायोधनं ननु किमात्थ? सखे! तथेति।
अद्यास्तमेतु भुवनेषु च राजशब्दः,
क्षत्रस्य शस्त्रशिखिनः शममद्य यान्तु।।16।।

(**अन्वय—** सखे! आयुष्मतः लवस्य नरेन्द्र—सैन्यैः आयोधनम् ननु किल तथा इति आत्थ किम्? अद्य भुवनेषु च राज—शब्दः अस्तम् एतु, अद्य क्षत्रस्य शस्त्र—शिखिनः शमम् यान्तु।।16।।)

रामः—

अथ कोऽयमिन्द्रमणिमेचकच्छवि—
र्ध्वनिनैव बद्धपुलकं करोति माम्।

राम— सौभाग्य से वत्स को भी प्रयोग एवं संहार के गुप्त मन्त्रों के साथ, जृम्भकास्त्र प्राप्त हैं।

ब्रह्मा आदि पुराण पुरुषों ने वेद अथवा ब्राह्मणों के हित के लिए, हजारों वर्षों से भी अधिक तपस्या करके, अपने तपोमय तेजों को ही इन अस्त्रों के रूप में देखा था।।15।।

इस अस्त्रमयी गोपनीय विद्या को भगवान् कृशाश्व ने हजारों वर्षों से भी अधिक वर्षों तक सेवा में रहने वाले, शिष्य विश्वामित्र को बताया था तथा उसी भगवान् विश्वामित्र ने मुझे इसका उपदेश दिया था। इसीप्रकार आचार्यों का इसके विषय में प्राचीन क्रम (परम्परा) है, तो फिर कुमार को इसका उपदेश कहाँ से प्राप्त हुआ, यह पूछ रहा हूँ।

लव— हम दोनों में इन अस्त्रों का स्वयं ही प्रादुर्भाव हुआ है।

राम— (सोचकर) क्यों नहीं हो सकता है? क्योंकि उच्चकोटि के पुण्य से उत्पन्न यह कोई अद्भुत महिमा ही होगी, किन्तु इसने द्विवचन का प्रयोग क्यों किया?

लव— हम दोनों जुड़वाँ भाई हैं।

राम— तो वह दूसरा कहाँ है?

(नेपथ्य में)

हे दण्डायन!

हे मित्र! क्या आयुष्मान् लव का राजा की सेनाओं से युद्ध हो रहा है? क्या कहते हो? निश्चय ही, वैसा ही है, तब तो आज लोकों से 'राजा' शब्द विनाश को प्राप्त होवे तथा आज ही क्षत्रिय की शस्त्ररूपी अग्नि शान्त हो जावे।।16।।

राम—

इसके अतिरिक्त अब इन्द्रनील मणि की छवि के समान, श्यामल कान्ति से युक्त, यह कौन शब्द से ही मुझे नए तथा श्यामवर्ण के मेघ के गम्भीर गर्जन की समय पर विकसित होने वाले, कदम्ब की कलिकाओं की भाँति, रोमांचित कर रहा है?।। 17।।

नवनीलनीरधरधीरगर्जितक्षण–
बद्धकुड्मलकदम्बडम्बरम्।।17।।

(**अन्वय–** अथ इन्द्र–मणि–मेचक–छविः कः अयम् ध्वनिना एव माम् नव– नील – नीरधर–धीर–गर्जित–क्षण–बद्ध–कुड्मल–कदम्ब–डम्बरम् बद्ध–पुलकम् करोति? ।।17।)

लवः–अयमसौ मम ज्यायानार्यः कुशो नाम भरताश्रमात्प्रतिनिवृत्तः।

रामः–(सकौतुकम्) तर्हि वत्स! इत एवैतमाह्वयायुष्मन्तम्।

लवः–यदाज्ञापयति। (इति निष्क्रान्तः)

(ततः प्रविशति कुशः)

कुशः– (सक्रोधं कृतधैर्यं धनुरास्फाल्य)

दत्तेन्द्राभयदक्षिणैर्भगवतो वैवस्वतादामनो–
दृप्तानां दमनाय दीपितनिजक्षत्रप्रतापाग्निभिः।
आदित्यैर्यदि विग्रहो नृपतिभिर्धन्यं ममैतत्ततो,
दीप्तास्त्रस्फुरदुग्रदीधितिशिखानीराजितज्यं धनुः।।18।।

(**अन्वय–** भगवतः वैवस्वतात् मनोः आ दत्त–इन्द्र–अभय–दक्षिणैः, दृप्तानाम् दमनाय,दीपित–निज–क्षत्र–प्रताप–अग्निभिः आदित्यैः नृपतिभिः यदि विग्रहः, ततः दीप्त–अस्त्र–स्फुरत् उग्र–दीधिति–शिखा–नीराजित–ज्यम् एतत् मम धनुः धन्यम् ।।18।।)

(विकट परिक्रामति)

रामः– कोप्यस्मिन्क्षत्रियपोतके पौरुषातिरेकः। तथाहि–

दृष्टिस्तृणीकृतजगत्त्रयसत्त्वसारा,
धीरोद्धता नमयतीव गतिर्धरित्रीम्।
कौमारकेऽपिगिरिवद्गुरुतां दधानो,
वीरो रसः किमयमेत्युत दर्प एव।।19।।

(**अन्वय–** दृष्टिः तृणीकृत–जगत्–त्रय–सत्त्व–साराः धीरोद्धताः गतिः धरित्रीम् नमयति इव, कौमारके अपि गिरिवत् गुरुताम् दधानः, अयम् किम् वीरः रसः? उत दर्पः एव इति।।19।।)

लव– (उपसृत्य) जयत्वार्य।

लव– ये मेरे बड़े भाई सम्मानीय 'कुश' भरत मुनि के आश्रम से लौटे हैं।

राम– (कौतूहलपूर्वक) तब तो वत्स! इस आयुष्मान् को भी यहीं पर बुलाओ।

लव– आपकी जैसी आज्ञा।

(ऐसा कहकर निकल जाता है)

(उसके बाद कुश प्रवेश करता है)

कुश– (क्रोध एवं धैर्यपूर्वक धनुष की टंकार करके)

भगवान् वैवस्वत मनु से लेकर, इन्द्र को भी अभय दक्षिणा प्रदान करने वाले, अहंकारयुक्त लोगों के दमन के लिए, अपने क्षत्रिय तेज रूपी अग्नि को प्रज्वलित करने वाले, सूर्यवंशीय राजाओं के साथ, यदि युद्ध हो जाए, तो प्रज्वलित अस्त्रों की देदीप्यमान एवं भयंकर किरणों वाली, शिखा द्वारा आरती की गयी, ज्या से युक्त मेरा यह धनुष धन्य हो जाएगा।।18।।

(विकटरूप से घूमता है)

राम– इस क्षत्रिय बालक में किसी अनिर्वचनीय तेज का अतिरेक है, क्योंकि–

इसकी दृष्टि तीनों लोकों के बल के उत्कर्ष को तिनके के समान, तुच्छ कर देने वाली है तथा धीर एवं उद्धत गति पृथ्वी को झुका सा रही है। बाल्यावस्था में भी पर्वत के समान, गुरुता को धारण करता हुआ, यह वीर क्या स्वयं वीररस है, या फिर मूर्तिमान् अभिमान ही इधर आ रहा है।।19।।

लव– (उपसृत्य) आर्य की जय हो।

महाकवि ने प्रस्तुत षष्ठ अंक में लव, कुश का प्रभावशाली चरित्र चित्रण करके, राम की मर्मान्तक पीड़ा को अभिव्यक्ति प्रदान करके हुए, उनके चरित्र के सीता–त्याग विषयक कलंक को भी प्रक्षालित करने का प्रशंसनीय प्रयास किया है। तृतीय अंक के समान ही यहाँ भी उनके भावों को अभिव्यक्ति मिली है।

कुशः— नन्वायुष्मन! किमियं वार्ता युद्धं युद्धमिति।

लवः— यत्किंचिदेतत्। आर्यस्तु दृप्तं भावमुत्सृज्य वर्तताम्।

कुशः— किमर्थम्?

लवः— यदत्र देवो रघुनन्दनः स्थितः। स रामायणकथानायको ब्रह्मकोशस्य गोप्ता।

कुशः— आशंसनीयपुण्यदर्शनः स महात्मा। किन्तु स कथमस्माभि-रुपगन्तव्यः? इति न संप्रधारयामि।

लवः— यथैव गुरुस्तथोपसदनेन।

कुशः— कथं हि नामैतत्?

लवः— अत्युदात्तः सुजनश्चन्द्रकेतुरौर्मिलेयः प्रियवयस्येति सख्येन मामुपतिष्ठते। तेन संबन्धेन धर्मतस्तात एवायं राजर्षिः।

कुशः— संप्रत्यवचनीयो राजन्येऽपि प्रश्रयः।

(उभौ परिक्रामतः)

लवः— पश्यत्वेनमार्यो महापुरुषमाकारनुभावगाम्भीर्यसंभाव्यमान-विविधलोकोत्तरसुचरितातिशयम्।

कुशः— (निर्वर्ण्य)

अहो प्रासादिकं रूपमनुभावश्च पावनः।
स्थाने रामायणकविर्देवीं वाचमवीवृधत्!।।20।।

(**अन्वय**— अहो प्रासादिकम् रूपम्, पावनः अनुभावः च, रामायण-कविः देवीम् वाचम् स्थाने अवीवृधत्!।।20।।)

(उपसृत्य) तात! प्राचेतसान्तेवासी कुशोऽभिवादयते।

रामः— एह्येह्यायुष्मन्!

अमृताध्मातजीमूतस्निग्धसंहननस्य ते।
परिष्वंगाय वात्सल्यादयमुत्कण्ठते जनः।।21।।

(**अन्वय**— अयम् जनः वात्सल्यात् अमृत-अध्मात-जीमूत-स्निग्ध-संहननस्य ते परिष्वंगाय उत्कण्ठते ।।21।।)

कुश— आयुष्मन्! यह युद्ध, युद्ध, भला क्या है?

लव— यह जो कुछ भी है। आर्य तो उग्रभाव को त्याग करके, नम्रता से व्यवहार करें।

कुश— किसलिए?

लव— क्योंकि यहाँ पर रघुनन्दन राम विद्यमान हैं। वे रामायण कथा के नायक और वेद-कोष की रक्षा करने वाले हैं।

कुश— निश्चय ही, वे महात्मा अभिलषित पवित्र दर्शन वाले हैं, किन्तु उनके पास मुझे किस प्रकार जाना चाहिए, मैं यह निश्चय कर लेता हूँ।

लव— जिसप्रकार गुरु के पास जाया जाता है, उसीप्रकार आपको उनके पास जाना चाहिए।

कुश— भला यह कैसे सम्भव है?

लव— अत्यधिक उदात्त विचारों से युक्त, सज्जन, उर्मिला के पुत्र चन्द्रकेतु 'प्रियमित्र' ऐसा सम्बोधन करके, मेरे साथ मित्रता का व्यवहार कर रहे हैं, इसलिए इस सम्बन्ध से यह राजर्षि धर्म से हमारे पिता ही हैं।

कुश— इस समय क्षत्रिय में हमारा नम्र व्यवहार भी निर्दोष है।

(दोनों घूमते हैं)

लव— आकार, प्रभाव और गम्भीरता द्वारा, जिनके चरित्रों का अनेक प्रकार के लोकोत्तर चरितों से अनुमान किया जा सकता है, इस प्रकार के इन महापुरुष का आर्य दर्शन करें।

कुश— (ध्यानपूर्वक देखकर)

आश्चर्य है कि इनका रूप प्रसादगुण युक्त तथा प्रभाव पवित्र है। रामायण के कवि ने अपनी वाणी को उचित स्थान पर ही परिवर्धित किया है।।20।।

(पास जाकर) तात! वाल्मीकि ऋषि का शिष्य कुश आपको अभिवादन कर रहा है।

राम— आयुष्मान् आओ, आओ।

यह व्यक्ति वात्सल्यभाव से अमृत से भरे हुए, मेघ के समान, स्निग्ध शरीर वाले, तुम्हारे आलिंगन के लिए उत्कण्ठित हो रहा है।।21।।

(परिष्वज्य स्वगतम्) तत्किमित्ययं च दारकः–

अंगादंगात्सृत इव निजः स्नेहजो देहसारः,
प्रादुर्भूय स्थित इव बहिश्चेतनाधातुरेकः।
सान्द्रानन्दक्षुभितहृदयप्रस्रवेणावसिक्तो,
गाढाऽऽश्लेषः स हि मम हिमच्योतमाशंसतीव।।22।।

(**अन्वय–** अंगात्–अंगात् सृतः स्नेहजः निजः देह–सारः इव, एकः चेतना–धातुः बहिः प्रादुर्भूय स्थितः इव, सान्द्र–आनन्द–क्षुभित– हृदय–प्रस्रवेण अवसिक्तः सः गाढ़–आश्लेषः, हि मम हिमच्योतम् आशंसति इव।।22।।)

लवः– ललाटन्तपस्तपति घर्माशुः। तदत्र सालवृक्षच्छायायां मूहूर्त–मासनपरिग्रहं करोतु तातः।

रामः– यदभिरुचितं वत्सस्य।

(सर्वे परिक्रम्य यथोचितमुपविशन्ति)

रामः– (स्वगतम्)

अहो प्रश्रययोगेऽपि, गतिस्थित्यासनादयः।
साम्राज्यशंसिनो भावाः कुशस्य च लवस्य च।।23।।

(**अन्वय–** अहो, प्रश्रय–योगे अपि, कुशस्य च लवस्य च, गति–स्थिति–आसन–आदयः भावाः साम्राज्य–शंसिनः (सन्ति)।।23।।)

वपुरवियुतसिद्धा एव लक्ष्मीविलासाः,
प्रतिकलकमनीयां कान्तिमुद्भेदयन्ति।
अमलिनमिव चन्द्रं रश्मयः स्वे यथा वा,
विकसितमरविन्दं बिन्दवो माकरन्दाः।।24।।

(**अन्वय–** यथा वा स्वे रश्मयः, अमलिनम् चन्द्रम्, माकरन्दाः बिन्दवः विकसितम् अरविन्दम् उद्भेदयन्ति इव, अवियुत–सिद्धाः एव लक्ष्मी–विलासाः वपुः प्रति–कल–कमनीयाम् कान्तिम् (उद्भेदयन्ति)।।24।।)

भूयिष्ठं च रघुकुलकौमारमनयोः पश्यामि।

(आलिंगन करके मन में) तब यह बालक किसलिए?

प्रत्येक अंग से निकला हुआ, स्नेह से उत्पन्न होने वाला, मेरे शरीर के सार भाग के समान, एकमात्र चैतन्य तत्त्व ही मानो बाहरी प्रदेश में उत्पन्न होकर, स्थित हो गया है। अत्यधिक आनन्द से क्षुभित हृदय के द्रव द्वारा सींचा हुआ, वह प्रगाढ़ आलिंगन मुझे निश्चय ही मानो बर्फ से सींच रहा है।।22।।

लव– सूर्य ललाट को तपाने वाला होकर तप रहा है, इसलिए तात यहाँ पर शाल के वृक्ष की छाया में थोड़ी देर के लिए आसन ग्रहण करें।

राम– जो वत्स को अच्छा लगे।

(सभी घूमकर यथोचित रूप में बैठ जाते हैं)

राम– (मन में)

आश्चर्य है कि विनम्रता का सम्बन्ध होने पर भी, कुश और लव की गति, स्थिति और बैठना आदि सभी क्रियाएँ साम्राज्य की सूचना देने वाली हैं।।23।।

अथवा जिसप्रकार अपनी ही रश्मियाँ निर्मल चन्द्रमा को प्रकाशित करती हैं, जिसप्रकार पुष्प के रस की बूँदें खिले हुए कमल को सुशोभित करती हैं, उसीप्रकार स्वभाव से ही सिद्ध शोभा के विलास, प्रत्येक क्षण कमनीय, इस शरीर की मनोहर कान्ति को उद्भाषित कर रहे हैं।।24।।

इन दोनों में मैं रघुवंश में उत्पन्न होने वाले, कुमारों का बहुत कुछ साम्य देख रहा हूँ, (क्योंकि)

श्रीराम का कुश के प्रति वात्सल्यभाव अभिव्यक्त हुआ है। साथ ही, पिता के रूप में उनके चरित्र की उज्ज्वलता भी दर्शनीय है।

लव द्वारा राम के लिए शालवृक्ष की छाया में बैठने का निवेदन, उसके आतिथ्य सत्कार आदि गुण को उद्घाटित करने वाला है तथा उसके प्रत्युत्पन्न–मतित्व को भी प्रतिपादित कर रहा है।

कठोरपारावतकण्ठमेचकं,
वपुर्वृषस्कन्धसुबन्धुरंसयोः।
प्रसन्नसिंहस्तिमितं च वीक्षितं
ध्वनिश्च मांगल्यमृदंगमांसलः।।25।।

(**अन्वय–** वृष–स्कन्ध–सुबन्धुर्–अंसयोः वपुः, कठोर–पारावत–कण्ठ–मेचकम्, वीक्षितम् प्रसन्न–सिंह–स्तिमितम् च, ध्वनिः च मांगल्य–मृदंग–मांसलः।।25।।)

(निपुणं निरूपयन्) अये, न केवलमस्मद्वंशसंवादिन्याकृतिः?

अपि जनकसुतायास्तच्च तच्चानुरूपं,
स्फुटमिह शिशुयुग्मे नैपुणोन्नेयमस्ति।
ननु पुनरिव तन्मे गोचरीभूतमक्ष्णो–
रभिनवशतपत्त्रश्रीमदास्यं प्रियायाः।।26।।

(**अन्वय–** अपि इह शिशु–युग्मे नैपुण–उन्नेयम्, तत् च तत् च जनक–सुतायाः अनुरूपम् स्फुटम् अस्ति, ननु अभिनव–शतत्पत्र–श्रीमत्–तत् प्रियायाः आस्यम्, पुनः मे अक्ष्णोः गोचरीभूतम् इव।।26।।)

मुक्ताच्छदन्तच्छविसुन्दरीयं, सैवोष्ठमुद्रा, स च कर्णपाशः।
नेत्रे पुनर्यद्यपि रक्तनीले तथापि सौभाग्यगुणः सः एव।।27।।

(**अन्वय–** मुक्ता–अच्छ–दन्त–छवि–सुन्दरी इयम्, ओष्ठ–मुद्रा सा एव, पुनः च कर्ण–पाशः सः, यद्यपि नेत्रे रक्त–नीले तथापि सौभाग्य–गुणः सः एव ।।27।।)

(विचिन्त्य) तदेतत्प्राचेतसाध्युषितमरण्यं, यत्र किल देवी परित्यक्ता। इयं चानयोराकृतिर्वयाऽनुभावश्च। यत्स्वतः प्रकाशान्यस्त्रा– णीति च, तत्रापि स्मरामि खलु तदपि चित्रदर्शनप्रासंगिकमस्त्राभ्यनुज्ञानं प्रबुद्धं स्यात्। न ह्यसंप्रदायिकान्यस्त्राणि पूर्वेषामपि शुश्रुमः। अयं विस्मयसंप्लव–मानसुखदुःखातिशयो हृदयस्य मे विप्रलम्भः। यमाविति च भूयिष्ठमा–त्मसंवादः। जीवद्वयापत्यचिह्नो हि देव्या गर्भिणीभाव आसीत्।

(सास्रम्)

सांड़ के कन्धों के समान, सुन्दर कन्धों वाले, इन दोनों कुमारों का शरीर, युवा कबूतर के कण्ठ जैसा श्यामवर्ण है। दृष्टि, प्रसन्न सिंह के समान, निश्चल है तथा शब्द मंगलसूचक मृदंग के समान गम्भीर है।।25।।

(ध्यानपूर्वक देखते हुए) अरे! केवल आकृति ही हमारे कुल के साथ समानता नहीं रखती है, अपितु

इन दोनों बालकों में, निपुणता से अनुमान करने योग्य, सीता की वे–वे समानताएँ पूर्णरूप से स्पष्ट हो रही हैं तथा निश्चय ही, नूतन कमल के समान शोभायुक्त, प्रियतमा सीता का वह मुख, फिर से मेरे नेत्रों के सामने प्रकट सा हो गया है।।26।।

श्वेत एवं स्वच्छ दाँतों की कान्ति से सुन्दर, यह ओष्ठों की मुद्रा, भी वही है और कर्णपाश भी वही है। यद्यपि नेत्र लाल और नीले हैं, फिर भी सौभाग्यरूपी गुण वही है।।27।।

(सोचकर) वाल्मीकि ऋषि द्वारा निवास किया गया, यह वही वन है, जहाँ पर सीता का परित्याग किया गया था और इन दोनों की यह जो आकृति, आयु तथा प्रभाव है एवं जो इन्हें जृम्भकास्त्र स्वतः ही प्रकाशित हुए हैं, उस विषय में भी मैं स्मरण कर रहा हूँ कि निश्चय ही, चित्रदर्शन के प्रसंग में शस्त्र प्रदान की वह अनुमति ही प्रदर्शित हो गयी है। पूर्व पुरुषों में भी गुरु के उपदेश के अभाव में ये जृम्भकास्त्र प्रकट नहीं हुए, ऐसा हमने सुना है। साथ ही, मेरे हृदय का यह वियोग सुख और दुःख के अतिरेक के आश्चर्य में डुबा देने वाला हो गया है तथा ये दोनों जुड़वाँ हैं, इस सम्बन्ध में भी बहुत कुछ संगति बैठ रही है, क्योंकि सीता का गर्भिणीभाव भी दो सन्तानों के चिह्नों से युक्त ही था।

(अश्रुपूर्वक)

परां कोटिं स्नेहे परिचयविकासादधिगते,
रहो विस्रब्धाया अपि सहजलज्जाजड़दृशः।
मयैवादौ ज्ञातः करतलपरामर्शकलया,
द्विधा गर्भग्रन्थिस्तदनु दिवसैः कैरपि तया।।28।।

(**अन्वय–** परिचय–विकासात् स्नेहे पराम् कोटिम् अधिगते, रहः विस्रब्धायाः अपि सहज–लज्जा–जड–दृशः, आदौ करतल–परामर्श–कलया मया एव द्विधा गर्भ–ग्रन्थिः ज्ञातः, तत् अनु कैः दिवसैः तया अपि (ज्ञातः)।।28।।)

(रुदित्वा) तत्किमेतौ पृच्छामि केनचिदुपायेन?

लवः– तात किमेतत्?

बाष्पवर्षेण नीतं वो जगन्मंगलमाननम्।
अवश्यायावसिक्तस्य, पुण्डरीकस्य चारुताम्।।29।।

(**अन्वय–** जगत्–मंगलम् वः आननम् बाष्प–वर्षेण अवश्याय–अव–सिक्तस्य पुण्डरीकस्य चारुताम् नीतम्।।29।।)

कुशः– अयि वत्स–

विना सीतादेव्याः किमिव हि न दुःखं रघुपतेः?
प्रियानाशे कृत्स्नं किल जगदरण्यं हि भवति।
स च स्नेहस्तावानयमपि वियोगो निरवधिः,
किमेवं त्वं पृच्छस्यनधिगतरामायण इव ?।।30।।

(**अन्वय–** सीता–देव्याः विना रघुपतेः किम् इव न हि दुःखम्? प्रिया–नाशे कृत्स्नम् जगत्–अरण्यम् हि भवति, सः च तावान् स्नेहः, अयम् अपि वियोगः, निरवधिः किल, अनधिगत–रामायणः इव, त्वम् एवम् किम् पृच्छसि?।।30।।)

रामः– (स्वगतम्) अये तटस्थ आलापः। कृतं प्रश्नेन। मुग्धहृदय! कोऽयमाकस्मिकस्ते संप्लवाधिकारः? एवं निर्भिन्नहृदयावेगः शिशुजनेनाप्यनुकम्पितोऽस्मि। भवतु तावदन्तरयामि (प्रकाशम्) वत्सौ! 'रामायणं रामायणमिति श्रूयते भगवतो वाल्मीकेः सरस्वतीनिष्यन्दः प्रशस्तिरादित्यवंशस्य' तत्कौतूहलेन यत्किंचिच्छ्रोतुमिच्छामि।

कुशः– कृत्स्न एव सन्दर्भोऽस्माभिरावृत्तः, स्मृतिप्रत्युपस्थितौ तावदिमौ बालचरितस्यासाते द्वौ श्लोकौ।

परिचय के विकास से प्रेम के अत्यधिक उत्कर्ष को प्राप्त होने पर, (एक दिन) एकान्त में विश्वासयुक्त होने पर भी, स्वाभाविक लज्जा के कारण, नेत्रों को बन्द करने वाली, सीता के उदर पर हाथ के सर्व प्रथम स्पर्श के चातुर्य से मैंने ही दो सन्तानों की गर्भ–ग्रन्थि को जाना था, उसके बाद, कुछ दिनों में उन्होंने भी इसे जान लिया था।।28।।

(रोकर) तब क्या इन दोनों से किसी उपाय द्वारा पूछता हूँ?

लव– तात! यह क्या है?

संसार के लिए मंगलस्वरूप आपका मुख, आँसुओं की वृष्टि द्वारा तुषार से सींचे गए, श्वेत कमल की सुन्दरता को प्राप्त करा दिया गया है।।29।।

कुश– अरे! वत्स,

सीता देवी के बिना श्रीराम को भला क्या दुःखदायी नहीं है? क्योंकि प्रियतमा के विनाश होने पर, सम्पूर्ण संसार ही जंगल हो जाता है और वह उतना प्रेम एवं यह वियोग भी तो अवधिशून्य ही है, फिर भी तुम रामायण को न पढ़े हुए के समान, इसप्रकार क्यों पूछ रहे हो?।।30।।

राम– (मन में) अरे! इसका कथन उदासीन (के समान) है। इसलिए प्रश्न करने से लाभ नहीं है। हे मूर्ख हृदय! इसप्रकार अकारण ही तुझे दूर जाने का क्या अधिकार है? इसप्रकार मानसिक क्षोभ के प्रदर्शित हो जाने से तो, मैं इन बालकों की भी दया का पात्र हो गया हूँ। ठीक है, तब तो इस विषय को छुपाता हूँ। (प्रकट में) वत्स! 'रामायण' ऐसा सुना जाता है, जो वस्तुतः भगवान् वाल्मीकि की वाणी के प्रवाह रूप में सूर्यवंश की वस्तुतः प्रशस्ति ही है। इसलिए मैं कौतूहल वश उसके कुछ अंश को सुनना चाहता हूँ।

कुश– हम लोगों ने तो इस सम्पूर्ण ग्रन्थ का ही अभ्यास किया है। सम्प्रति बालचरित के ये दो श्लोक स्मृतिपटल पर विद्यमान हैं।

रामः— उदीरयतं वत्सौ!

कुशः—

प्रिया तु सीता रामस्य दाराः पितृकृता इति।
गुणैर्रूपगुणैश्चापि प्रीतिर्भूयोऽप्यवर्धत।।31।।

(**अन्वय**— प्रिया सीता तु, रामस्य पितृ—कृता दाराः इति, गुणैः, रूपगुणैः च अपि प्रीतिः भूयः अपि अवर्धत।।31।।)

तथैव रामः सीतायाः प्राणेभ्योऽपि प्रियोऽभवत्।
हृदयं त्वेव जानाति प्रीतियोगं परस्परम्।।32।।

(**अन्वय**— तथा एव रामः सीतायाः प्राणेभ्यः अपि प्रियः अभवत्, तु हृदयम् एव परस्परम् प्रीति—योगम् जानाति ।।32।।)

रामः— कष्टमतिदारुणो हृदयमर्मोद्घातः। हा देवि! एवं किलैत—दासीत्। अहो!निरन्वयविपर्यासविप्रलम्भस्मृतिपर्यवसायिनस्तावकाः संसार—वृत्तान्ताः।

क्व तावानानन्दो निरतिशयविस्रम्भबहुलः?
क्व वान्योन्यप्रेम? क्व च नु गहनाः कौतुकरसाः?
सुखे वा दुःखे वा क्व नु खलु तदैक्यं हृदययोः?
तथाप्येष प्राणः स्फुरति, न तु पापो विरमति।।33।।

(**अन्वय**— निरतिशय—विस्रम्भ—बहुलः तावान् आनन्दः क्व? क्व वा अन्योन्य—प्रेम? गहनाः कौतुक—रसाः च क्व नु? सुखे वा, दुःखे वा, हृदययोः तत् ऐक्यम् क्व नु खलु ? तथा अपि पापः अप्राणः स्फुरति, न तु विरमति।।33।।)

भो कष्टम्!

प्रियागुणसहस्राणां क्रमोन्मीलनतत्परः।
य एव दुःसहः कालस्तमेव स्मारिता वयम्।।34।।

(**अन्वय**— प्रिया—गुण—सहस्राणाम् क्रम—उन्मीलन—तत्परः, यः एव दुःसहः कालः, वयम् एव तम् स्मारिताः।।34।।)

राम— तब तो हे बालकों! तुम उन्हें कहो।

कुश—

प्रिया सीता राम की पिता जनक द्वारा प्रदान की गयी, पत्नी थी। (दया दाक्षिण्य आदि आन्तरिक) **गुणों तथा** (सौन्दर्य आदि बाह्य) **गुणों से उनका प्रेम भी बहुत बढ़ा हुआ था।। 31।।**

उसीप्रकार राम भी सीता को प्राणों से भी अधिक प्रिय थे, क्योंकि हृदय ही तो आपस के प्रेम—सम्बन्ध को जानता है।।32।।

राम— कष्ट है, हृदय के मर्मस्थल पर होने वाला, यह प्रहार अत्यधिक कठोर है। हा देवि! निश्चय ही, यह वैसा ही था। ओह! तुम्हारे संसार के वृत्तान्त, आकस्मिक परिवर्तन के कारण, वियोग एवं स्मरण में बदलने वाले हैं।

अत्यधिक विश्वास से बढ़ा हुआ, उस परिमाण वाला, वह आनन्द कहाँ? अथवा वह परस्पर प्रेम कहाँ? गहन क्रीड़ाओं के वे अनुराग कहाँ? सुख में या दुःख में दोनों हृदयों की वह एकता कहाँ? किन्तु फिर भी पापी ये प्राण चल ही रहे हैं, रुक तो नहीं रहे हैं।।33।।

अरे! (अत्यधिक) **कष्ट है,**

प्रियतमा सीता के हजारों (दया दाक्षिण्यादि) **गुणों को क्रमशः प्रकाशित करने वाला, जो समय है, हमें उसी की स्मृतियों को करा दिया गया है।।34।।**

कुश ने यहाँ पर आदिकवि वाल्मीकि द्वारा विरचित रामायण के केवल दो ही श्लोकों को प्रस्तुत किया है, जिनमें सीता के प्रति श्रीराम के तथा उनके प्रति सीता के अनन्य प्रेम को उद्घाटित किया गया है, जिससे उनके हृदय में विद्यमान सीता—वियोग विषयक पीड़ा को प्रदर्शित होने का अवसर मिला है। साथ ही, सीता के आन्तरिक तथा बाह्य गुणों की चर्चा करके, उनके चरित्र के उज्ज्वल पक्ष को भी प्रस्तुत किया गया है, जिसके कारण राम आज भी उनके प्रशंसक हैं तथा उन्हें हृदय से प्रेम करते हैं।

तदा किंचित्किंचित्कृतपदमहोभिः कतिपयै–

स्तदीषद्विस्तारि स्तनमुकुलमासीन्मृगदृशः।

वयः स्नेहाकूतव्यतिकरघनो यत्र मदनः,

प्रगल्भव्यापारः स्फुरति हृदि, मुग्धश्च वपुषि।।35।।

(**अन्वय–** यत्र वयः स्नेह–आकूत–व्यतिकर–घनः मदनः हृदि, प्रगल्भ–व्यापारः वपुषि च, मुग्धः स्फुरति, तदा च मुग्धः स्फुरति किंचित् –किंचित्–कृत–पदम् मृग–दृशः, तत् स्तन–मुकुलम् कतिपयैः अहोभिः ईषत् विस्तारि आसीत् ।।35।।)

लवः– अयं तु चित्रकूटवर्त्मनि मन्दाकिनीविहारे सीतादेवीमुद्दिश्य रघुपतेः श्लोकः।

त्वदर्थमिव विन्यस्तः, शिलापट्टोऽयमायतः।

यस्यायमभितः पुष्पैः, प्रवृष्ट इव केसरः।।36।।

(**अन्वय–** अयम् आयतः शिलापट्टः, त्वत् अर्थम् इव विन्यस्तः, यस्य अभितः अयम् केसरः पुष्पैः प्रवृष्टः इव ।।36।।)

रामः–(सलज्जास्मितस्नेहकरुणम्) अति हि नाम मुग्धः शिशुजनः विशेषतस्त्वरण्यचरः हा देवि! स्मरति वा तस्य तत्समयविस्रम्भाति–प्रसंगस्य?

श्रमाम्बुशिशिरीभवत् सृतमन्दमन्दाकिनी,

मरुत्तरलितालकाकुलललाटचन्द्रद्युति।

अकुङ्कुमकलंकितोज्ज्वलकपोलमुत्प्रेक्ष्यते,

निराभरणसुन्दरश्रवणपाशमुग्धं मुखम्।।37।।

(**अन्वय–** श्रम–अम्बु–शिशिरी–भवत्–सृत–मन्द–मन्दाकिनी–मरुत् –तरलि–तालक–आकुल–ललाट–चन्द्र–द्युतिः अकुङ्कुम–कलंकित–उज्ज्वल–कपोलम् निर्–आभरण–सुन्दर–श्रवण–पाश–मुग्धम् मुखम् उत्प्रेक्ष्यते।।37।।)

(स्तम्भित इव स्थित्वा, सकरुणम) अहो न खलु भोः,

जिस समय युवावस्था में प्रेम, आपस की अभिलाषा के सान्निध्य से संसर्ग द्वारा प्रगाढ़, हृदय में प्रौढ़ व्यापार वाला होकर, शरीर में मुग्धरूप में स्फुरित होता है। उस अवसर पर अपना थोड़ा–थोड़ा स्थान बनाने वाले, मृग के समान नेत्रों वाली सीता के वे स्तन, कली के समान मनोरम, कुछ ही दिनों में विस्तार को प्राप्त हो गए थे।।35।।

लव– यह तो वस्तुतः चित्रकूट के मार्ग में गंगा विहार के अवसर पर देवी सीता को लक्ष्य करके, (कहा गया) रघुनाथ का श्लोक है–

यह विस्तृत शिलापट्ट मानो तुम्हारे लिए ही स्थापित किया गया है, जिसके चारों ओर यह बकुल का वृक्ष, मानों पुष्पों से वृष्टि कर रहा है।।36।।

राम– (लज्जा, स्मित, स्नेह तथा करुणापूर्वक) शिशुजन वस्तुतः अत्यधिक सौम्य स्वभाव वाले होते हैं, उनमें भी विशेषरूप से वन में विचरण करने वाले। हे देवि सीते! उस समय विश्वास के कारण, जो विशेष घटना हुई थी, क्या तुम उसे याद करती हो?

जो परिश्रम के जल से शीतल सा हो रहा है एवं मन्द–मन्द प्रवाहित होते हुए, मन्दाकिनी की वायु से चंचल अलकों द्वारा, जिसके ललाटरूपी चन्द्रमा की शोभा को ढ़का जा रहा है, केसर के लेप न होने पर भी, जिसके कपोल चमक रहे हैं, आभूषणों के अभाव में भी सुन्दर कर्णपाशों से मनोरम, तुम्हारे उस मुख को मैं मानो प्रत्यक्ष सा देख रहा हूँ।।37।।

(स्तम्भित के समान स्थित होकर, करुणापूर्वक) अहो, अरे! भला क्या हो सकता है?

महाकवि का मर्यादित श्रृंगार दर्शनीय है। भवभूति वस्तुतः कालिदास के समान उन्मुक्त श्रृंगार–चित्रण के पक्षपाती नहीं है। इसीलिए उन्होंने करुणरस प्रधान प्रस्तुत कृति में कुछ ही स्थलों पर अंगरूप में श्रृंगार का चित्रण करते हुए, उचित मर्यादा का पालन किया है, जो उनके व्यक्तित्व को भी प्रदर्शित करने वाला है। उपर्युक्त अंश से कवि की उक्त मान्यता की पुष्टि होती है।

चिरं ध्यात्वा ध्यात्वा निहित इव निर्माय पुरतः,
प्रवासे चाश्वासं न खलु न करोति प्रियजनः।
जगज्जीर्णारण्यं भवति च कलत्रे ह्युपरते,
कुकूलानां राशौ तदनु हृदयं पच्यत इव।।38।।

(अन्वय– प्रवासे च चिरम् ध्यात्वा ध्यात्वा, निर्माय पुरतः निहितः इव, प्रियजनः आश्वासम् न करोति, इति न खलु। कलत्रे हि उपरते जगत् जीर्ण–अरण्यम् हि भवति, तदनु च हृदयम् कुकूलानाम् राशौ पच्यते इव।।38।।)

(नेपथ्ये)

वसिष्ठो वाल्मीकिर्दशरथमहिष्योऽथ जनकः,
सहैवारुन्धत्या शिशुकलहमाकर्ण्य सभयाः।
जराग्रस्तैर्गात्रैरथ खलु सुदूराश्रमतया,
चिरेणागच्छन्ति त्वरितमनसो विश्लथजटाः।।39।।

(अन्वय– अरुन्धत्या सह एव वसिष्ठः, वाल्मीकिः दशरथ–महिष्यः, अथ जनकः, शिशु–कलहम् आकर्ण्य, सभयाः, त्वरित–मनसः विश्लथ–जटाः (सन्तः), अथ सुदूर–आश्रमतया जरा–ग्रस्तैः गात्रैः चिरेण आ–गच्छन्ति खलु ।।39।।)

रामः– कथं भगवत्यरुन्धती? वसिष्ठोऽम्बाश्च जनकश्चात्रैव? कथं खलु ते द्रष्टव्याः? (सकरुणं विलोक्य) तातजनकोऽप्यत्रैवायात इति वज्रेणैव ताडितोऽस्मि मन्दभाग्यः।

सम्बन्धस्पृहणीयताप्रमुदितैर्ज्येष्ठैर्वसिष्ठादिभि–
र्दृष्ट्वापत्यविवाहमंगलविधौ तत्तातयोः संगमम्।
पश्यन्नीदृशमीदृशः पितृसखं वृत्ते महावैशसे,
दीर्ये किं न सहस्रधाहमथवा रामेण किं दुष्करम्।।40।।

(अन्वय– सम्बन्ध–स्पृहणीयता–प्रमुदितैः, ज्येष्ठैः वसिष्ठ–आदिभिः, अपत्य–विवाह–मंगल–विधौ तत् तातयोः संगमम् दृष्ट्वा, महा–वैशसे वृत्ते ईदृशम् पितृ–सखम् पश्यन्, ईदृशः अहम् सहस्रधा किम् न दीर्ये अथवा रामेण किम् दुष्करम्?।।40।।)

प्रवासकाल में भी लम्बे समय तक बार–बार ध्यान करके, कल्पना से उसकी रचना करके, अपने सामने उपस्थित हुआ सा किए जाने पर, प्रियजन, प्रेमी को सान्त्वना न देता हो, ऐसी बात नहीं है, (अपितु देता ही है) किन्तु स्त्री के मर जाने पर तो सम्पूर्ण संसार ही अरण्य हो जाता है और उसके बाद हृदय मानो 'तुष' की अग्नि के समूह पर पकता रहता है।।38।।

(नेपथ्य में)

अरुन्धती के साथ ही वसिष्ठ, महर्षि वाल्मीकि, महाराज दशरथ की महारानियाँ तथा जनक, (ये सभी) बालकों के युद्ध के विषय में सुनकर, भय से युक्त तथा शीघ्रतायुक्त चित्त वाले, शिथिल जटा वाले, आश्रम से दूर होने के कारण, वृद्धावस्था से पीड़ित अंगों के कारण, अत्यधिक विलम्ब से आ रहे हैं।।39।।

राम– क्या भगवती अरुन्धती, महर्षि वसिष्ठ, माताएँ तथा जनक भी यहीं पर हैं? मैं उन लोगों का दर्शन भला कैसे कर सकता हूँ?

(करुणापूर्वक देखकर)

पिता जनक भी यहीं पर आ गए हैं, इसलिए मन्दभाग्य मैं वज्र से आहत के समान हो गया हूँ।

सम्बन्ध की प्रशंसनीय स्थिति होने से अत्यधिक प्रसन्न, वसिष्ठ आदि श्रेष्ठ ऋषियों द्वारा अनुष्ठान कराए गए, सन्तानों के विवाह की मांगलिक विधि में, उनके पितृजनों का मिलना देखकर, इसप्रकार की महान् हिंसा के होने पर, इसप्रकार के पिता के मित्र को, इस प्रकार से देखता हुआ मैं, हजारों टुकड़ों में विदीर्ण क्यों नहीं हो रहा हूँ? अथवा राम द्वारा भला क्या दुष्कर नहीं है? ।।40।।

प्रस्तुत अंश में कवि ने इस मनोवैज्ञानिक तथ्य को उद्घाटित किया है कि कल्पना द्वारा व्यक्ति किसी भी वस्तु या व्यक्ति के चित्र को साक्षात्रूप से अपने समक्ष स्थापित करने में समर्थ है, वह उस चित्र से बात कर सकता है, उसके स्पर्श का आनन्द भी कल्पनाओं में ही उठाने में समर्थ होता है। ऐसा करके वह अपनी उस वस्तु या व्यक्ति विषयक वेदना को, पीड़ा को कुछ सीमा तक कम कर सकता है। यह अंश महाकवि के अपने जीवन का अनुभव भी प्रतीत हो रहा है।

(नेपथ्ये)

भो भोः! कष्टम्।

अनुभावमात्रसमवस्थितश्रियं सहसैव वीक्ष्य रघुनाथमीदृशम्।

प्रथमप्रबुद्धजनकप्रबोधिता, विधुराः प्रमोहमुपयान्ति मातरः।।41

(**अन्वय–** अनुभाव–मात्र–सम्–अवस्थित–श्रियम्, ईदृशम् रघुनाथम्, सहसा एव वीक्ष्य, प्रथम–प्रबुद्ध–जनक–प्रबोधिताः मातरः विधुराः प्र–मोहम् उपयान्ति ।।41।।)

रामः–

जनकानां रघूणां च, यत्कृत्स्नं गोत्रमंगलम्।

तत्राप्यकरुणे पापे, वृथा वः करुणा मयि।।42।।

(**अन्वय–** जनकानाम् रघूणाम् च, यत् कृत्स्नम् गोत्र–मंगलम्, तत्र अपि अकरुणे पापे, मयि वः करुणा वृथा।।42।।)

यावत्संभावयामि।

(इत्युत्तिष्ठति)

कुशलवौ– इत इतस्तातः।

(सकरुणं परिक्रम्य निष्क्रान्ताः सर्वे)

।। इति महाकवि भवभूति विरचित उत्तररामचरिते 'कुमारप्रत्यभिज्ञानो' नाम षष्ठोऽङ्कः।।

(नेपथ्य में)

अरे! रे, अत्यधिक कष्ट है,

प्रभाव मात्र से शोभायुक्त, इसप्रकार के राम को, अकस्मात् ही देखकर, पहले होश में आए हुए जनक द्वारा, होश में लायी गयी, माताएँ व्याकुल होकर, अत्यधिक मूर्च्छा को प्राप्त हो रही हैं।।41।।

राम–

जनक वंश तथा रघुकुल के राजाओं की, जो सीता सम्पूर्णरूप से इन दोनों ही कुलों की कल्याण स्वरूप थी, उसके ऊपर निर्दय तथा पाप से युक्त होने वाले, मुझ राम के ऊपर आप लोगों की अनुकम्पा व्यर्थ है।।42।।

जब तक मैं इन लोगों का सत्कार करता हूँ।

(ऐसा कहकर उठते हैं)

कुश औरलव– तात! इधर से, इधर से।

(करुणापूर्वक परिक्रमा करके सभी निकल जाते हैं)

।। इसप्रकार महाकवि भवभूति विरचित उत्तररामचरित में 'कुमार प्रत्यभिज्ञान' नामक षष्ठ अंक का डॉ. राकेश शास्त्री, बाँसवाड़ा द्वारा किया हुआ हिन्दी अनुवाद पूर्ण हुआ।।

।। श्रीः ।।

सप्तमोऽङ्कः

(ततः प्रविशति लक्ष्मणः)

लक्ष्मणः– भोः, किं नु खलु भगवता वाल्मीकिना सब्रह्मक्षत्र–पौरजानपदाः प्रजा सहाऽस्माभिराहूय कृत्स्न एव सदेवासुरतिर्यङ्निकायः सचराचरो भूतग्रामः स्वप्रभावेण संनिधापितः? आदिष्टश्चाहमार्येण–

